कविः स विरलः पुनर्भुवि भवादृशो दृश्यते
सुधाभिरभिषेचनं रचयतीव यः सूक्तिभिः ॥ ५० ॥
मंदश्छंदसि कोपि कोपि विकलः सालंकृतौ व्याकृता-
वर्थे कोपि वृथाश्रमो रसनिधावंधश्च कोप्यध्वनि ।
वक्त्रांतर्विहरद्विरिंचितनयामंजीरमंजुस्वर-
स्पर्धाबंधुभिरेक एव कवते काव्यैः कुमारात्मजः ॥ ५१ ॥
वैदुष्यं विगताश्रयं श्रितवति श्रीहेमचंद्रे दिवं
श्रीप्रह्लादनमंतरेण विरतं विश्वोपकारव्रतं ।
दृष्ट्वा तद्भुवमत्र मंत्रिमुकुटे श्रीवस्तुपाले कवि-
स्तत्कीर्तिस्तुतिकैतवादिति मुदामुद्गारमारब्धवान् ॥ ५२ ॥
प्राग्वाटान्वयवारिधौ विधुरिव श्रीचंडपः प्रागभूत्
संभूतोद्भुतसत्यशौचसदनं चंडप्रसादस्ततः ।
सोमस्तत्तनयो नयोज्ज्वलमतिस्तस्याश्वराजः सुतः
पूतात्माथ तदंगभूः सुकृतभूः श्रीवस्तुपालोभवत् ॥ ५३ ॥
उत्फुल्लमल्लीप्रतिमल्लकीर्तिः श्रीमल्लदेवोभवदग्रजन्मा ।
बभूव तस्यावरजश्च तेजःपालाभिधानः सचिवप्रधानं ॥ ५४ ॥
श्रीवस्तुपालः स चिरायुरस्तु दिशां प्रकाशं दिशते सदा यः ।
कर्पूरकुंदेंदुसितैरलस्रोरदावदातद्युतिभिर्यशोभिः ॥ ५५ ॥
क्षीणे चक्षुषि भेषजं भगवती काली श्वरी देहिनां
देहे श्वित्रविचित्रभाजि शरणं श्रीवैद्यनाथः प्रभुः ।
संसारज्वरजर्जरे त्वदिह सदा विष्णुर्भविष्णुर्मुदे
दौर्गत्ये च जिघांसिते गतिरसौ श्रीवस्तुपालः पुनः ॥ ५६ ॥
न वदति पुरुषा रुषापि वाचः स्पृशति परस्य न मर्म नर्मणापि ।
विरमति मतिमानमान्यचंद्रः क्वचन च नार्थिकदर्थितोपि दानात् ॥ ५७ ॥
धनमनवरताक्षितींद्रसेवाश्रमसमवाप्तमयत्नतोपि दत्ते ।
अपरमपि परोपकारकं यद्विमृशति वस्तु तदेव वस्तुपालः ॥ ५८ ॥
सत्यं ब्रुवे भवतु मा क्षतिरत्र काचिद्भूत्वा खलप्रकृतिनापि मयातिमात्रं ।
मंत्री समे च विषमे च परीक्षितोसौ दृष्टं न दुष्टमिह किंचन सच्चरित्रे ॥ ५९ ॥
अयमनुदिनदानोत्कर्षितप्रानापर्षत्परि[चरित]चरित्रः स्वस्तिमानस्तु मंत्री ।
तुहिनकरसमानैर्यस्य कीर्तिप्रतानैरजानिषत रजन्यः प्राप्तराकाविपाकाः ॥ ६० ॥

लभंते लोकतः पापाः शापानन्ये नियोगिनः ।
अधिकारमधिक्कारममात्यः शास्त्यसौ पुनः ॥ ६१ ॥
त एव स्तूयंते नृपतिपशुभिर्धीवरतया
प्रजानामायः सपदि खलु येभ्यः प्रपतति ।
तदित्थं सुस्थानां [चकित ?] चकितं क्वापि वसतां
सतां संप्रत्येकः सचिवशिवतातिर्भुवि भवान् ॥ ६२ ॥
अर्थदानदलितार्थिदुस्थितिं त्वां विना विनयनम्र संप्रति ॥
मृज्यते जगति केनचित्सतां वस्तुपाल न कपालदुर्लिपिः ॥ ६३ ॥
गोमयरसानुलिप्ते कीर्तिसुधाधवलिते च भवनगृहे ।
श्रीवस्तुपाल भवतः चकास्ति चित्रं चरित्रमिह ॥ ६४ ॥
पीयूषैः प्रणता हिमैः प्राणिहिता ताराभिराराधिता
गंगावीचिभिरार्चिता परिचिता दिग्दंतिदंतांशुभिः ।
कर्पूरैः परिशीलिता मलयजैरावर्जिता मं[डिता]
डिंडीरस्तबकैर्वनैरनुसृता मंत्रीश कीर्तिस्तव ॥ ६५ ॥
प्रवर्तमानेत्र कवित्वसत्रे सत्कृत्य सत्पात्रममात्यमेवं ।
कृतार्थमात्मानमसावमंस्त सौवस्तिको गुर्जरनिर्जराणां ॥ ६६ ॥
कुमारपुत्रेण कुमारमातुः काव्यं तदेतज्जगदेकदेव्याः ।
श्रुतिस्मृतिव्याकृतियज्ञविद्याविशारदेन क्रियतेस्म तेन ॥ ६७ ॥

इति गूर्जरेश्वरपुरोहितश्रीसोमेश्वरदेवविरचिते सुरथोत्सवनाम्नि महाकाव्ये कविप्रशस्तिवर्णनो नाम पंचदशः सर्गः ।

T. No. 1. *Garbhopanishad and Áśramopanishad.*

गर्भोपनिषदाश्रमोपनिषच्च ।

इत्यथर्ववेदे आश्रामोपनिषत्समाप्ता द्विपञ्चाशत्सङ्ख्योपनिषद्ग्रन्थसमाप्तिः ॥ ५२॥ पञ्चदशो [प] निषदो भवन्ति शौनकेयानाम् । मुण्डकादिस्त्वलातान्ता विज्ञेया ब्रह्मवेदस्य ॥ १॥ सप्तात्रि(त्रि)शत्तथान्याश्च पैप्पलादिषभेदतः । एवं पञ्चाशदुपनिषदो ब्रह्मवेदस्य नान्यतः ॥ २॥ नीलरुद्रप्रभृतय आश्रमान्तः(न्ताः)प्रकीर्तिता [:] एतास्सर्वा पृथग्वाक्या जीवब्रह्मैक्यतोधिकाः ॥३॥ इत्यथर्ववेदोपनिषद्ग्रन्थः समाप्तः ॥

मुण्डकोपनिषत् १ प्रश्नोपनिषत् २ ब्रह्मविद्योप० ३ क्षुरिकोपनिषत् ४ चूलिकोपनिषत् ५ शिरोपनिषत् ६ शिखोपनिषत् ७ गर्भोपानषत् ८ महोपनिषत् ९ ब्रह्मोपनिषत् १० प्राणाग्निहोत्रोपनिषत् ११ मण्डूकोपनिषत् १२ वैतथ्याख्यं प्रकरणमुपनिषत् १३ अद्वैतो० १४ अलात-शान्ता(न्त्या)ख्यं प्रकरणं १५ पञ्चदशोप नीलरुद्रोप० १६ नादबिन्दू० १७ ब्रह्मबिन्दू० १८ अमृतबिंन्दू० १९ ध्यानबिन्दूप० २० तेजोबिन्दूप० २१ योगशिखोपनिष० २२ योगतत्त्वोप० २३स (सं) न्यासोप० २४ आरुणेयो० २५ कण्ठश्रुत्युप० २६ पिण्डोप० २७ आत्मोपनि० २८

नृसिंहपूर्वतापनी २९ तापनीयी(ये) महोप० ३० तापनीये महोप० ३१ तापनीय ३२ नृसिंहताप-नीमहोप० आदित ३३ उत्तरतापनी ३४ कठवल्या(ल्ह्या)ख्या ३५ कठवल्या(ल्ह्या)ख्या उत्तरवली(ल्ली) ३६ केनिषतोप० ३७ नारायणोपनि० ३८ बृहत्ना(न्ना)रायणोप० ३९ बृहत्ना-(न्ना)रायणो० ४० सर्वोपनिषःसारं ४१ हंसोप० ४२ परमहंसोपनिषत् ४३ आनन्दवली (ल्ली) ४४ भृगुवली(ल्ली) ४५ गारुडोप० ४६ कालाग्निरुद्रोप० ४७ रामपूर्वतापनीय ४८ रामोत्तरतापनीय ४९ कैवल्योप० ५० जाबालोप० ५१ आश्रमोप० ५२

U. No. 382. *Śrâddhakâśikâ.*

श्राद्धकाशिका ।

आद्यं ।

यस्य प्रसादपयसा क्रतुपादपास्तं काश्यायनं मुनिवरं शिरसाभिवंदे ।
सिक्ताः फलंति यजुषामिह याजकानां स्वर्गोद्भवानि विविधानि फलान्यजस्रं ॥१॥
कर्कों व्याख्यदिदं गभीरवचनैः सूत्रं यतोस्मादभू-
द्दुर्बोधं च ततो हलायुध इति व्याख्या तथाप्यस्फुटं ।
भूयोपि प्रतिषेधकादिवचनैः स्मार्तैर्मया काशिका
सूत्रस्योपरि संशयौघतिमिरध्वंसाय तंतन्यते ॥ २ ॥
सूत्रार्थव्यंजनाद्वाक्यैर्विशेषोक्तिप्रकाशनात् ।
अस्यान्वर्थमिदं नाम ग्रंथस्य श्राद्धकाशिका ॥ ३ ॥
नित्यानंद इतीह याज्ञिकवरो जातस्तदीयः सुतः
स्मार्ताग्नौ विहितक्रियोतिसुख इत्याख्यो जगत्यद्भुतः ।
तत्पुत्रोप्यभवत्स्मृतिज्ञचतुरः शास्त्रेष्वधीति(ती) श्रुतौ
विष्णुर्मिश्र इमं निबंधमकरोत्कृष्णः कृती तत्सुतः ॥ ४ ॥

अंते खंडितः

V. No. 363. *Śulvasûtravṛitti by Mahîdhara.*

शुल्वसूत्रवृत्ति :।

रसवेदांगभूवर्षे भाष्यंते(मास्यंते?) धवले दले ।
त्रयोदश्यां रवेर्वारे वाराणस्यां महीधरः ॥ १॥
श्रीरत्नेश्वरमित्रस्य गुरोः केशवजन्मनः ।
आज्ञया विवृतिं शौल्वीं भाष्यवृत्त्यनुसारिणीं ॥ २ ॥
विदुषां सुखबोधाय व्यधाद्बुद्ध्यनुसारतः ।
भाष्यं रामकृतां वृत्तिं सूत्राण्यालोच्य तत्त्वतः ॥ ३ ॥
नीलकंठो रमानाथः सिताभश्चंद्रशेखरः ।
भैरवेशः कृपासिंधुः स मे तुष्यान्नृकेसरी ॥ ४ ॥

W. No. 25. *Hautrakârikâḥ.*
हौत्रकारिकाः ।

प्रणमामि गणाधीशं विघ्नध्वांतदिवाकरं ।
दंतावलमुखं सार्द्रसिंदूरारुणविग्रहं ॥ १ ॥
वंदे विष्णुं जगद्वंद्यं नीलाचलनिवासिनं ।
मीमांसायुगुलव्याख्यानिपुणं श्रौतकर्मणा(णः) ॥ २ ॥
विज्ञातारं गुरुं नौमि यतिमीश्वरभारतीं ।
प्रणम्य पंचाननवाहनर्षिं तथा शौनकमाश्वलायनं ।
करोति तत्सूत्रविबोधितार्थं प्रयोगरत्नं नरसिंहयज्वा ॥ ३ ॥
नानाश्रौतेषु निपुणा याज्ञिकास्त्यक्तमत्सराः ।
युक्तमेतदयुक्तं वा क्षंतुमर्हथ सज्जनाः ॥ ४ ॥

मध्ये ।

जयति स होसलदेशे ग्रामवरो नामतो वरुवाछुः ।
यत्र श्रीनरसिंहो जातस्तत्सूनुरनुगतः काशीं ॥ १ ॥
अन्वयावतंसो नारायणभट्टसंज्ञकः काश्यां ।
अंमाई च सुपुत्रं गोपीनाथं विपश्चितं सुषुवे ॥ २ ॥
गोपीनाथबुधानुज्ञयज्वश्रीमन्नृसिंहरचितेस्मिन् ।
श्रौतप्रयोगरत्ने चातुर्मास्यानि सम्यगुक्तानि ॥ ३ ॥

X. No. 428. *Prâyaśchittapradîpa.*
प्रायश्चित्तप्रदीपः ।

नत्वा बौधायनाचार्यं तेनोक्तश्रौतकर्मणां ।
विध्यतिक्रमणे प्रायश्चित्तदीपः प्रकाश्यते ॥ १ ॥
श्रौते बौधायनोक्तानि प्रायश्चित्तानि यानि तु ।
उक्तानि सूत्रमध्ये च वर्यगोपालसूरिणा ॥ २ ॥
व्यासोक्तानि प्रकीर्णानि तैरनुक्तानि यानि च ।
भवस्वामिमतात्तेषां विस्तरान्निर्णयं ब्रुवे ॥ ३ ॥

Y. No. 21. *Âpastambadhvanitârthakârikâḥ by Trikâṇḍamaṇḍana.*
आपस्तंबध्वनितार्थकारिकाः ।

उपवर्षः ।

561 उपवर्षादिभिः प्रोक्तमाधाने शतभोजनं ।
सूत्रांतरेषु तन्नोक्तं तस्मादेतत्कृताकृतं ॥

11a6 उशिजा वामदेवाश्च तथा दीर्घतमादयः ।
गौतमा एव विज्ञेया उपवर्षादिपाठतः ॥

कर्कः ।

14a1 तूष्णीमेवोपतिष्ठेत प्रवत्स्यन्नागतोपि वा ।
इति कात्यायनः प्राह कर्को व्याख्यातवांस्तथा ॥

6a8 असिसंनिभमेवान्यविशेषोक्तिविवर्जितं ।
वज्रं कात्यायनः प्राह कर्को व्याख्यातवांस्तथा ॥

पाणिनीयः ।

17a2 [Lacuna] अदृष्टा जपेन्मंत्रांश्च तानपि ।
इत्याथर्वणसूत्रे तु पाणिनीयनिरूपितं ॥

नारायणः

2a2 यस्मिन्कस्मिंश्चिदृतावादधीतेत्याश्वलायनः ।
आनुराधानविषयामिति नारायणोब्रवीत् ॥
व्याख्यातं भवनागेन सूत्रमेतद्यथाश्रुतं ॥

12a2 यत्तु नारायणेनोक्तं ग्रामात्स्वाग्निसमन्वितात् ।
गत्वा ग्रामान्तरे वासः प्रवासोयमितीदृशः ॥
उपलक्षणमेवैतद्ग्रामस्योच्चारणद्वयं ।
ग्रामांतरे नगर्यां वा पल्वयां वान्यत्र वा क्वचित् ।
सीमामतीत्य चेद्रात्रौ वासः प्रवसनं हि तत् ॥

24b3 अरण्यारोपणे स्पर्शं विना मंत्रेण मंथयेत् ।
स्वयं वा मंथनं कुर्यादिति नारायणोब्रवीत् ॥

भवनागः

2a2 उपरि विन्यस्तः ।

13a4 बर्हिर्धेनेति मंत्रेण बहून्येवोपतिष्ठते ।
इत्युक्तं भवनागादैरभयं व इतीह तु ॥

20a1 मंत्रेण गार्हपत्येऽग्नौ तूष्णीमन्यतरे तपेत् ।
इति वा स्यात्समारोपो भवनागादिदर्शनात् ।

Z. No. 41. *Stutikusumâñjali.*

स्तुतिकुसुमांजलिः ।

अंते ।

पुरा पुरारेः पदधूलिधूसरः सरस्वतीस्वैरविहारभूरभूत् ।
विशालवंशश्रुतवृत्तविश्रुतो मनीषिणां गौरधरः किलाग्रणीः ॥ १ ॥

भ्रमादनिर्माय पुरातनः कविर्यमग्रिमश्लोकमवश्यमग्रतः ।
विमृष्य पंक्तीरुपरि द्विजन्मनां न्यवे(वी)विशत्काकपदांकितं पुनः ॥ २ ॥
अनंतसिद्धांतपथांतगामिनः समस्तशास्त्रार्णवपारदृश्वनः ।
ऋजुर्यजुर्वेदपदार्थवर्णना व्यनक्ति यस्याद्भुतविश्रुतं श्रुतं ॥ ३ ॥
सुतो भवद्रत्नधरः शिरोमणिर्मनीषिणामस्य गुणौघसागरः ।
यमाश्रिताद्वास्त सरस्वती हरेरुरस्थलं रत्नधरं श्रितां श्रियं ॥४ ॥
उदारसत्त्वं विपुलं सुनिर्मलं प्ररूढमर्यादमगाधमाश्रयं ।
प्रविश्य यस्य स्ववशा सरस्वती पदं बबंध स्थिरमंबुधेरिव ॥ ६ ॥
कपोलदोलायितकर्णभूषणं तरंगितभ्रूयुगभंगुरालिकं ।
सचेतसामर्धनिमीलितेक्षणं क्षणं वितन्वंति मुखं यदुक्तयः ॥ ६ ॥
अथास्य धीमानुदपादि वादिनां वितीर्णमुद्रो वदनेष्वनेकशः ।
उदारसंस्कारसुसारभारतीपवित्रवक्त्रांबुरुहो जगद्गुरः ॥ ७ ॥
अपि स्थवीयः स्वकृतस्थिरस्थितिः कुशाग्रतीक्ष्णामधिरुह्य यन्मतिं ।
अहो बत स्वैरविहारलीलया पदं न्यधादस्खलितं सरस्वती ॥ ८ ॥
निर्मत्सरः सहृदयः श्रुतपारदृश्वा विश्वातिशायिविनयः प्रियवाक्सुशीलः ।
किं वापरं कविगिरां सदसद्विचारचातुर्यधुर्यधिषणः शरणं य एकः ॥ ९ ॥
तेनादृतेन शिशुनैव निवेद्यमानमानंदकंदलितभक्तिकुतूहलेन ।
एतं शशांककलिकाकलितावतंसशंसारसायनरसं रसयंतु संतः ॥ १० ॥
गृह्णंतु कंचन विशेषमशेषमस्मादस्माकमार्तवचनात्कचनांतरज्ञाः ।
चिन्वंति पल्वलजलात्कुशला विशालशैवालजालकलितात्कमलौघमेव ॥ ११ ॥
यद्यप्यासामनलसरसस्फारसारं नकिंचिद्वाचामंतर्विरचितचमत्कारमस्त्यर्थतत्त्वं ।
तत्राप्येतास्त्रिभुवनगुरुस्तोत्रमैत्रीपवित्राः कर्णाभ्यर्णाभरणसरणिं नेतुमर्हंति संतः ॥१२॥

प्रेमाणं मणिकर्णिकां प्रति बुधा मंदीकुरुध्वं मतिं
मुक्तादामनि मा कृत स्पृशत मा तांबूलहेवाकितां ।
भूषार्थं प्रभवंति कर्णपुलिने कंठे मुखांभोरुहे
देवस्य स्मरशासनस्य यदिमाः स्तोत्रावलीसूक्तयः ॥ १३ ॥
निक्षिप्तं शतसप्तकेन सहितं पादायुतार्धं मया
निर्हिंसे गुणिनि द्विजेंद्रमुकुटे धर्मैकधाम्नीश्वरे ।
प्रायेण क्लिशितस्य दीनवचसः क्षमाक्षिप्तमूर्धोपि मे
पादं नैकमयं प्रयच्छति विधौ वक्रे करोम्यत्र किम् ॥१४॥
कारंकारमकारि वारितशमैरक्षैररक्षैरिदं
निघ्नं विघ्नितशंभुसेवनसुधाभोगोपभोगं वपुः(मनः) ।

किंतु क्वापि कदापि कापि पतिता सा साधुदृष्टिर्यतः
प्राप्तः सूक्तिवपुर्जितोर्जितसुधास्वादः प्रसादः प्रभोः ॥ १५ ॥
यत्सत्यं सदसद्विवेकविकलग्रामीणकुग्रामणी ।
मिथ्यास्तोत्रपरा पराभवपदं नीतासि भीतास्यतः ।
मातः कातरतां विमुंच यदसौ सौभाग्यभाग्यावधिः
संजातो जगदेकनाथनुतिभिर्वाग्देवि ते विभ्रमः ॥ १६ ॥

AA. No. 110 of 1873-74. *Madanavinodanighaṇṭu, leaf 43, a.*

अद्रे ब्रह्मयुगयुगेंदुगणिते श्रीविक्रमार्कप्रभो–
र्मासे मासि वलक्षपक्षललिते षष्ठ्यां शुधाशे(सुधांशो)र्दिने ।
दानानां परितापदलनो (?) ग्रंथं निघंटुं कलिः (किल)
श्रीदः श्रीमदनो व्यधत्त चतुरः सच्चक्रचूडामणिः ॥ १४॥

BB. Nos. 44 and 45. *Áchârâdarśa and Commentary.*

आचारादर्शः ।

तत्राद्यं ।

दीक्षितो रणयज्ञेषु विबुधानंददायिषु ।
हरिरब्धिसुतावक्त्रसोमपीती(थी) पुनातु वः ॥ १॥
अहोरात्राश्रितो धर्म इह वाजसनेयिनां ।
निबध्यते निबद्धो यो धर्मशास्त्रनिबंधिभिः ॥ २ ॥

अंते ।

समूलवचनाभागो मीमांसान्यायनिर्मलः ।
श्रीदत्तेन सतामेष आचारे दर्पणः कृतः॥
दुरुक्तमपि सूक्तं मे मन्वादिवचनाश्रितं ।
अपि चर्मोदकं तीर्थसलिलांतर्गतं शुचि ॥

इतिश्रीमहामहोपाध्याय श्रीश्रीदत्तकृत आचारादर्शः समाप्तः । संवत्सरात्संवत् १६९० भाद्रपदशुक्लद्वितीयायां लिखितोयं पंडितशिरोमणिकृष्णदत्तमते स्थायिना श्रीकंठेन ।

आचारादर्शटीका ।

तत्राद्यं ।

श्रीमच्छंकरतुष्टयर्थमाचारादर्शबोधिनी ।
क्रियतेतिस्फुटा रम्या भट्टगौरीशशर्मणा ॥

अंत्यं ।

श्रीमन्मैथिलसूरिवृंदतिलकः श्रीशंकरः सत्कविः
शिष्यस्तस्य जलालदीनशकृद्दामोदरः पंडितः ।
तत्पुत्रेण सतां मुदे विरचिता आदर्शसंबोधनी
भूय(या)च्छंकरतुष्टिहेतुरनिशं व्याख्या गुणैः संयुता ॥
ऋत्वंकरसचंद्राब्दे विक्रमादित्यभूपतेः ।
आश्विनस्य त्रयोदश्यां रवौ काश्यां प्रपूरिता ॥

इति स्मार्तशिरोमणिदामोदरभट्टपुत्रगौरीपतिभट्टविरचिता आचारादर्शविवृतिः पूर्णा ।संवत् १८०० वर्षे कार्तिकशुद्ध ९ भौमे ।

CC. No. 58. *Vivâdârṇavabhañjana.*

विवादार्णवभंजनं ।

तस्याद्यं ।

विश्वेषां शरणं नवांबुदरुचिः सद्भक्तचिंतामणि-
र्यः प्रत्यूहतमोविनाशमिहिरः कीनाशमानाशनः ।
संसारैकमहार्णवे निपततां विस्तारबीजं नृणां
गोविंदः कृपया सुरासुरगणैर्वंद्यश्चिरं पातु वः॥१॥
चंडेशधारेश्वरावेश्वरूपा मिताक्षराकारहलायुधौ च ।
श्रीकृष्णवाचस्पतिधर्मरत्नकृतस्तथा श्रीकरशूलपाणी ॥ २ ॥
गोविंदलक्ष्मीधरतत्त्वकारा आचार्यचूडामणिनाचभट्टः ।
वाक्यानि चैषां सुविमृश्य कुर्मो ग्रंथं विवादार्णवभंजनाख्यं ॥ ३ ॥
इह वाच्यानि वर्णादेः सृष्टिर्वर्णस्य वृत्तयः ।
राजप्रशंसा तच्छत्रमंत्रिदूतादिलक्षणं ॥ ४ ॥

अंते खंडितं ।

DD. No. 562. *Nirṇayâmṛita.*

निर्णयामृतं ।

आद्यं ।

कारणमेकं जगतां वारणमास्येन वा(ता *v. l.*)रणं विपदां ।
किमपि महो महनीयं प्रत्यूहव्यूहवारणं वंदे ॥ १ ॥ २ । ३ । ४ । ५ ॥
जयंति भूमाविह बा(चा)हुबाणाः क्षितीश्वरा विश्रुतबाहुबाणाः ।
प्रकुर्वते ये विशदा यशोभिर्जगत्समग्रं चस(वश)दायशोभिः(भि) ॥ ६ ॥
बभूव भूपस्त्रिदशैः सरूपस्तदन्ववाये बलवान्सरूपः ।
चकार नित्यं च (न्व?) समाहितानां परिश्र(क्ष)यं यः परमाहितानां ॥ ७ ॥

तस्यात्मजन्माजनि कर्णदेवस्त्यागेन यो विश्रुतकर्णदेवः ।
वपुःश्रिया निर्जितकामदेवः सदासमाराधितवामदेवः ॥ ८ ॥
तदात्मभूरूद्धरणः क्षितींद्रः कृतींद्रभोगद्रिनिभानुभावः ।
स्वकीर्तिवल्लीप्रभवालवालस्थली च ढिल्ली नगरीमतल्ली ॥ ९ ॥
भल्लीशतप्रोतशकेशकुंभीकुंभास्रनीरैः समसिं(से)चि येन ।
शुभावदातायतकीर्ति[रार्ति]हरः सतां श्रीपतिमूर्तिरासीत् ॥ १० ॥
प्रस(व्यv. l.)क्तमुक्तामयहेमकुंभमुक्ताद्य(व्यv. l.)मुक्तागणपोषशक्ताः ।
रक्तासवैः संयति के(ये)न काली व्यालीढविश्वाप्यभितर्प्यतेस्म ॥ ११ ॥
उद्धरणं शुद्धरणं मुद्धरणं विद्विषां समुद्धरणं ।
सुहृदां पुरातनत्दृदां(?)नमतितमां को ननाम तमनामः (?) ॥ १२ ॥
सौंदर्येण विजृंभता रतिपतिः शौर्येण च श्रीपतिः
गांभीर्येण सरित्पतिर्विलसता धैर्येण भूभृत्पतिः ।
सत्कांत्योडुपतिः श्रिया धनपतिर्यस्यौ(स्स्वौ?)जसाहर्पति-
स्तेनार्थो(र्यो v. l.) द्धरणेश्वरेण सुमतिः स्पर्धेत कः क्ष्मापतिः ॥ १४ ॥
असावसावाहितसत्प्रभावः स्वसंनिवेशोचितरम्यदेशं ।
अध्यास्त ऋद्धयास्तसमस्तशत्रास्पदं पुरं सादरमेकवक्त्रं ॥ १५ ॥

राजते यत्पुरं रम्यं राजमंडलमंडितं ।
कमलोल्लासिसद्रत्नरत्नाकरविभूतिमत् ॥ १६ ॥
लसद्विलासिनीसिंजन्नूपुरं भाति तत्पुरं ।
पुरं पुरंदरस्येव भूरिसुंदरमंदिरं ॥ १७ ॥

यस्योपकंठे शितिकंठकंठस्पर्धिप्रभा भानुसुता वहंती ।
तदुच्चवेदध्वनिसंनिकर्षादभ्यस्यतीवाखिलपावनत्वं ॥ १८ ॥
यत्रानिशं सत्रकृतः पवित्राः सत्रा स्वगोत्रे गृहिणो वसंति ।
यद्धोमधूमः कुरुतेतिभूमा घनाघनैर्मेदुरमंतरिक्षं ॥ १९ ॥
यैत्सौधजालेषु निविश्य रात्रौ तद्वासधूपैः पृथुलीकृतांगः ।
निर्याणनिर्यत्नतया भजंते नीलांबुदा नीलशिलाविलासं ॥ २० ॥
यदुच्चसौधध्वजजालचेलजातानिलैर्होलिहयाः सलीलं ।
विश्रांतिमश्रांतमितः श्रयंतः कुतोपि न श्रांतिमवाप्नुवंति ॥ २१ ॥
प्रत्याशमापूरितयाचकाशं मान्यं वदान्यान्वयमत्र वीक्ष्य ।
वृंदारकाणां त्रिदिवेपि वृंदैर्मंदारकाणां वसतिर्विगीता ॥ २२ ॥
पुरं शशांकेव पुरंदराभस्तदेकचक्रारव्यमनेकचक्रः ।
असंख्यसंख्यारिजयोर्जिताख्याविख्यासुयेनो (तशुष्मो v. l.) द्धरणक्षितीशः ॥ २३ ॥

स(अ v. l.)मुद्रैरपि यः सप्तसमुद्रैः संयुतां (मुद्रितां v. l.) महीं ।
पालयंस्तन्महीपालः पुरालंकुरुते पुरं ॥ २४ ॥
गुणरत्नाकराच्चंद्रश्चंद्रसेनस्ततोभवत् ।
महामहा महादेवशालिमौलिविभूषणः ॥ २५ ॥

यस्य विश्वोपकाराय दातुमभ्युदिते करे ।
शशंके धनदः स्वैरं चकंपे कनकाचलः ॥ २६ ॥
अमनोवृत्तिगम्येन यस्य दानेन दीव्यता ।
अर्थिप्रत्यर्थिनोप्युच्चैः प्रापुरेव न दुर्गतिं ॥ २७ ॥
यस्य विश्राणनस्योच्चैःश्रवणेन रणस्य च ।
सुराः सुरालयं स्वल्पमनल्पमपि मेनिरे ॥ २८ ॥

यस्य घाटीषु घोटानां प्रखरं(प्रसरत् v. l.) खुरजं रजः ।
चकाराच्छिन्नगगनं दुर्दिनं रिपुमंदिरे ॥ २९ ॥

तस्यात्मजोभूच्चरिता(त्मजन्मा चरिता v. l.)र्थजन्मा श्रीसूर्यसेनो जयति क्षितींद्रः ।
सुदर्शनेनैव बिभर्ति गोपा नारायणत्वं भुवि यः प्रसिद्धं ॥ ३० ॥
संतानशोभमानः कविगुरुबुधमित्रमंगलैः सहितः ।
जिष्णुर्य एष व्यक्तं श्रितशतकोटिः सुधर्माढ्यः ॥ ३१ ॥

यस्मिन् धारयति क्षोणीमेणीदृक्चित्तहारिणि ।
शेषेपि फणिनामीशे न विशेषधियो वयं ॥ ३२ ॥
ददतो यस्य पाणिस्थपरिहार्यस्वनच्छलात् ।
रमा रौतीव सततं राजा वितरतीति मां ॥ ३३ ॥

द्विषोस्य पत्रावलिभिः परिधानं प्रकुर्वते ।
तद्योषितां ततो मन्ये तच्छून्यास्तनमंडलाः ॥ ३४ ॥
विबुधान्नंदयन् सर्वान् राजा वसुभिरूर्जितैः ।
कथं मौलौ महेशानां न पदं कुरुते सदा ॥ ३५ ॥

निहत्य शत्रूनखिलांस्तदीया देशाः सदावग्रहखिन्नवर्षाः(वेशाः v. l.) ।
तदंगनानां घननादयुक्तैः(मुक्तैv. l)र्नेत्राश्च(त्रांबु)भिर्येन कृताः सवर्षाः ॥ ३६ ॥

समुद्यते यस्य करे प्रदातुमालोक्यते ह्यत्र महाद्भुतं ।
वनीपकाना मवनीपकत्वं वनीपकत्वं त्ववनीपकानां ॥ ३७ ॥
जलेन दिव्येन सदाभिषिक्ताः सिंहासनाध्याश्रयिणो निरस्ताः ।
श्रीसूर्यसेनेन वनोपि राज्यं कांतातपत्राः कलयंत्यमित्राः ॥ ३८ ॥
यत्कीर्तिश्चारिकार्ति कार्तिकशशिश्वेतेयमन्यादृशं
धातुः सर्गनिसर्गमत्र कुतुकं स्पर्शादमुष्या यतः ।

कैलासांते नगा बलंति मनुजाः क्षीरार्णवंत्यर्णवा-
श्चक्रांगंति खगा हरंति च सुराः शेषंति सर्वेहयः ॥३९॥
चकास्ति यस्यातिनलप्रतापः प्रासपसेनोवरजः प्रसिद्धः ।
भक्त्याभिरामस्य सदाग्रजस्य यो लक्ष्मणाकारमुपैति भद्रं ॥ ४० ॥
औदार्यसौंदर्यदयानयज्ञो?विज्ञानशौर्यादिगुणेषु नान्यं ।
प्रतापसेनस्य समं समंताल्लोके विलोकेत्र विचित्रलोके ॥ ४१ ॥
श्रीदेवसेनस्तनयोपि गोपीनारायणेना(यणस्या *v. l.*)जनि कामरूपः ।
लब्धप्रसादेन महेश्वरस्य रामारतिस्तुष्टिमुपैति यत्र ॥ ४२ ॥
देवसेनकुमारस्य प्रतिभाति न चांतरं (कुमारस्य च नांतरं *v. l.*) ।
आर्यानंदकृतो नित्यं बिभ्राणः (भ्रतः *v. l.*) शक्तिमुत्तमां ॥ ४३ ॥
श्रीसूर्यसेनः पुरमेकचक्रं वरांगमध्यास्य जयत्यजस्रं ।
यमेत्य कांतं जितनाककांतं गुर्वीयमुर्वीं च सदोर्वरास्ते ॥ ४४ ॥
विद्वत्सु सत्स्वपि महत्सु समाश्रितेषु
श्रीसिद्धलक्ष्मणसुतः सुतराममुष्य ।
श्रीसूर्यसेननृपतेर्निज(रुरु *v. l.*)तेजसोभू-
दल्लाडनाथमतिमानतिमानपात्रं ॥ ४५ ॥
एनं कदापि सुमनाः सुमतिः सुधाम्ना(सुमतिर्नृपतिः स्वनाम्ना *v. l.*)
श्रौतादिकर्मसु सकालविनिर्णयाय ।
आदिक्षदृक्षपतिभव्ययशा निशात-
शस्त्राहताहितशतः शतमन्युकल्पः ॥ ४६ ॥
अगाधग्रंथपाथोधिमथालोड्य मया धिया ।
समुद्धृतं नृपादेशात्तेनेदं निर्णयामृतं ॥ ४७ ॥
मनुस्मृतिं विष्णुपराशरापस्तंबस्मृतीर्वीक्ष्य मिताक्षरां च ।
तथापरार्कोर्णवपारिजातान् स्मृत्यर्थसारं स्मृतिचंद्रिकां च ॥ ४८ ॥
मात्स्यं कौर्मं च वाराहं दृष्ट्वा वैष्णववामने ।
मार्कंडेयपुराणं च भविष्योत्तरभारते ॥ ४९ ॥
परिशिष्टं हेमाद्रेरनंतभट्टीयगृह्यपरिशिष्टे ।
कालादर्शं चिंतामणिं त्रिदंडीं च कृत्यकल्पतरुं ॥ ५० ॥
धवलपुराणसमुच्चयदुर्गोत्सवरामकौतुकानि तथा ।
संवत्सरप्रदीपं सभोजराजीयदेवदासीयं ॥ ५१ ॥
रूपनारायणीयं विद्यावेद(भट्ट *v. l.*) पद्धतिं चित्रां (विततां *v. l.*) ।
वीक्ष्य महादेवीयं शुभं निबंधं च विश्वरूपकृतं ॥ ५२ ॥

श्रीसूर्यसेननृपतेरादेशात्सिद्धलक्ष्मणतनूजः ।
अल्लाडनाथसूरिः संग्रहमिह कालनिर्णये कृतवान् ॥ ९३ ॥

इति ग्रंथावतारः ॥

EE. No. 553. *Dânavâkyâvalî.*

दानवाक्यावली।

वंदे मुकुंदस्य पदारविंदं वंदारुवृंदारकवृंदवंद्यं ।
मंदाकिनी यन्मकरंदबिंदुसंदोहसंदेहधि---- ॥ १ ॥
त्रैलोक्याधिपतेः पदत्रयभुवं दैत्याधिपं याचतो
दत्तां सत्त्वमयेन तेन वसुधामेवाग्रतो गृह्णतः ।
देवार्थे बलिनं बलिं छलयतो --हरेस्तुष्यतः
स्वाराज्यप्रतिभूभविष्णु सपदि स्वस्त्यक्षरं पातु वः ॥ २ ॥
श्रीकामेश्वरराजपंडितकुलालंकारसारः श्रिया-
मावासो नरसिंहदेवमिथिलाभूमंडलाखंडलः ।
दृप्यद्दुर्धरवैरिदर्पदलनो भूदर्पनारायणो
विख्यातः कुमुदेंदुकुंदधवलः-- द्यशोमंडलः ॥ ३ ॥
तस्योदारगुणाश्रयस्य मिथिलाक्ष्मापालचूडामणेः
श्रीमद्धीरमतिः प्रिया विजयते भूमंडलालंकृतिः ।
दाने कल्पलतेव चारुचरिते यारुंधतीव स्थिरा
या लक्ष्मीरिव वैभवे गुणगणैर्गौरीव या गण्यते ॥ ४ ॥
वापी पुण्यजलाधिकासि(शि?)विमला विज्ञानवापीसमा
रम्यं तीर्थनिवासि वासभवनं चैद्राभमभ्रंलिहं ।
उद्यानं फलपुष्पनम्रविटपच्छायाभिरानंदितं
भिक्षुभ्यः सरसान्नदानमनघं यस्या भवान्या इव ॥ ५ ॥
लक्ष्मीभाजः कृतार्थानकृत सुमनसो या महादानहेम-
ग्रामै राजीवराजीवहलतरपरागाप्तरागैस्तडागैः ।
विज्ञानज्ञाप्य विद्यापतिमतिकृतिनं सप्रमाणामुदारा
पुण्या लोकाद्यराज्ञी विरचयतितरां दानवाक्यावलीं सा ॥ ६ ॥

अंते ।

निबंधान्सम्यगालोच्य श्रीविद्यापतिसूरिणा ।
दानवाक्यावली देव्याः प्रमाणैर्विमलीकृता ॥ २ ॥
इति समस्तप्रक्रियाविराजमानदानदलितकल्पलताभिमानमहादेवीश्रीधीरमतिविरचिता दा
नवाक्यावली समाप्ता संवत् १९३९ शाके १४०४ समये पौष शुदि पंचमी रविवासरे ॥

FF. No. 612. *Saṁskâranirṇaya.*

संस्कारनिर्णयः । आद्यं खंडितं ।

अंते ।

अस्ति श्रीहरिवंशवर्मनृपतिर्मंगोनृपस्यात्मजो
माहेंद्रान्वयमौलिभूषणमणिः संकल्पचिंतामणिः ।
निर्बंधेन निबंधराजमसृजत्तत्कीर्तिबंधोज्ज्वलं
तस्याज्ञामनु नंदपंडित इमं धर्माधिकारी भुवः ॥ १ ॥
सिद्धानां वचसां निबंधविहितव्याख्यावतां संग्रहे
किं कष्टं विदुषामति प्रतिसभं जल्पंत्यनल्पं तु ये ।
तेषामुत्तरमेतदेव जलधौ सिद्धानि रत्नानि तैः
कृत्वा हारमुदारमात्मनि न वा किं यच्छथ स्वेच्छया ॥ २ ॥
इतिश्रीमद्धर्माधिकारिरामपंडितात्मजनंदपंडितकृते स्मि(स्मृ)तिसिंधौ संस्कारानिर्णयतरंगः॥

GG. No. 502. *Âchâradinakaroddyota.*

आचारदिनकरोद्द्योतः । आद्यं ।

सारं यच्छ्रुतिशिरसामगोचरं यन्मनोवचसां ।
तत्कौशल्यावचसां शिक्षापात्रं महो वंदे ॥ १ ॥
मीमांसार्णवकर्णधारचतुरः श्रीभट्टनारायण–
स्तद्वंशस्य करीरतां भजति यो विश्वेश्वरारव्यः कृती ।
गागाभट्ट इति प्रथां दिनकरात्प्राप्तः पितुर्लालना–
त्तेनाचारनिबंधनो दिनकरोद्द्योतो धुनापूर्यते ॥ २ ॥

अंते ।

इति श्रीमद्विद्वन्मुकुटमाणिक्यमरीचिपंजरितपदद्वंद्वारविंदश्रीमन्नारायणभट्टसूरिसूनुश्रीमद्रामकृष्णभट्टात्मजभट्टदिनकरात्मजेन गागाभट्टापरनामकाविश्वंभ(श्वेश्व)रभट्टपूरिते दिनकरोद्द्योते आचारकांडं समाप्तं ।

HH. No. 503. *Áhnika from Áchârapradîpa.*

आचारप्रदीप आह्निकं । आद्यं ।

विश्वनाथं भवानीशं ढुंढिराजं च भैरवं ।
श्रीमाधवं दंडपाणिं काशीं गंगां नमाम्यहं ॥ १ ॥
आरंभितस्य कार्यस्य सिद्धौ विघ्नापनुत्तये ॥
दूरीभवंति दुरितान्यपयांति तापाः प्रादुर्भवंति विभवा परमाश्च हृद्याः ।
संपद्यते विविधसंपदपैति मोहः श्रीरामचंद्रपदपद्मनमस्क्रियातः ॥ २ ॥
रामं कुलपतिं नत्वा पुंडरीकात्मजं गुरुं ।
आह्निकस्य प्रयोगस्य विधिं च प्रवदाम्यहं ॥ ३ ॥

नानानिबंधपाथोधौ संनिमग्नमितस्ततः ।
आचारवाक्यरत्नानां समुद्धृत्य कदंबकं ॥ ४ ॥
तदेव भूषणं कृत्वा स्वाचारासक्तचेतसां ।
विदुषां कंठभूषायै ददाति कमलाकरः ॥ ५ ॥
अंते ।
ग्रामे कूर्परसंज्ञके क्षितितले यत्रास्ति शुक्लेश्वरो
गोदा पश्चिमवाहिनी विजयते यावत्कचेशेश्वरः ।
तत्रत्यो कमलाकरः स्वसुकृतादागत्य काश्यां स्थिता (तः)
तत्रेदं कृतवान्सतामुपकृते विश्वेश्वरानुग्रहात् ॥ २ ॥इच० ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥
इत्याचारपदीपनिबंधे आह्निकं समाप्तिं [म] गमत् ॥

II. No. 529. *Kuṇḍamaṇḍapasiddhi.*

कुंडमंडपसिद्धिः । अंते ।
इतिमंडपकुंडसिद्धिमेनां रुचिरां विठ्ठलदीक्षितो व्यधत्त ।
अधिकाशिनगर्युमेशतुष्टयै विबुधः शोधयतादिमां विचार्य ॥ ६० ॥
शशियुगतिथिगण्यें याति शाके वरेण्ये विभवशरादि रम्ये मासि शस्ये तपस्ये ।
शशधरभृति दक्षेमुष्य पक्षे वलक्षे कमलनयनतिथ्यां भानुमद्वारवत्यां ॥ ६१ ॥
ग्रंथे परोक्ते मम दूषणोक्त्या किंवा गुणोक्त्या विदुषा विचार्य ।
ग्रंथे मदुक्ते सदसद्विशोध्यं सर्वस्तु सर्वं न हि वेद कश्चित् ॥ ६२ ॥
अंगीकार्या मत्कृतिर्निस्तुषेयं कस्मादेवं पंडितान्प्रार्थयेहं ।
क्षीरं पेयं नीरमेतद्विहाय को वा हंसं विज्ञमज्ञोर्थयेत ॥ ६३ ॥
इतिश्रीविठ्ठलदीक्षितविरचितकुंडमंडपसिद्धिः सटीका समाप्ता ।
व्योमांकमेदिनिपराधिपगण्यशाकेब्दे सर्वधारिणि नभोधवले शिवस्य ।
तिथ्यां खेरहनि विठ्ठलश्रोत्रियोसौ पुस्तं ररास किल मंडपकुंडसिद्धेः ॥ १ ॥

JJ. No. 599. *Vratarāja.*

व्रतराजः । आद्यं ।
ओंकारविघ्नेशगुरून्सरस्वतीं गौरीशसूर्यौ च हरिं च भैरवं ।
प्रणम्य देवान्कुरुते हि ग्रंथं दैवज्ञशर्मा जगतो हिताय ॥ १ ॥ २ । ३ । ४ । ५ ॥
रामांकमुनिभूसंख्ये १७९३ वत्सिध्वंगेंदुसंख्यके ।
वर्षे शाके शुक्लपक्षे पंचम्यां तपसः शुभे ॥ ६ ॥ ७ ॥
चित्तपावनजातीयशांडिल्यकुलमंडनः ।
गोपालात्मजदैवज्ञसंगमेश्वरसंज्ञितः ॥ ८ ॥
दुर्गाघाटे वसन्काश्यां नत्वा पितृपितामहान् ।
कुर्वे वै विश्वनाथोहं व्रतराजं सुविस्तरं ॥ ९ ॥

अंते ।

इति ब्रह्मांडपुराणे लक्षपूजाव्रतोद्यापनं संपूर्णं ।

KK. No. 507. *Áśauchanirṇaya.*

आशौचनिर्णय : ।

कृत्स्नक्ष्मातलवार्तिपंडितजनालंकारचूडामणि-
र्गोदातीरजनिर्गुणोच्चयखनिर्नाम्नापदेवोग्रणीः ।
तत्सूनोरिह जीवदेवकृतिनः सद्धर्मशास्त्रे कृता-
वाशौचस्य विनिर्णयोयमभवच्छ्रीकृष्णसंतुष्टये ॥

इति श्रीमत्सकलभूमंडलमंडनायमानश्रीमद्विद्वद्वर्यापदेवसुतजीवदेवकृतिकौस्तुभे आशौच-दीधितिः समाप्तः ।

LL. No. 575. *Pratishṭhâdarpaṇa.*

प्रतिष्ठादर्पणं ।

आदौ ।

श्रीमद्गोपालपितरं नारायणपितामहं ।
नत्वा च शितिकंठाख्यं गुरुं वेदविदां वरं ॥ १ ॥
सर्वग्रंथान्समालोक्य पौर्वापर्यानुसारत : ।
प्रतिष्ठा सर्वदेवानां पद्मनाभेन रच्यते ॥ २ ॥

अंते ।

श्रीनारायणात्मजगोपालसूनुपद्मनाभविरचिते प्रयोगप्रतिष्ठादर्पणे सर्वदेवप्रतिष्ठाप्रयोगः । इत्यचलार्चा शके १७०६ क्रोधिनामाब्दे आश्विनकृष्ण एकादश्यां ।

No. 576. *Prayogadarpaṇa.*

प्रयोगदर्पणं ।

आद्यं ।

यो वंद्यस्त्रिदशैः सदैव यमिनां ध्येयः सदा योगिभि-
र्यो विघ्नौघविनाशनेष्यतिदृढो भाग्यप्रदः सेविनां ।
यो विश्वार्तिहरस्तथैव सुखदः साहित्यविद्यानिधि-
स्तं वंदे गिरिजात्मजं गणपतिं वाक्सिद्धये सर्वदा ॥ १ ॥
वंदे श्रीवैष्णवीं मूर्तिं मोहिनीं कुलदेवतां ।
प्रवरायास्तटे रम्ये निवासपुरवासिनीं ॥ २ ॥
श्रीमद्गोपालपितरं नारायणपितामहं ।
गुरुं श्रीशितिकंठाख्यं पार्वतीं चैव मातरं ॥ ३ ॥

नाम्ना वै पद्मनाभस्तु दीक्षितः श्रीदयान्वित :।
नानाग्रंथान्समालोक्य विदुषां प्रीतिहेतवे ॥ ४ ॥
रम्यां नवीनां सुगमां नानावाक्यसुधामयीं।
प्रयोगदर्पणाख्यां वै चक्रे पद्धतिमुत्तमां ॥ ९ ॥

अंते खंडितं।

MM. No. 577. *Prayogapaddhati.*

प्रयोगपद्धति :।

आद्यं।

महादेवमहं वंदे गुहतातमहर्निशं।
सहायं महतां शश्वदहार्यदुहितुः पतिं ॥ १ ॥
महागणपतिं वंदे गुहाग्रजमनार्चितं।
अहार्यतनयानंदं सहायमसक्तत्सती (?) ॥ २ ॥
पेंजल्लमंचनाचार्यसुनो झिंगयकोविदः।
प्रयोगपद्धतिं चक्रे मंत्रपूर्वक्रियोत्तरां ॥ ३ ॥

अंते खंडिता।

NN. No. 71. *Commentary on the Kirâtârjunîya.*

किरातार्जुनीयटीका।

आदौ।

श्रीनोनराजतनयः कुरुचि(जि)चरित्रे पर्याय[मात्र]मभिधास्यति जोनराजः।
किं नाम नामलमणिप्रगुणांस्तडाको [व्या] कोशयत्युदधिवत्तरलांस्तरङ्गान्॥
श्रीजैनोल्लाह(भ)देनस्य साम्रा[ज्ये] जोनको द्विजः।
खर्षिविश्वामिते शाके यथामति यतिष्यते॥

षोडशसर्गांते।

इतिश्रीलौलराजसुतपण्डितनोनराजसूनुपण्डितवरजोनराजकृतायां किरातार्जुनीयटीकायां षोडशस्सर्गः।

अंते।

काश्मीरिकेन कविना क्रियते प्रकाशवर्षेण हर्षतनयेन किरातटीका।
मात्सर्यजिह्मगदरुद्धवचःप्रवृत्तिः संमंस्यते स्फुटमिमां हृदयेन लोकः॥
(?) कार्यैयैव वचनस्य वैदुषी ज्ञायते न न कृतश्रमा नृणाम्।
(?) दर्शनप्तरकृतावतारणैस्तत्मुखाच्छ्रुतलवप्रकाशनम्॥

जनानां मात्सर्यं किमिदमथवाज्ञातमहिमा
गुणेषु प्रद्वेष [:] किमिति किमुतार्थत्व (?) विरह : ।
यदस्मिन्नः क्लेशे विजन इव नृत्तोत्सवविधौ
सदित्युच्चैरारादसदपि न केनाप्यभिहितम् ॥ ९० ॥
इति किरातार्जुनीयटीकायामष्टादशः सर्गः १८ समाप्तमिदं किरातार्जुनीयं नाम महाकाव्यम् कृतिर्भीरवस्येति भद्रम् ।

OO. No. 86. *Vishṇubhaktikalpalatâ.*

विष्णुभक्तिकल्पलताया अष्टमस्तबकः ।

आदौ ।

अथ विष्णुविज्ञप्तिवर्णनं नाम खष्ट (माष्टम?) स्तबकमारभ्यते ।

अंते ।

इति श्रीपुरुषोत्तमकविकृतविष्णुभक्तिकल्पलतायाष्टीकायां . मा(म)हेश्वरविरचितायामामोदसमाख्यायां चित्तप्रबोधनामाष्टमः स्तबकः । अथ विवरणनिर्माणकालः

श्रीमद्बूवलयानुरंजनलसत्कीर्तेर्नृपाद्विक्रमा-
ज्जातेश्वां(श्वां)बुधिरागभूमिगणितेब्दे मार्गशीर्षेर्जुने ।
पक्षे मुख्यजयातिथौ सुरगुरु (रौ?) वारे विरूपाक्षभू-
निर्मातिस्म महेश्वरो गुरुकृपष्टीकामिमां सुंदरां ॥

संवत् १६९७ श० १५३३ प्र । जे(ज्ये)ष्ठशुदि ९ गुरौ लिखितं ॥

PP. No. 96. *Hanumannâṭaka with a Commentary.*

हनुमन्नाटकं सटीकं । तत्र टीकादौ ।

शृंगारी क्षितिजामुख (खे?) सकरुणोऽहल्यासु वीरः खरे
बीभत्सु(त्स)श्च जये शरैश्च भयकृद्बुद्धाब्धिरत्यद्भुतः ।
रौद्रो रावणमर्दने कपिसहौ(हो) हासः सुशांतो गुरौ
भक्तः सर्वरसात्मको रघुपतिर्वैवेति सर्वोपरि ॥ १ ॥
प्रस्तारा अपि पत्नीत्वं यांति वारि तरंति च ।
यत्कृपाचंद्रिकास्पर्शाद्रामचंद्रं नतोस्मि तं ॥ २ ॥
स्वाराम राम रजनीचरदुर्वणानां कल्पांतपावक निजोत्तमनामधेयं ।
नाथ त्वदंघ्रिसरसीरुहषट्पदानां यस्माद्भयं नु तमपाकुरु (?) नस्ततो द्राक् ॥ ३ ॥
रामायणमयीं नावं संसारार्णवतारिणीं ।
यश्चकार मुनिः सम्यक्तस्मै वाल्मीकये नमः ॥ ४ ॥

आसीच्छ्रीकृष्णदत्तः सकलगुणनिधिर्वादिनागेंद्रसिंहं(हस्)
तत्पुत्रः काशी(शि?)नाथः समजनि बलभद्राभिधस्तत्तनूजः ।
नत्वा श्रीरामभद्रं निखिलगुणनिधिं श्रीपतेः प्रीणनाय
व्याचष्टे नाटकं श्रीसकलबुधजना(नाः or नैः)क्षम्यतां धाष्टर्यमेतत् ॥ ९ ॥

अंते टीकायाः ।

योगी(गि?)जनप्रियस्यापि स्तवो येन विनिर्मितः ।
तत्कृता दीपिका चेयं चकास्तु महतां हृदि ॥ १ ॥
कीर्तिर्ब्रह्मांडखंडे प्रचरतु सततं भक्तिसत्पक्षयुक्ता
ज्ञानैजा(नेना?) लं स्फुरतु हृदि परं सच्चिदानंदरूपं ।
स्वस्ति स्याद्रोद्विजे[म्यो?]मधुकरनृपतेर्मंडलेऽखंडलश्री(क्ष्मी?)- ।
रायुः पुष्टिश्च देहे रिपुषु सविजयं राजराजत्वमस्तु ॥ २ ॥
श्रीकृष्णदत्तपदपंकजषट्पदस्य
श्रीकाशिनाथतनयस्य सनादजातेः ।
श्रीकुंभवारिधिविधोर्बलभद्रकस्य
व्याख्या मुदेस्तु रघुनाथपरायणानां ॥ ३ ॥
एतद्विचारसंतुष्टसूरिसंमोदसंभवात् ।
सुकृताच्छ्रीपतिः प्रीतिं प्रयातु प्रणतप्रियः ॥ ४ ॥
श्रीकृष्ण[:] क्षम्यतां — — भूदेवश्च सतां सुहृत् ।
कालातिपाताद्ग्रंथस्य यदघं मेऽस्थिरात्मनः ॥ ५ ॥
वस्वग्निरसचंद्रैश्च गणिते व्ययवत्सरे ।
सिद्धेया(द्धेयं?) चैत्रशुक्लस्य श्रीरामनवमीदिने ॥

इति श्रीमत्सनादाककुलकुमुदिनीकांतदांतरुक्मिणीहृदयानंदनेन श्रीबलभद्रेण विरचितायां श्रीहनुमन्नाटकदीपिकायां पंचदशः प्रकाशः ।

सिद्ध्याकाशवसुद्विजेंद्रगनेते(गणिते) मार्गोविषे वत्सरे
हेमंतर्तुप्येतेऽलिंगे (?)दिनकरे मासे व[ल]क्ष(क्षे) दले ।
वारे वार्धिसुतात्मजे भवतिद्वौ(थौ) मे कृत्तिकायां शुभे
श्रीमद्रामचरित्रचित्रितमिदं चालेख्य साधोर्मुदे (?) ॥ ६ ॥

QQ. No. 85. *Vidvadbhûshaṇaṭîkâ.*

विद्वद्भूषणटीका ।

जंबूद्वीपावतंसप्रभमतिरुचिरं सूरजातीरभूमा-
वंतर्वेद्यां प्रसिद्धं जगति विजयते सत्पुरं गोकुलाख्यं ।
यत्र श्रीकृष्णसेवाप्रमुदितमतयो वेदशास्त्रैकनिष्ठाः

श्रौतस्मार्तक्रियाभिर्विमलतमधियो भूमिदेवा वसंति ॥ ९ ॥
तत्रायं समभूद्ग्रंथो बालकृष्णसुधीकृतः ।
तट्टीकापि कृतात्रैव मधुसूदनशर्मणा ॥ १० ॥
विद्वद्भूषणसंज्ञस्य ग्रंथस्यास्यानुवर्त्तिनी ।
प्रियेव राजतां नित्यं व्याख्येयं मंजुभाषिणी ॥ ११ ॥
श्रीमत्पंचनदान्वयांबुधिविधुस्तैलिंगविप्रार्थितो ।
जात[:] श्रीनरसिंह इत्यजनि यस्तस्माद्बुधो माधवः ।
तत्सूनुर्मधुसूदनो गुरुकृतौ व्याख्यामिमां यां व्यधात्
सेयं मूलविभूषिता विजयतामर्कंदुतारावधि ॥ १२ ॥
विद्वद्भूषणसंज्ञेत्र ग्रंथे संख्या ह्यनुष्टभां ।
अष्टापंचाशदधिका शतयोर्द्वितयी कृता ॥ १३ ॥
संख्या तु मंजुभाषिण्यां श्लोकानामिह निश्चिता ।
सहस्राद्वितया(यी) चैव चतुःसप्ततिसंयुता ॥ १४ ॥
समूलटीकासंख्या तु द्वे सहस्रे अनुष्टुभां ।
शतत्रयं च द्वात्रिंशदिति ज्ञेयं विचक्षणैः ॥ १५ ॥
बिंदुद्वयार्ध(यार्धि)धरणी १७०० प्रमितेत्रवर्षे मासे शुचितपक्षमनो (?) ।
वार(रे)रवेरिदम – – – – – – –ग्रंथोद्भुतः कृताधियां परितोषहेतुः ॥

इतिश्रीमदात्रेयबालकृष्णभट्टकृतविद्वद्भूषणग्रंथस्य

संपूर्णा संवत् १७७४ चैत्रमासे दशम्यां पुष्यनक्षत्रे चंद्रो

RR. No. 79. *Prastâvaratnâkarakośa.*

प्रस्तावरत्नाकरे नीतिः ।

आद्यं ।

वंदे तं गणनाथमर्घ्यमनघं दारिद्र्यदावानलं
शुंडादंडविधूय(त?)मानश(स)मलं संसारसिंधोस्तरिं ।
यं नत्वा सुरकोटयः प्रभुवरं सिद्धिं लभंते परां
सिंदूरारुणविग्रहं परिपतद्वारां(द्वानां?)बुधारावृतं ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

अथ कविवंशवर्णनं ।

खारागठे महाराज्ये करणः पुरुषोत्तमः ।
आसीत्प्राज्ञः सतां श्रेष्ठो विख्यातविदः कृती ॥ ५ ॥
अभवंस्तनयास्तस्य चत्वारो भूरितेजसः ।

तेषां ज्येष्ठः कृष्णदासो गुणैः श्रेष्ठस्तु सत्तमः ॥ ६ ॥
तस्यानुजौ महात्मानौ दामोदरना(न)रायणौ ।
कनिष्ठो हरिदासोभूद्विघ्नराजस्य सेवकः ॥ ७ ॥
ज्योतिःशास्त्रबृहत्कथास्मृतिकथाचाणक्यसामुद्रिकान्
ग्रंथाञ्शाकुनपंचतंत्रचरकान्काव्यादिकांश्चापरान् ।
आलोच्य प्रयतं मुदे मतिमतां भीत्यैव दुष्टात्मनां
विज्ञः श्रीहरिदास एष तनुते प्रस्तावरत्नाकरं ॥ ८ ॥ हरिदासस्य ॥
वर्षे वेदरसारसेंदुकलिते माघासिते पंचमी
हस्तार्के वरवीरसाहिनृपतौ श्रीमद्दुदापत्तने ।
पुण्ये नार्मदकोटितीर्थविषये संपूर्णतामागम-
द्विज्ञश्रीपुरुषोत्तमात्मजकृतौ प्रस्तावरत्नाकरः ॥
ततोनुक्रमणिका । ततो राजनीतिः ।

अंते ।

इति श्रीकरणकुलालंकारपुरुषोत्तमसूनुहरिदासविरचिते प्रस्तावरत्नाकरे नीतिः समाप्ता ।

SS. No. 93. *Subhâshitaratnakośa* (*ff. 16--17*).

सुभाषितरत्नकोश :।

श्लेषे केचन शब्दगुंफाविषये केचिद्रसे चापरे-
लंकारे कतिचित्सदर्थविषेय चान्ये क्षमा वर्णके ।
आः सर्वत्र गभीरधीरकवितावींध्याटवीचातुरी-
संचारे कविकुंभिकुंभभिदुरो बाणस्तु पंचाननः ॥ १९ ॥
माघेन विघ्नितोत्साहा नोत्सहंते पदक्रमे ।
स्मरंतो भारवेरेव कवयः कपयो यथा ॥ २० ॥
तावत्कविविहंगानां ध्वनिर्लोकेषु शस्यते ।
यावन्नो विशति श्रोत्रे मयूरमधुरध्वनिः ॥ २१ ॥
निर्माणे यदि मार्मिकोसि नितरामत्यंतपाकद्रव-
न्मृद्वीकामृदुमाधुरीमदपरीहारोद्धुराणां गिरां ।
काव्यं तर्हि सखे सुखेन कथय त्वं संमुखे मादृशां
नो चेदुष्कृतमात्मना कृतमिव स्वांताद्बहिर्मा कृथा : ॥ २२ ॥
विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमा
भूपालाः कमलाविलासमदिरोन्मीलन्मदामूर्छिताः ।
आस्ये धास्याति कस्य लास्यमधुना धन्यस्य कामालस-
स्वर्वामाधरमाधुरीमधरयन्वाचां विपाको मम ॥ २३ ॥

विद्वांसो मत्सरग्रस्ता राजानो मदविह्वलाः ।
अज्ञानोपहताश्चान्ये जीर्णमंगे सुभाषितं ॥ २४ ॥
साहित्यपाथोनिधिमंथनोत्थं कर्णामृतं रक्षत भोः कवींद्राः ।
यत्तस्य दैत्या इव लुंठनाय काव्यार्थचौराः प्रगुणीभवंति ॥ २५ ॥
गृह्णंतु सर्वे यदि वा यथेच्छं नास्ति क्षतिः कापि कवीश्वराणां ।
रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिंधुः ॥ २६ ॥
अनास्वाद्य गौडीमनाराध्य गौरीं विना शब्दचौर्यं विना मंत्रतंत्रं ।
कवित्वं प्रकर्तुं प्रगल्भं समर्थो विरं(रिं)चिप्रपंचे मदन्यः कविः कः ॥ २७ ॥
हे गोदावरि देवि तावकतटोद्देशे कलिंगः कवि-
र्वाग्देवीं बहुदेशदर्शनसखीं त्यक्त्वा विरक्तिं गतः ।
एनामर्णवमध्यसुप्तमुरजिन्नाभीसरोजालयं
ब्रह्माणं गमय क्षितौ कथमसावेकाकिनी स्थास्यति ॥ २८ ॥
किं कवेस्तस्य काव्येन किं कांडेन धनुष्मतः ।
परस्य हृदये लग्नो न घूर्णयति यच्छरः ॥ २९ ॥
कवयति मयि(कवि?)सार्वभौमौ(मे?) कवयंत्यन्येपि किं वयं कुर्मः ।
नृत्यति पिनाकपाणौ नृत्यंत्यन्येपि भूतवेतालाः ॥३०॥
देवीं वाचमुपासते तु बहवः सारं तु सारस्वतं
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः ।
अब्धिर्लंघित एव वानरभटैः किं त्वस्य गंभीरता-
मापातालनिमग्नपीवरतनुर्जानाति मंथाचलः ॥ ३१ ॥
हरिहर परिहर गर्वं कविराजगजांकुशो मदनः ।
मदन विमुद्रय वदनं स्मर हरचरितं पुरातीतं ॥ ३२ ॥
या(जा)ते जगति वाल्मीकौ कविरित्यभवद्ध्वनिः ।
कवी इति ततो व्यासे कवयस्त्वयि दंडिनि ॥ ३३ ॥

TT. No. 103. *Prabodhachandrikâ.*

प्रबोधचंद्रिका ।

आद्यं ।

हरिहरगुरुभक्तः सर्वलोकानुरक्त-
स्त्रिभुवनगतकीर्तिः कांतिकंदर्पमूर्तिः ।
रणरिपुगणकालो वैजलक्ष्मीपालो
जगति जयति दाता सर्वकर्मावधाता ॥ १ ॥

चंद्रावतीवदनचंद्रचकोरचक्र-
मादित्यभूपतनयो नयतंत्रवेत्ता ।
चौहानवंशतिलकः पटनाधिनाथो
राजा परं जयति वैजलदेवनामा ॥ २ ॥
रामो मे विहितं करोतु सततं रामं भजे सादरं
रामेणापहृतं समस्तदुरितं रामाय दत्तं धनुः ।
रामान्मुक्तिरभीप्सिता सरभसं रामस्य दासोस्म्यहं
रामे रंज(रज्य)तु मे मनः करुणया भो राम मां पालय ॥ ॥
श्रीमद्वैजलदेवेन रामभक्तिरतात्मना ।
इति चिंतितमेकांते कदाचिदत्तिपृत(?) सता ॥ ४ ॥

UU. No. 102. *Prakriyâkaumudîprasâda.*

प्रक्रियाकौमुदिप्रसादः ।

आदौ ।

श्रीमद्विट्ठलमेकमव्ययमजं शब्दात्मकं ब्रह्म यः
स्वेच्छातो जगदुद्भवस्थितिलये हेतुः स्वमायागुणैः ।
यच्छ्वासः श्रुतिसंततिव्यवहृतिस्तं पुंडरीकाश्रमे
भक्तानुग्रहहेतुतः स्थितमहं वंदे मुदे संविदे ॥ १ ॥
श्रीशंभुं पाणिनिं श्रीवररुचिमथ वाक्संस्कृतौ दीक्षितं श्री-
शेषं तद्भाष्यहार्दप्रकटनपटुगीःपंडितान्भर्तृमुख्यान् ।
वृत्तिन्यासादिकर्तॄन्स्वमतपरमतख्यापकान्भोजदुर्ग-
क्षीरस्वामिप्रमुख्यान्प्रगुणनति भजे तन्मतज्ञप्तिहेतोः ॥ २ ॥
किं शेषः पाणिनिर्वा वररुचिरथवा सर्वविद्याप्रणेता
शंभुर्भूमावभूद्भूसुरकुलतिलकौध्रप्रदेशेध्र्यवंशे ।
ऋग्वेदी सर्वशास्त्रप्रकटनपटुधीः कृष्णजो रामचंद्रो-
ऽनंताचार्यप्रपौत्रो दिशतु कृतिमतिं मे स कौंडिन्यगोत्रः ॥ ३ ॥
वंदे तं यतिवृंदवंदितपदं श्रीराघवेंद्रादिय-
न्नामाभाति सरस्वतीपरपदं वादींद्रविद्रावकं ।
यो विद्याः समदाच्चतुर्दश मुदा श्रीशेषभाष्यादिकाः
शिष्येभ्यो मयि यत्कृपास्ति सततं सच्छास्त्रसंवित्तये ॥ ४ ॥
लोकेस्मिन्यदुपक्रमं वरिवृतीत्यौदार्यलोकज्ञता-
विद्वत्तोपकृतिक्षमासुजनतावेदोक्तधर्मादरं ।
आचार्यं कृतकालनिर्णयमहाग्रंथार्थसद्दीपिका-

टीकं तं नरसिंहमात्मजनकं वंदे विदां संमतं ॥ ५ ॥
गंभीरार्थां मितोक्त्या कलितसकलसच्छब्दरत्नाकरां श्री-
शेषोक्तन्यायगर्भां स्वपरमतयुतां प्रक्रियाकौमुदीं तां ।
व्याकुर्वन्बुद्धिहीनो यदपि तदपि तत्पुत्रजो रामचंद्रा-
चार्योक्तेः पाठरक्षाकरणगणतया सज्जनैर्नोपहास्यः ॥ ६ ॥
तथा च पंडितंमन्यैः प्रक्षेपैर्मलिनीकृता ।
प्रक्रियाकौमुदी तस्याः प्रसादः क्रियते मया ॥ ७ ॥
स्पष्टत्वात्समुपेक्षितानि कतिचिद्व्याख्यातकल्पत्वतो
रामाचार्यवरैरमूनि विशदं व्याख्यामि सूत्राण्यहं ।
ग्रंथेस्मिन्स्वरसाधनं कतिपयानौणादिकांश्च ब्रुवे
स्थाने तांश्च गणान्यथामति तथा न्यायान्पदैः सूचितान् ॥ ८ ॥
टीकेयं विपुलेति येन विदुषा संक्षिप्यते तस्य नो
लाभः किंतु समी(मा v. l.)हिताः पुनरमी सर्वे विशेषा हताः ।
येनास्माभिरनेकसूरिरचितग्रंथार्थमालोड्य(क्य v. l.) त-
त्सारं मूलगतं विशेष(समस्त v. l.)विदुषां प्रीत्यै प्रकाशीकृतं ॥ ९ ॥

सुबंतांते श्लोकः ।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकांबाप्यजनयदतुलं विट्ठलाचार्यमार्यं ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन्प्रसादे सुविशदमगमंस्तद्धितास्ते समाप्तिं ॥ १ ॥

तिङन्तस्यादौ ।

श्रीविट्ठलं सुरवरं प्रणमामि देवं
कारुण्यसिंधुमखिलानतदत्तबुद्धिम् ।
ईषत्सहासमुखपंकजमात्मभास-
मुत्फुल्ललोचनविलोकननाशिताघं ॥ १ ॥
तिङंतकांडस्य हि कोपि पारं नाज्ञासिषुः शुद्धधियोपि सन्तः ।
तं प्रक्रियाकौमुदमंशमज्ञो व्याख्यानहं स्यामुपहास्य एव ॥ २ ॥
प्रक्षेपकालुष्यनिरासहेतोः प्रसादमस्या विदधे यथावत् ।
इति प्रतिज्ञातमतः करिष्ये व्याख्यां स्वतः सज्जनतोषदात्रीं ॥ ३ ॥

अंते ।

श्रीमद्विट्ठलपादकंजयुगलं वंदे सुरैर्वंदितं
भक्तेभ्यो ह्यभयाव्ययं(वहं?) सुखकरं विज्ञानदं सर्वदं ।

क्षोदीय[:] किल यद्रजोजनितत्वत्पृथ्वीस्थिरातांधरां (?)
या विश्वस्य विधारणेजनि तथा पुष्टो समर्था तथा ॥ १ ॥
वंदे पाणिनिमीश्वरं वररुचिं शेषं तथात्यासुधान् (तथान्यान्बुधान्)
ग्रंथान्ये वदक(विदधुः) परोपकृतये सूत्रादिभाष्यादिकान् ।
पोतैस्तैस्सुतरां तरंति गहनं तं शब्दरत्नाकरं
चित्रं यत्परपारमाप न परो देवो मरुत्वानपि ॥ २ ॥
यस्मिनोदिक (?)धर्मराजमनिशं जागर्ति तद्वैष्णवा-
वा(चा)रातुष्टिनिरूढि? विठ्ठलविभुः सर्वार्थदः सर्वदा ।
ऋग्वेदादिसमस्तशास्त्रनिचयश्रीपंचरत्ना(रात्रा)गम-
व्याख्यानक्षमपूरुषो विजयते वंशोंध्रदेशोद्भवः ॥ ३ ॥
तद्वंशे नररत्ननायकमणिर्जातो विभुक्तांगजो-
नंताचार्य इति त्रिलोकविदितः सर्वज्ञ एवापरः ।
रामस्वामियतींद्रचा(व)र्यविहिताचार्याभिषेकस्तावता (स्ततो)
लक्ष्मीवैदिकी(?) पंचरत्न(रात्र)मकरोद्यो वल्लभानां त्रयं ॥ ४ ॥
तत्सूनुर्निगमागमादिकुशलः स व्यास(न्याय?) वैशेषिक-
व्याकृत्यद्वयजैमिनीयगणितिष्टव्याहतप्रातिपमियः (गणितेष्वव्याहतप्रातिभः) ।
सौदर्शन(?)भाष्यमाख्यदमलं विद्वत्सभासन्निभा(धा?)-
रा(वा?)चार्यो बृहस्पतिः(?)सदाचरणतः साक्षात्कृतः श्रीहरिः ॥ ५ ॥
गोपालाचार्यमुख्याः प्रथितगुणगणास्तस्य पुत्रा अभूवन्
कृष्णाचार्यः कनीयानपि जगति गुणैः श्रेष्ठ आसीद्वरिष्ठैः ।
सद्वेदाद्याः सुविद्याः स्वयमधिवसतिं चक्रुरुत्कर्षहेतोः
तस्माच्छ्रीकृष्ण एवेत्यनुजगदुररं सूरयः शौरिभक्ताः ॥ ६ ॥
तस्मादाचार्यवर्यो हरिहरभजनप्राप्तसंवित्प्रकाशा-
वास्तां ज्येष्ठो नृसिंहो निखिलगुणनिधी रामचंद्रः कनिष्ठः ।
येनानेकप्रबंधाः क्षितिपतिसमितिख्यातविध्वस्तबोधो-
द्बोधार्थं चक्रिरे यैर्भवति हृदि कृते(तैः) कोविदः प्राकृतोपि ॥ ७ ॥
तत्सूनुं सकलेषु शास्त्रनिवहेष्वाचार्यकृष्णानुगुरो (कृष्णाद्गुरो-)
लक्ष्य(लब्ध)ज्ञानविशेषमात्मजनकं श्रीमन्नृसिंहं भजे ।
तत्पूर्वश्च(वं च)कलिप्रलुप्तमखिलं विद्यासमूहं तथा
धर्मं स्थारयितुं क्षितौ समभवद्येनावतारो हरेः॥ ८ ॥
श्रीमद्राघवसंज्ञकं (श्रीमद्राघवसंज्ञकं) यतिवरं वंदे गुरुं संततं
यः सर्वज्ञसमं(मान्) व्यधाद्भुवि नरानात्मीयसेवापरान् ।
वादींद्रान्बहुवादिदर्पशमनाज्जित्वा तथास्थापय-

द्वैतं श्रुतिमूर्धनिर्णयचणो भाषा(ष्या)दिसंस्कारकः ॥९॥
यः शास्त्रलोकव्यवहारविद्याजगत्समग्रं स्ववशं व्यतानीत् ।
तमर्भकं कृष्णगुरोर्ममाभि (नमामि) रामेश्वराचार्यगुरुं गुणाब्धिः (ब्धिं) ॥ १० ॥
श्रीविठ्ठलाचार्यगुरोस्तनूजं सौजन्यभाजं जितवादिराजं ।
अनंतसंज्ञं पदवाक्यविज्ञं प्रमाणचिंतं तमहं नमामि ॥ ११ ॥
श्रीनागनाथं जितवाजिनाथं विद्याधिनाथं वशराजनाथं ।
श्रीकृष्णसूनुं विबुधं नमामि बहुत्रयोगाह्वितगीष्पतीति (?) ॥ १२ ॥
जगन्नाथाश्रमं वंदे यतिवेदांतकोविदं ।
पदवाक्यप्रमाणज्ञं स्वधर्मनिरतं सदा ॥ १३ ॥
श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकांबाप्यजनयदतुलं [विठ्ठलाचार्यमार्यं] ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यारूपं प्रसादं विशदमकरवं विल्वठस्तेन तुष्यात् ॥१४॥

इति प्रक्रियाप्रसादवृत्तिः समाप्ता ॥ संवत् १७१७ आसूसुदि १० (?)दिने बुधवासरे ।

No. 324 of Viśrâmabâg Collection, *Prakriyâkaumudî.*

प्रक्रियाकौमुदी,

श्री स्वस्ति श्री संवत् १९८३ वर्षे शाके १४४८ प्रवर्तमाने भाद्रपदमासे शुक्लपक्षे त्रयोदश्यां तिथौ भौमदिने नंदिगिरौ श्रीरामचंद्राचार्यसुतसुतसुतोलेखि ॥ शुभं भवतु ॥ कल्याणमस्तु ॥

VV. No. 662. *Rasamañjarî with a commentary.*

रसमंजरी सटीका ।

टीकाद्यं ।

प्रेमार्धार्धनिरीक्षणादनुदिनं यश्चुंबनालिंगना-
द्यो दंतक्षतसीत्कृतान्नखपदोल्लेखाद्वियोगाच्च यः ।
यूनोः कोपि परस्परागतसखीसंभाषणाज्जायते
शृंगारः स विभूतये भवतु [वो?] लक्ष्मीनृसिंहाख्ययोः ॥१॥
रदोद्भिन्नपृथ्वीविनिर्यत्फणींद्रस्फुरद्रत्नकांती मणिस्तंभबुद्ध्या ।
पितृभ्यां हि संस्पेरमालोकितो मां कपोलौ विघर्षन्गणेशः पुनातु ॥ २॥
इंद्रादिदेवपरिसेवितपादपद्मां
पद्मासनां विकचपद्मदलायताक्षीं ।
पद्मप्रभां विमलपद्मनिभाननां तां
वागीश्वरीमनुदिनं शरणं प्रपद्ये ॥ ३॥

अज्ञानहिरण्यकशिपोर्दलने साक्षान्नृसिंह एव परः
तमहं शेषमुपासे पितरं श्रीमन्नृसिंहाह्वयं ॥४॥
अतिविषमरसमंजर्या व्याख्यामेतां परोपकाराय ।
तनुते नृसिंहतनयः श्रीमांश्चिंतामणिः शेषः ॥५॥

अंते ।

शेषावतंसः श्रीशेषनृसिंहतनयः सुधीः । यूनां मनोविनोदाय मंजरीव्याकृतिं व्यधात् ॥
इति श्रीपंडितघंटाग्रणीयश्रीमच्छेषवंशालंकारभूतविद्वज्जनवृंदचूडामणिमरीचिपिंजरित-
चरणयुगलकलिशेषावतारश्रीमच्छेषनृसिंहतनयेन श्रीनृसिंहचरणोपासिना ब्रह्मपुरनिवा
सिना श्रीशेषचिंतामणिना निर्मितो रसमंजरीपरिमलः समाप्तः ॥

WW. No. 154 and another Ms., *Yatîndramatadîpikâ.*

यतींद्रमतदीपिका । आद्यं ।

श्रीव्यंकटेशं करिशैलनाथं श्रीदेवराजं घटिकाद्रिसिंहं ।
कृष्णेन साकं यतिराजमीडे स्वप्नेन दृष्टान्मम देशिकेंद्रान् ॥ १ ॥
यतीश्वरं प्रणम्याहं वेदाचार्यं महागुरुं ।
करोमि बालबोधार्थं यतींद्रमतदीपिकां ॥ २ ॥

श्रीमन्नारायण एव चिदचिद्विशिष्टाद्वैततत्त्वं भक्तिप्रपत्तिभ्यां प्रसन्नः स एवोपायः ।
अप्राकृतदेशविशिष्ट एव प्राप्यः । इति वेदांतवाक्यैः प्रतिपादयतां व्यासबोधायनगुहदेव-
भारुचिब्रह्मानंदिद्रवि(मि)डाचार्यश्रीपरांकुशनाथयामुनमुनियतीश्वरप्रभृतीनां मतानुसारेण
बालबोधार्थं वेदांतानुसारिणी यतिपतिमतदीपिकारव्या शारीरकपरिभाषा महाचार्य-
कृपावलंबिना मया यथामति संग्रहेण प्रकाश्यते ॥

अंते ।

एवंद्रवि(मि)डभाष्यं न्यायतत्त्वं सिद्धित्रयश्रीभाष्यदीपसारवेदार्थसंग्रहः(ह)भाष्यविवरणसं-
गतिमाल(ला)षडर्थसंक्षेपश्रुतप्रकाशिकातत्त्वरत्नाकरप्रज्ञापरित्राणप्रमेयसंग्रहन्यायकुलिश-
न्यायसुदर्शनमान(दर्शन *v.l.*) याथात्म्यनिर्णयन्यायसारतत्त्वदीपन(दीप *v.l.*) तत्त्वनिर्णय-
सर्वार्थसिद्धिन्यायपरिशुद्धिन्यायसिद्धांजनपरमतभंगतत्त्वत्रयचुलुकतत्त्वनिरूपणतत्त्वत्रय-
[व्याख्यान *v.l.*] चंडमारुतवेदांतविजयपाराशर्यविजय [यादि *v.l.*] पूर्वाचार्यप्रबंधानुसारेण
ज्ञातव्यार्थान्संगृह्य बालबोधार्थं यतींद्रमतदीपिकाख्यशारीरकपरिभाषायामस्यां ते प्रतिपा-
दिताः । अध्यात्मशास्त्राणां तत्त्वहितपुरुषार्थप्रतिपादकत्वात्तत्सोरस्मिन्नपि प्रकृतिजीवेश्वर-
परिच्छेदैस्तत्त्वस्य निरूपितत्वाद्बुद्धिपरिच्छेद उपायस्य निरूपणान्नित्यविभूतिपरिच्छेद
ईश्वरपरिच्छेदे च पुरुषार्थस्य निरूपणाच्च तत्त्वोपायपुरुषार्था निरूपिता इति निरवद्यं ।
एकं तत्त्वमिति प्रतिपादयंति सूरयः । आत्मानात्मेति विभज्य द्वेधा निरूपयंति ऋषयः ।
श्रुत्यनुसाराद्भोक्तृभोग्यनियंतृरूपतत्त्वत्रयमिति प्रतिपादयंत्याचार्याः । हेयं तस्य निवर्तक

मुपादेयं तस्योपाय इति चतुर्धा विभज्यानुसंधते कोचदाचार्याः । प्राप्यं प्राप्तोपायः फलं विरोधीति पंचधा निरूपयंति कथयंत्यपर देशिकाः [*vl.*] अर्थपंचकमेव संबंधे न साकं षोढा परिगणय्य वर्णयंति त्वन्ये गुरवः[*v. l.*]। एतेषां तत्तद्विभाजकधर्ममादायानुसंधान-मुपपद्यते। वस्तुतस्तु वेदांतानां चिदचिद्विशिष्टाद्वैतमेकमेव ब्रह्मेति तात्पर्यं। अत एव चिदचिद्विशिष्टं ब्रह्मैकमेवेति मत्वा भगवान्बादरायणोथातो ब्रह्मजिज्ञासेत्युपक्रम्य तमेव प्रकारं निरूपितवान्। अतश्चिदचिद्विशिष्टो ब्रह्मशब्दवाच्यो विष्ण्वाख्यः परवासुदेवो नारायण एवैकं तत्त्वमिति विशिष्टाद्वैतवादिनां दर्शनमिति सिद्धं।

इति विविधविचित्रं मानमेयप्रकाशं घनगुरुवरदासेनोक्तमादाय शास्त्रात्।
यतिपतिमतदीपं वेदवेदांतसारं स भवति मतिमान्यः सत्कटाक्षैकलक्ष्यः ॥ १० ॥

इतिश्रीवाधूलकुलतिलकश्रीमन्महाचार्यस्य प्रथमदासेन श्रीमद्वंकटगिरिनाथपदकमल-सेवापरायणस्वामिपुष्करेण गोविंदाचार्यसूनुना श्रीनिवासदासेन विरचितायां यतींद्र-मतदीपिकायामद्रव्यपरिच्छेदो नाम दशमोवतारः ॥ १० ॥

स्वप्ने श्रीव्यंकटेशस्य संनिधौ कृपया स्वयं श्रीगंधाभयहस्तांसः प्रादान्मम महागुरुः ॥ १ ॥

XX. *A Commentary on the Târkikarakshâ.*

तार्किकरक्षाटीका ।

परस्परोपासकभावभाजौ कौचिद्दयालू कलये पुमांसौ ।
ययोरभूदेकतरः कलत्री भूकन्यया भूधरकन्ययान्यः ॥ १ ॥
वाणीं काणभुजीमजीगणदवासं(सा)सीच्च वैयासकी-
मंतस्तंत्रमरंस्त पन्नगगवीगुंफेषु चाजागरीत्।
वाचामाकलयद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥ २ ॥
श्रीमल्लिनाथकविरेष करोति टीकां
वाणीगणेशचरणांबुरुहा[व]लंबी ।
निःशेषकंटकनिराकरणेन नाम्ना
निःकं(ष्कं)टिकां वरदराजनिबंधनस्य ॥ ३ ॥

इह खलु तत्रभवान्कालानुकंपी वरदराजः सकलन्यायशास्त्ररहस्योपादिदित्सया संक्षिप्य स्वविरचिततार्किकरक्षाश्लोकव्याख्यानाय सारसंग्रहं नाम प्रकरणमारभमाणस्तदविघ्नपरि-समाप्तिसंप्रदायाविच्छेदलक्षणफलकाम्यया विशिष्टामिष्टां च देवतामभिवादयते नमामि परमात्मानमिति ॥

No. 184. *Târkikarakshâ.*

तार्किकरक्षा ।

आदौ ।

अथ जातिः । तत्र सामान्यलक्षणसूत्रं । साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिरिति । तदिदं सदुत्तरप्रकरणसमातीतकालोद्भावनाभ्यामतिव्याप्तेरुत्कर्षसमाद्यव्याप्तेश्चालक्षणमुपलक्षणपरमिति मन्वाना भाष्यवार्तिकटीकातात्पर्यपरिशुद्धिकाराः सर्व एव सर्वास्वपि जातिषु समशब्दं प्रयुंजानस्य सूत्रकारस्य तदर्थ एवानुवृत्तत्वाल्लक्षणत्वेन विवक्षित इति व्याचक्षते ।

अंते ।

अपसिद्धांतः सिद्धांतसिद्धावयवन्यूनमधिकं च कथाविच्छेदनिमित्तमित्याचक्षत इति ॥ ७ ॥

न्यायविद्याविदग्धस्य मीमांसापारदृश्वनः ।
इयं वरदराजस्य कृतिर्विजयतेतरां ॥ ७ ॥
आलोड्य दुस्तरतरान्——प्रबंधान्वाचस्पतेरुदयनस्य तथापरेषां ।
सारो मयात्र समगृह्यत वावदूकैर्नित्यं कथासु विजिगीषुभिरेष धार्यः ॥ ७ ॥

इतिश्रीवरदराजमूलसूत्रं संपूर्णं ॥

YY. No. 205. *Lîlâvatîvivaraṇa.*

लीलावतीविवरणं ।

वेदश्रुत्यंगभूवर्षे आश्विने पंचमीबुधे ।
महीदासोऽलिखल्लीलावत्या विवरणं शुभम् ॥

ZZ. No. 198. *Bhâsvatîkaraṇaṭîkâ.*

भास्वतीकरणस्य टीका । आद्यं ।

तन्नमामि क(किं?)मपि प्रतिपत्तेः कारणं महिमहो मिहिराख्यं ।
यत्कृतातिशयशांतमनस्का योगिनो नु कलयंति की(कि)लाद्यं ॥ १ ॥
आसीद्वैद्याधिराजः खलु यमनपुरे श्रीमहाशर्मनामा
तत्पुत्रो भावदासः सकलगुणनिधिः संबभूवाग्रजन्मा ।
यः पूर्वाभ्याससंगादपि सकलपदं धर्ममग्र्यं चरित्वा
शांतिप्रांते प्रयातो हरिचरणमनाः पत्तने शंकरस्य ॥ २ ॥
अनिरुद्धस्तस्य सुतो गुरुजनचरणारविंदकृतसेवः ।
कुरुते बुधोपयुक्तां संक्षिप्तां भास्वतीटीकां ॥ ३ ॥

श्रीहीरस्य तनूजस्य जन्मकालागतानिह ।
ध्रुवकाहर्गणोद्भूतानुदाहरति स स्फुटं ॥ ४ ॥

दुर्जनाबोधजननी सुजनानंदकारिणी ।
चंद्रयुक्तेव रजनी भास्वती शिशुबोधिनी ॥ ९ ॥

* * * उदाहरणं । विक्रम । शाक १९९१ । अस्य संवत्सर इति प्रसिद्धिः । अस्मात्पंचत्रिंशदधिकं शतं प्रपातितं जातं १८१६ ॥ जन्मवर्षे शकाब्दोब्द (यं) ॥

अंते ।

स्वरशशिशकसमेते सकलं(शक)नृपकाले स्व(श्व)युव(ग्व)हुलपक्षे ।
प्रतिपद्युत शनिवारेऽनिरुद्धविदुषा समापिता टीका ॥ १ ॥
खनयनतिथिवत्सरके महति कुले य(ज)न्म मेभवद्विदुषां ।
शशिगुणवर्षेण मया विमला शिशुबोधिनी रचिता ॥
इति श्रीभावशर्मात्मजानिरुद्धविरचितायां शिशुबोधिन्यां भास्वतीटीकायामष्टमोल्लासः ।

AAA. No. 188. *Khaṇḍakhâdyoddharaṇa.*

खंडखाद्योदाहरण आद्यं ।

ॐनमो गुरवे ॐनमो वाग्देव्यै नमः सूर्यादिभ्यो ग्रहेभ्यो नमः ॐ
ॐ प्रणिपत्य महादेवं जगदुत्पत्तिस्थितिप्रलयहेतुं ।
वक्ष्यामि खंडखाद्यै(द्य)कमाचार्यार्यभट्टतुल्यफलं ॥ १ ॥
प्रायेणार्यभट्टे(टे)न व्यवहारः प्रतिदिनं यतोशक्यः ।
उद्वाहजातकादिषु तत्समफललघुततोक्तिरतः ॥ २ ॥
अनयोः गणितप्रयोजनाभावादर्थो न व्याख्यातः । एवमारंभप्रयोजनप्रदर्शन(ने?)करणमारभ्यते ।
ओं मुनिवेदतिथीन्यस्य लौकिकाब्दान्विनिक्षिपेत् ।
एष कालः शकेंद्राणां सूरिभिः समुदाहृत : ॥

किंचित्कालमवधीकृत्य गणितमारब्धं । तत्राचार्यावंतदेशे विक्रमादित्येन राज्ञा यस्मिन्काले शका नाम म्लेच्छा व्यामा(पा)दितः(ताः) स शकानामिति व्युत्पत्त्या शाकाः(कः) कार्याः (र्यैः) स्मर्यमाणः सर्वज्योतिःशास्त्रविद्भिः संरक्ष्यते । तत्र गुरुवदनांभोरुहादुपदेशो निर्गतो यथा अत्र मुनिवेदा दृढा[ः] संरक्षणीयाः शाकोत्पत्तेरारभ्य वर्षशतेऽतिक्रांते एकमेकमधिकीकृत्य यथैकदा वर्षशते मुन्यब्धिविश्वान्संस्थाप्यान्यद्वर्षशते मुन्यब्धिमनून्संस्थाप्याद्यवर्षशते मुन्यब्धितिथीन्संस्थाप्याग्रिमवर्षशते मुन्यब्धिषोडश संस्थाप्यैवमेकैकमधिकीकार्यं । अद्य पंचदशशतं सप्तचत्वारिंश[द]धिकं संस्थाप्य लौकिकवर्षान्गतानिक्षिप्यवाग्रिमवर्षे शकेंद्राणां काले बुधैरुदाहृतः । अयमेव श्रीशाको लोकेषु पठ्यते तद्यथाष्टादशवर्षस्य शाकाः वामगत्या मुनिवेदतिथीन्संस्थाप्य १९४७ सप्तदशाधिकीकृत्य जातः श्रीशाकः १९६४ । अयं शाकः अगवसुशरैरूनः पंचभिः शतैः सप्त(प्ता)शीत्यधिकैरित्यर्थः ९८७ । अगवसुशराश्च स्थापनायां वामाः(मा) अवगंतव्याः । एवमन्यत्राप्यंकस्थापना सर्वत्रैव वामा[व]गंतव्या । एवमगवसुशरानूनीकृत्य जातः(ताः) करणगताब्दाः ९७७ ।

BBB. No. 697. *Kiraṇâvalî by Dâdâbhâî.*

किरणावली । आद्यं ।

प्रणिपत्य परं ब्रह्म सूर्याशयमहोदधेः ।
सारचंद्रं समुद्धृत्य तनोमि किरणावलीं ॥ १ ॥
चित्तपावनजातीयमाधवांगभवः सुधीः ।
दादाभाई समालोच्य वराहादिकृतीः स्फुटाः ॥ २ ॥

मध्ये ।

प० १७४ सांकपृष्ठे । यद(दि) कश्चन वेदबाह्यमतानुयायी ब्रूयादयनांशाग्रवत्सततमुपचीयमानाः संहितोक्तऋणायनांशो(शा) न चक्रमितास्तदा धनगता इत्युक्तेपि संहिताग्रंथः संगच्छत इति चेद्वेदबाह्येनापि वर्षेयनांशगतिः चतुःपंचाशद्विकलामितांगीकृतास्ति तेन प्रमाणेनाष्टादशेदानीमीदृशे चंद्राब्धिभूपमिते शालिवाहनशककाले तेषामष्टादशमितानामयनांशानां वर्षाणि खखर[वि]मितानि १२०० ।

प० १७८ निरंकपृष्ठे । सप्तर्षिनक्षत्रसंबंधादिदानीं नक्षत्रसंबंध ईदृशे कालिगते ४८२० न संवदतीति ।

प० १७९ निरंकपृष्ठे । ईदृशे शालिवाहनशके १६४१ कालिगतं ४८२० अस्मिन्काले

अंते ।

इति श्रीचित्तपावनजातीयश्रीगांवकरमाधवात्मजश्रीदादाभाईकृते सौरसूरविवरणे मानाध्यायः। समाप्तं चोत्तरार्धं ॥

CCC. No. 210. *Vṛiddhagârgyasaṁhitâ.*

वृद्धगार्ग्यसंहितायां विषयाः ।

इति श्रीवृद्धगार्ग्यसंहितायां सूर्यचारः ॥ १ ॥
इति श्रीवृद्ध० चंद्रचारो द्वितीयः ॥ २ ॥
इति श्रीवृ० कुजचारस्तृतीयोध्यायः ॥ ३ ॥
इति श्रीगार्ग्य० बुधचारश्चतुर्थः ॥ ४ ॥
इति श्रीवृ० गुरुचारः पंचमे (मः) ॥ ५ ॥
इति श्रीवृ० शुक्रचाराध्यायः षष्ठः ॥ ६ ॥
इति श्रीवृ० शनिचारोध्यायः सप्तमः ॥ ७ ॥
इति श्रीवृ० राहुकेतुचारोत्पातावष्टमोध्यायः ॥ ८ ॥
इति श्रीवृ० मंडलादिनवमोध्या० ॥ ९ ॥
इति श्रीवृ० संवत्सराध्यायो दशमः ॥ १० ॥
इति श्रीवृ० षष्ठ्यफलमेकादशोध्यायः ॥ ११ ॥

इति श्रीगार्गा० सस्यजातकं त्रयोदशोध्यायः ॥ १३ ॥
इति श्रीवृ० मासप्रयुक्तकालवर्षनिर्णयो नाम च० ॥ १४ ॥
इति श्रीगार्ग्य० मेघारसघो(?)वृष्टिलक्षणाध्यायः पं० ॥ १५ ॥
इति श्रीगार्ग्य० बीजवर्षापनं समाप्तं ।
इति श्रीवृ० नक्षत्रातीथिलग्नप्रत्येकफलं षो० ॥ १६ ॥
इति श्रीगा० नक्षत्रसप्तभेदाभेदाध्यायः स० ॥ १७ ॥
इति श्रीगर्ग० प्रवरो(र?)प्रकरणं नामाष्टादशो० ॥ १८ ॥
इति श्रीगार्ग्य० अन्नप्राशनाध्यायः ।
इति० चौलकर्माध्यायः ।
इति० उपनयाध्यायः ।
इति० समावर्तनाध्यायः ।
इति० पृथका(?)ध्यायः ।
इति मरणकूटं ।
इति योनिकूटं ।
इति ग्रहकूटं ।
इति शंकुलक्षणं ।
इति श्रीगार्ग्यसंहितायां विवाहपटलाध्यायः
इति० यात्राकरणं ।
इति० वास्तुप्रकरणं ।
इति० श्राद्धपलाध्यायः संपूर्णः ।

DDD. No. 201. *Muhûrtachûḍâmaṇi.*

मुहूर्तचूडामणिः । आद्यं ।

सर्वसिद्धिसदनेखिलवंद्ये दुष्कृतौघविनिवारणदक्षे ।
विघ्नराजपदपंकजयुग्मे चंचरीकसममस्तु मनो मे ॥ १ ॥
नवीनपद्यैर्गणका[:?] सशंकाः स्युः पूर्वपद्यैर्निंतरां विशंकाः ।
अतः शिवः सारवदाद्यपद्यैर्मुहूर्तचूडामणिमातनोति ॥ २ ॥

अंते ।

गोलग्रामे वाक्पतिनां जनानां गोलज्ञानां वा निवासेन सार्थे ।
गोदावर्याः सौम्यतीराधिवासशालीनाढ्ये सद्विदर्भाख्यदेशे ॥ १ ॥
सांवत्सरार्कबुधकेशवसूनुवर्यः श्रीमद्गणेशगुरुलब्धमतिप्रबोधः ।
वेदांतवेदितिलको — — — बभूव श्रीमद्दिवाकर इति प्रथितः पृथिव्यां ॥ २ ॥
पंचास्यपंचास्यसमप्रभावाः सगर्वदैवज्ञगजेंद्रवृंदे ।

पुत्रा बभूवुः सुतरां पवित्राः श्रीमद्भरद्वाजमहार्षिगोत्राः ॥ ३ ॥
ज्येष्ठस्तेषां धरित्रीपतिविविधसमालब्धभूरिप्रतिष्ठः
सर्वाधीशस्य चंचत्पदयुगशतता(धा?)सेविविद्वद्वरिष्ठः ।
भव्यान्वाचां प्रबंधान्सपदि बहुविधान्यो विधत्ते च साधां
दैवज्ञाख्यामभिख्यां वहति – – – – कृष्ण एष द्विजेंद्रः ॥ ४ ॥
सदा मुदा सेवितगर्भ(भर्ग?)सूनुः संख्यातमःप्रौढतयेव गर्गः ।
वाचां विलासैर्वचसाभिवेशो जगद्गुरुर्विष्णुरिति द्वितीयः ॥ ५ ॥

अनन्यसामान्यगुणातिरेकान्नरेंद्रमौलिद्युतिरंजितांघ्रिः ।
मल्लारिसंसेवनलब्धसंपन्मल्लारिनामा तनयस्तृतीयः ॥ ६ ॥
तस्यानुजः केशवनामधेयः सुरूपधेयः शुभभागधेयः ।
श्रीविश्वनाथस्तदनु प्रसिद्धः संख्या न संख्यानमतौ हि यस्य ॥ ७ ॥
श्रीकृष्णतः श्रीनरसिंहसंज्ञः सिंधोः सुधारश्मिरिवोदियाय ।
यद्वासनाकल्पलतामवेक्ष्य श्रीभास्करं चेतसि न स्मरामः ॥ ८ ॥
तस्यानुजः श्रीशिवनामधेयो मुहूर्तचूडामणिनामधेयं ।
विनिर्ममे सारवदाद्यपद्यैः सच्छिष्यतोषाय पुरे पुरारेः ॥ १० ॥ * * ११

इति श्रीकृष्णदैवज्ञात्मजश्रीमच्छिवदैवज्ञविरचितो मुहूर्तचूडामणिः समाप्तिमगमत् ॥
संवत् १८१२ वर्षे शाके १६७८ प्रवर्तमाने मधुमासे बहुलपक्षे त्रयोदश्यां भौमवासरे ।

EEE. No. 722. *Vivâhavṛindâvana.*

विवाहवृंदावनं सटीकं । आद्यं ।

तीर्थानामधिपः कुभृच्छ्रुतपदोसंत्यक्तवेलास्थिति-
र्यत्पर्यायकलाद्विजाधिपसमीक्षाप्तोरुमु(?)त्पूरवान् ।
लक्ष्मीशोखिलदानवारिसततप्रस्निग्धसद्मक्षिति-
र्घोषध्वस्तमलो जयत्युरुकृपासिंधुर्गुरुः केशवः ॥ १ ॥
बभ्राजितेस्म विवाहपूर्वकपदं वृंदावनं केशवा-
दिख्यो यत्कुटिलोक्तिसूक्तिबहुलं बव्हर्थगूढं पदैः ।
हेलागम्यमनल्पदृष्टसुधियां तन्नेतरेषां तथा
तस्मात्तद्विवृतिं विशेषसहितामारब्धुमस्म्युत्सुकः ॥ २ ॥
नानाकलागमपटुर्भुवि गीति(त)कीर्तेः
श्रीकेशवो(व)स्य तनयः कुरुते गणेशः ।
टीकां भ्रमांधतमसापहरां विवाह-
वृंदावनस्य करपीडनदीपिकाख्यां ॥ ३ ॥

व्याख्यामात्रेण तुष्यं(?) ये केशवोच्चावचा इह ।
मंति(?)संतस्तु सुद्युक्तिविशेषवचनैरपि ॥ ४ ॥
कृत्वादौ ग्रहलाघवाख्यकरणं तिथ्यादिसिध(द्धि)द्वयं
श्लोकैः श्राद्धविधिं सवासनतया लीलावतीव्यक्तितं(क्तां) ।
संक्षेपेण मुहूर्ततत्त्वविवृतिं पर्वादिसंनिर्णयं
तस्मान्मंगलनिर्णयाद्यथकृता वे(वै)वाहसंदीपिका ॥ ५ ॥

अंते ।

अभूद्भरद्वाजमहर्षिवंशे विश्वावतंसे श्रुतितत्त्ववेत्ता ।
औदीच्यचारित्रपथप्रवृत्तिर्जनार्दनो याज्ञिकचक्रवर्ती ॥ १ ॥
अस्ति श्रियादित्य इति स्म तस्य सूनुः श्रियादित्य इव द्वितीयः ।
त्रिस्कंधपारंगतरंगमल्लस्तदात्मजो राणक इत्युदीर्ये(र्यः?) ॥ ३ ॥
श्रीकेशवः सुकविरध्ययनाध्वनीनः व्यूहान्प्रतर्पयितुमर्थपयःप्रवाहैः ।
दैवज्ञराणगसुतः सुतपःश्रियेस्मिन्वृंदावने मुनिगवीनिवहं दुदोह ॥३॥४॥५॥

इति श्रीविवाहवृंदावने केशवदैवज्ञविरचिते विवाहदीपिका समाप्ता शके १६७९ ईश्वरनामसंवत्सरे अ(आ)श्विन अधिकशुद्ध एकादशी ११ शनौ विराटक्षेत्रे श्रीकृष्णातीरकृष्णासंनिधौ...

FFF. No. 218. *Ashṭâṅgahṛidayaṭîkâ.*

अष्टांगहृदयटीका । आद्यं ।

पृष्ठे कूर्मतया चतुर्भुजतया दोर्मंडले मंदरं
रुद्ध्वा क्षीरसमुद्रमौषधमृतं निर्मथ्य निष्पादितैः ।
आनीतैरमृतैर्भिषक्तमतया योषित्तया पायितै-
र्देवानामजरामरत्वमकरोत्तस्मै नमो विष्णवे ॥ १ ॥
हेमाद्रिणा चतुर्वर्गचिंतामणिविधायिना ।
तदुक्तव्रतदानानि(नां) सिद्ध्यंगारोग्यासिद्धये ॥ २ ॥
क्रियतेष्टांगहृदयस्यायुर्वेदस्य सुग्रहा ।
टीका चरकहारीतसुश्रुतादिमतानुगा ॥ ३ ॥
चरके हरिचंद्राद्यैः सुश्रुते जैज्जटादिभिः ।
टीकाकारैर्विनिर्णीतामिह हेमाद्रिणोदितं ॥ ४ ॥
देशभ्रंशभयाद्विचाल्य लयिनः स्नेहैः प्रतापैः परा-
न्विद्राव्य प्रसृतान्प्रवेश्य परितो दुर्गोदरं द्राक्ततः ।
ऊर्ध्वाधोगति निर्गमय्य मदनैर्दैत्यादिभिर्विद्विषो
दोषानद्रढि रामराज्यमगदंकारेण हेमाद्रिण ॥ ५ ॥

हेमाद्रिर्नाम रामस्य राजश्रीकरणेष्वधि ।
ननु यो भगवन्निष्ठषाड्गुण्यकरणेष्वधि ॥ ६ ॥ ७ ॥ ८ ॥

अष्टांगहृदयं मुख्यमनुक्तेष्टांगसंग्रहः ।
तंत्रांतराणि चोक्तानि वैषम्ये विवृतानि च ॥ ९ ॥

GGG. No. 222. *Vîrasimhâvaloka by Virasimha.*

वीरसिंहावलोक आद्यं ।

यच्चक्षुर्भुवनस्य दिव्यममलं धाम श्रुतीनां परं
यद्ब्रह्मैकनिकेतनं च पयसां बीजं यदेकं सतां ।
सत्रेष्वग्निहुतस्य वेदविदितं स्थानं च यत्सर्वदा
तद्वः पातु सनातनं हरिमहस्तत्त्वप्रबोधोदयं ॥ १ ॥
दैवज्ञागमधर्मशास्त्रनिगमायुर्वेददुग्धोदधी-
नामथ्य स्फुरदात्मबुद्धिगिरिणा विश्वोपकारोज्ज्वलं ।
आलोक्यामृतमातनोति विबुधैरास्येयमत्यद्भुतं
श्रीमत्तोमरदेववर्मतनयः श्रीवीरसिंहो नृपः ॥

अंते ।

इति श्रीवीरसिंहाव(?)तोमरवंशावतंसरिपुभूतभैरववीरसिंहदेवरचिते ग्रंथे वीरसिंहावलोके ज्योतिःशास्त्रकर्मविपाकायुर्वेदोक्तप्रयोगो मिश्रकाध्यायः ॥

न श्रेष्ठस्तरणिप्रभावजनितो वंशः समालिख्यते
रामाद्याः पृथिवीश्वराः समभवन्यत्र प्रतापोन्नताः ।
नो वा यत्र युधीष्ठिरप्रभृतयो भूपा बभूवुस्ततः
सृष्टस्तोमरवंश एष विधिना सत्कर्मसंसेविता ॥ १ ॥
तत्राभवत्कमलसिंह इति प्रसिद्धः
सर्वागमाचरणसेवितदेवसिद्धः ।
तस्माद्भुजंगगतिभूपतिदेववर्मा
विद्याविनोदमतिरादृतपुण्यकर्मा ॥ २ ॥
श्रीदेववर्मात्मज एष धीरः स्वशस्त्रसंतापितशत्रुवीरः ।
श्रीवीरसिंहः क्षितिपालसिंहः शास्त्रान्वयाद्ग्रंथमिदं(मं)न्यधत्त ॥ ३ ॥

इति श्रीवीरसिंहावलोकस्य ग्रंथः संपूर्णः । संवत् १८७३ शका १७३८ चैत्रकृष्णपक्षे द्वादश्यां शुक्रे शुभं भूयात् ॥

HHH. No. 236. *Vâmakeśvaratantra.*

वामकेश्वरतंत्रे ।

चतुःषष्टिस्तु तन्त्राणि मातृणामुत्तमानि तु ॥
महामायाशम्बरं च योगिनीजालशम्बरम् ।
तत्त्वशम्बरकं देव भैरवाष्टकमेव च ॥
बहुरूपाष्टकं ज्ञानं यमलाष्टकमेव च ।
चन्द्रज्ञानं वासुकिं(?)च महासंमोहनं तथा ॥
महोच्छुष्मं महादेवं वाथुलं च नयोत्तरम् ।
तद्भेदं मातृभेदं च गुह्यतन्त्रं च कामिकम् ॥
कालपादं कालसारं तथान्यत्कुब्जिकामतम् ।
नयोत्तरं च वीणूवं तोत्तलं तोत्तलोत्तरम् ॥
पञ्चामृतं रूपं(प)भेदं भूतोड्डामरमेव च ।
कुलसारं कुलोड्डीशं कुलचूडामणिं तथा (णिस्तथा) ॥
सर्वज्ञानोत्तरं चैव महापिशमतं तथा ।
महालक्ष्मीमतं देव सिद्धयोगीश्वरीमतम् ॥
कुरूपिकामतं देव रूपिकामतमेव च ।
सर्ववीरमतं देव विमलामतमुत्तमम् ॥
आरुणेशं मोदनेशं विशुद्धेश्वरमेव च ।

JJJ. No. 225. *Kâmakalâvilâsa by Puṇyânanda with a commentary by Naṭanânandanâtha.*

कामकलाविलासः सटीकः ।

आद्यं टीकायाः ।

वंदे तन्मिथुनं दिव्यमाद्यमानंदचिद्घनं ।
अनुत्तरं परं ज्योतिरिति तद्व्याप्यते बुधैः ॥ १ ॥
श्रीमते नटनानंदयोगिने परमात्मने ।
रक्तशुक्लप्रभामिश्रतेजसे गुरवे नमः ॥ २ ॥
प्रणमत नाथानंदं परया भक्त्या चिदैक्यबोधानंदं ।
उपनिषदर्थनिगूढ सकलजनानंदभद्रपीठानुरूढं ॥ ३ ॥
नमः शिवाय नाथाय चिद्रूपानंदरूपिणे ।
श्रीमते चंचलापांगपाटितातंकशंकवे ॥ ४ ।
पुण्यानंदमुनींद्रात्कामकला नाम विश्रुता जाता ।
आर्या काचिदमुष्या नटनानंदः करोति सव्याख्यां ॥ ५ ॥

टीकांते ।

इति श्रीनटनानंदनाथविरचिता कामकलाविलासव्याख्या संपूर्णा।

मूलं ।

सकलभुवनोदयस्थितिलयमयलीलाविलोकनोद्युक्तः ।
अंतर्लीनविमर्शः पातु महेशः प्रकाशमात्रतनुः ॥ १ ॥
सा जयति शक्तिराद्या निजसुखमयनित्यानिरुपमाकारा ।
भाविचराचरबीजं शिवरूपविमर्शनिर्मलादर्शे ॥ २ ॥
स्फुटशिवशक्तिसमागमबीजांकुररूपिणी परा शक्तिः ।
अणुतररूपानुत्तरविमर्शलिपिलक्ष्यविग्रहा भाति ॥ ३ ॥
परशिवरविकरनिकरे प्रतिफलति विमर्शदर्पणे विशदे ।
प्रतिरुचिरुचिरे कुड्ये चित्तमये निविशते महाबिंदुः ॥ ४ ॥
चित्तमयोहंकारः सुव्यक्ताहार्णसमरसाकारः ।
शिवशक्तिमिथुनपिंडः कवलीकृतभुवनमंडलो जयति ॥ ५ ॥
सितशोणबिंदुयुगलं विविक्तशिवशक्तिसंकुचत्प्रसरं ।
वागर्थसृष्टिहेतु परस्परानुप्रविष्टविस्पष्टं ॥ ६ ॥
बिंदुरहंकारात्मा रविरेतन्मिथुनसमरसाकारः ।
कामः कमनीयतया कला च दहनेंदुविग्रहौ बिंदू ॥ ७ ॥
इति कामकलाविद्या देवीचक्रक्रमात्मिका सेयं ।
विदिता येन स मुक्तो भवति महात्रिपुरसुंदरीरूपः ॥ ८ ॥
स्फुटितादरुणाद्विदोर्नादब्रह्मांकुरो रवोव्यक्तः ।
तस्माद्गगनसमीरणदहनोदकभूमिवर्णसंभूतिः ॥ ९ ॥
अथ विशदादापि बिंदोर्गगनानिलवह्निवारिभूमिजनिः ।
एतत्पंचकविकृतिर्जगदिदमण्डाद्यजाडपर्यंतं ॥ १० ॥
बिंदुद्वितयं यद्वद्भेदविहीनं परस्परं तद्वत् ।
विद्यादैवतयोरापि न भेदलेशोस्ति वेद्यवेदकयोः ॥ ११ ॥
वागर्थौ नित्ययुतौ परस्परं शक्तिशिवमयावेतौ ।
सृष्टिस्थितिलयभेदौ त्रिधा विभक्तौ त्रिबीजरूपेण ॥ १२ ॥
माता मानं मेयं बिंदुत्रयभिन्नबीजरूपाणि ।
धामत्रयपीठत्रयशक्तित्रयभेदभावितान्यापि च ॥ १३ ॥
तेषु क्रमेण लिंगात्रितयं तद्वच्च मातृकात्रितयं ।
इत्थं त्रितयतुरीया तुरीयपीठादिभेदिनी विद्या ॥ १४ ॥

शब्दस्पर्शौ रूपं रसगंधौ चेति भूतसूक्ष्माणि ।
व्यापकमाद्यं व्याप्यं तूत्तरमेवं क्रमेण पंचदश ॥ १५ ॥
पंचदशाक्षररूपा नित्या सैषा हि भौतिकाभिमता ।
नित्या[:] शब्दादिगुणप्रभेदभिन्नास्तथानया व्याप्ताः ॥ १६ ॥
नित्यास्तिथ्याकारास्तिथयः शिवशक्तिसमरसाकाराः ।
दिवसनिशामय्यस्ताः श्रीवर्णास्तेपि तद्वयीरूपाः ॥ १७ ॥
अव्यंजनाबिंदुत्रयसमष्टिभेदैर्विभावितकारा ।
षट्त्रिंशत्तत्त्वात्मा तत्त्वातीता च केवला विद्या ॥ १८ ॥
विद्यापि तादृगात्मा सूक्ष्मा सा त्रिपुरसुंदरी देवी ।
विद्यावेद्यात्मकयोरत्यंताभेदमामनंत्यार्याः ॥ १९ ॥
या सांतरोहरूपा परा महेशी त्रिभाविता सैव ।
स्पष्टा पश्यंत्यादित्रिमातृकात्मा च चक्रतां याता ॥ २० ॥
चक्रस्यापि महेश्या न भेदलेशो विभाव्यते विबुधैः ।
अनयोः सूक्ष्माकारा परैव सा स्थूलसूक्ष्मयोश्च भिदा ॥ २१ ॥
मध्यं चक्रस्य स्यात्परामयं बिंदुतत्त्वमेवेदं ।
उच्छूनं तच्च यदा त्रिकोणरूपेण परिणतं चक्रं ॥ २२ ॥
एतत्पश्यंत्यादित्रितयनिदानं त्रिबीजरूपं च ।
वामा ज्येष्ठा रौद्री चांबिका अ(?)नुत्तरांशभूताः स्युः ॥ २३ ॥
इच्छाज्ञानाक्रिया[:?] शांताश्चैतास्तथोत्तरावयवाः ।
व्यस्ताव्यस्ततदर्णद्वयमिदमेकादशात्म पश्यंती ॥ २४ ॥
एवं कामकलात्मा त्रिबिंदुतत्त्वस्वरूपवर्णमयी ।
सेयं त्रिकोणरूपं याता त्रिगुणस्वरूपिणी माता ॥ २५ ॥
एका परा तदन्या वामादिव्यष्टिमातृसृष्ट्यात्मा ।
तेन नवात्मा जाता माता सा मध्यमाभिधानाख्यां ॥ २६ ॥
द्विविधा हि मध्यमा सा सूक्ष्मस्थूलाकृति स्थिता सूक्ष्मा ।
नवनादमयी स्थूला नववर्गात्मा च भूतलिप्याख्या ॥ २७ ॥
आद्या कारणमन्या कार्यं त्वनयोर्यतस्ततो हेतोः ।
सैवेयं नहि भेदस्तादात्म्यं हेतुहेतुमदभीष्टं ॥ २८ ॥
शषसपवर्गमयं तद्बहुकोणं मध्यकोणविस्तारं ।
नवकोणं मध्यं चेत्यस्मिञ्चिद्दीपदीपिते दशके ॥२९॥
तच्छायाद्वितयमिदं दशारचक्रद्वयात्मना विततं ।
कचटतवर्गचतुष्टयविलसनविस्पष्टकोणविस्तारं ॥३०॥
एतच्चक्रचतुष्टयप्रभासमेतं दशारपरिणामः ।

हादिस्वरनवकचतुर्दशवर्णमयं चतुर्दशारमिदं ॥३१॥
परया पश्यंत्यापि च मध्यमया स्थूलवर्णरूपिण्या ।
एताभिरेकपंचाशदक्षरात्मा च वैखरी जाता ॥३२॥
कादिभिरष्टभिरुपचितमष्टदलाब्जं च वैखरैर्वर्गैः ।
स्वरगणसमुदितमेतद्वयष्टदलांभोरुहं च संचिंत्यं ॥३३॥
बिंदुत्रयमयतेजस्त्रितयविकाराश्च तानि वृत्तानि ।
भूबिंबत्रयमेतत्पश्यंत्यादित्रिमातृविश्रांतिः ॥३४॥
क्रमणं पदविक्षेपः क्रमोदयस्तेन कथ्यते द्वेधा ।
आवरणं गुरुपंक्तिद्वयमिदमंबापदांबुजप्रसरं ॥३५॥
सेयं परा महेशी चक्राकारेण परिणमेत तदा ।
तद्देहावयवानां परिणतिरावर्णदेवताः सर्वाः ॥३६॥
आसीना बिंदुमये चक्रे सा त्रिपुरसुंदरी देवी ।
कामेश्वरांकनिलया कलया चंद्रस्य कल्पितोत्तंसा ॥३७॥
पाशांकुशेक्षुचापप्रसूनशरपंचकांकितस्वकरा ।
बालारुणारुणांगी शशिभानुकृशानुलोचनत्रितया ॥३८॥
तन्मिथुनं गुणभेदादास्ते बिंदुत्रयात्मके त्र्यस्रे ।
कामेशीमित्रेशप्रमुखद्वंद्वत्रयात्मना विततं ॥३९॥
वसुकोणनिवासिन्यो यास्ताः संध्यारुणा वशिन्याद्याः ।
पुर्यष्टकमेवेदं चक्रतनोः संविदात्मनो देव्याः ॥४०॥
तद्विषयवृत्तयस्ताः सर्वज्ञादिस्वरूपमापन्नाः ।
अंतर्दशारनिलया लसंति शरदिंदुसुंदराकाराः ॥४१॥
तद्बाह्यपंक्तिकोणे योगिन्यः सर्वसिद्धिदाः पूर्वाः ।
देवीधीकर्मेंद्रियविषयमया विशदवेषभूषाद्याः ॥४२॥
भुवनारचक्रभवना देवीमनुकरणविवरणस्फुरणाः ।
संध्यासवर्णवसनाः संचित्याः संप्रदाययोगिन्यः ॥४३॥
अव्यक्तमहदहंकृतितन्मात्राः स्वीकृतांगनाकाराः ।
द्विरदच्छदनसरोजे जयंति गुप्ततरयोगिनीसंज्ञाः ॥४४॥
भूतानींद्रियदशकं मनश्च देव्या विकारषोडशकं ।
कामाकर्षिण्यादिस्वरूपतः षोडशारमध्यास्ते ॥ ४५ ॥
मुद्राखिखंडया सह संविन्मय्यः समुच्छ्रिताः सर्वाः ।
आदिमहीगृहवासा भासा बालार्ककांतिभिः सदृशाः(शः?) ॥ ४६ ॥
आधारनवकमस्या नवचक्रत्वेन परिणतं येन ।
नवनादशक्तयोपि च मुद्राकारेण परिणताश्चक्रे ॥ ४७ ॥

अस्यास्त्वगादिसप्तकमाकारश्चैवमष्टकं स्पष्टं ।
ब्राह्म्यादिमातृरूपं मध्यमभूबिंबमेतदध्यास्ते ॥ ४८ ॥
अणिमादिभूतयोस्याः स्वीकृतकमनीयकामिनीरूपाः ।
विद्यांतरफलभूता गुणभावेनांत्यभूनिकेतनगाः ॥ ४९ ॥
परमानंदानुभवः परमगुरुनि(र्नि?)र्विशेषविद्वात्मा ।
स पुनः क्रमेण भिन्नः कामेशत्वं ययौ विमर्शांशात् ॥ ५० ॥

आसीनः श्रीपीठे कृतयुगकाले गुरुः शिवो विद्यां ।
तस्यै ददौ स्वशक्तयै कामेश्वर्यै विमर्शरूपिण्यै ॥ ५१ ॥
साध्येव मित्रसंज्ञान्स्थानेशाज्ज्येष्ठमध्यबालाख्यान् ।
चित्प्राणविषयभूतांस्त्रेतायुगादिकारणत्रिगुरून् ॥ ५२ ॥

बीजत्रितयाधिपतीन्परीक्ष्य विद्यां प्रकाशयामास ।
एतैरोघत्रितयाननुग्रहीतुं गुरुक्रमो विहितः ॥ ५३ ॥

उदितः पुण्यानंदादिति कामकलाविलासोयं ।
परशिवभुजंगभावाकर्षणहर्षाय कल्पतां नित्यं ॥ ५४ ॥
चित्रांतरंगतरलस्तृष्णासलिलः प्रपंचवाराशिः ।
यदनुग्रहेण तीर्णस्तस्मै श्रीनाथदेशिकाय नमः ॥ ५५ ॥

KKK. No. 304. *Pravachanasâra by Kundakundâchârya.*

प्रवचनसारः ।

From a MS. recently purchased.

गा. एस सुरासुरमनुसिंदवंदिदं धोदघाइकम्ममलं ।
पणमामि वड्ढ(ड्ढ)माणं तित्थं धम्मस्स कत्तारं ॥१॥

सं. एष सुरासुरमनुष्येंद्रवंदितं धौतघातिकर्म्ममलं ।
प्रणमामि वर्द्धमानं तीर्थं धर्म्मस्य कर्त्तारं ॥१॥

गा. सेसे पुण तित्थयरे ससव्वसिद्धे विसुद्धसब्भावे ।
समणे य णाणदंसणचरित्ततववीरियायारे॥ २ ॥

सं. शेषान्पुनस्तीर्थकरान्ससर्वसिद्धान्विशुद्धसद्भावान् ।
श्रमणाश्च ज्ञानदर्शनचारित्रतपोवीर्याचारान्॥ २ ॥

गा. तेते सव्वे समगं समगं पत्तेगमेव पत्तेगं ।
वंदामि य वट्टंते अरहंते माणसे खेत्ते ॥ ३ ॥

सं. तांस्तान्सर्वान्समकं समकं प्रत्येकमेव प्रत्येकं ।
वंदे च वर्तमानानर्हतो मानुषे क्षेत्रे ॥ ३ ॥

गा. किच्चा अरिहंताणं सिद्धाणं तध णमो गणधराणं ।
अज्झावयवग्गाणं साहूणं चेदि सव्वेसिं॥ ४ ॥
तेसिं विसुद्धदंसणणाणपधाणासमं समासिज्ज ।
उवसंपयामि सम्मं जत्तो निव्वाणसंपत्ती ॥ ५ ॥

सं. कृत्वार्हद्भ्यः सिद्धेभ्यस्तथा नमो गणधरेभ्यः ।
अध्यापकवर्गेभ्यः साधुभ्यश्चेति सर्वेभ्यः॥ ४ ॥

तेषां विशुद्धदर्शनज्ञानप्रधानाश्रमं समासाद्य ।
उपसंपद्ये साम्यं यतो निर्वाणसंप्राप्तिः ॥ ५ ॥

गा. संपज्जदि णिव्वाणं देवासुरमणुयरायविहवेहिं ।
जीवस्स चरित्तादो दंसणणाणप्पहाणाओ ॥ ६ ॥

सं. संपद्यते निर्वाणं देवासुरमनुजराजविभवैः ।
जीवस्य चरित्राद्दर्शनज्ञानप्रधानात् ॥ ६ ॥

गा. चारित्तं खलु धम्मो धम्मो जो सो समो त्ति णिद्दिट्ठो ।
मोहक्खोहविहूणो परिणामो अप्पणोध समो ॥ ७ ॥

सं. चारित्रं खलु धर्मो धर्मो यस्तत्साम्यमिति निर्दिष्टं ।
मोहक्षोभविहीनः परिणाम आत्मनोथ साम्यं ॥ ७ ॥

गा. परिणमदि येन दव्वं तक्कालं तम्मयं त्ति पण्णत्तं ।
तम्हा धम्मपरिणदो आदा धम्मो मुणेयव्वो ॥ ८ ॥

सं. परिणमति येन द्रव्यं तत्कालं तन्मयमिति प्रज्ञप्तं ।
तस्माद्धर्मपरिणत आत्मा धर्मो ज्ञातव्यः ॥ ८ ॥

गा. जीवो परिणमदि जदा सुहेण असुहेण वा सुहो असुहो ।
सुद्धेण तदा सुद्धो हवदि हु परिणामसब्भावो ॥ ९ ॥

सं. जीवः परिणमति यदा शुभेनाशुभेन वा शुभोशुभः ।
शुद्धेन तदा शुद्धो भवति हु (खलु) परिणामस्वभावः (सद्भावः?) ॥ ९ ॥

गा. णत्थि विणा परिणामं अत्थो अत्थं विणेह परिणामो ।
दव्वगुणपज्जयत्थो अत्थो अत्थित्तणिव्वत्तो ॥ १० ॥

सं. नास्ति विना परिणाममर्थोर्थं विनेह परिणामः ।
द्रव्यगुणपर्ययस्थोर्थोस्तित्वनिर्वृत्तः ॥ १० ॥

गा. धम्मेण परिणदप्पा अप्पा जदि सुद्धसंपओगजदो ।
पावदि णिव्वाणसुहं सुहोवजुत्तो व सग्गसुहं ॥ ११ ॥

सं. धर्मेण परिणतात्मा आत्मा यदि शुद्धसंप्रयोगयुतः ।
प्राप्नोति निर्वाणसुखं शुभोपयुक्तो वा स्वर्गसुखं ॥ ११ ॥

गा. असुहोदयेण आदा कुणरो तिरिओ भविय णेरइयो ।
दुक्कसहस्सेहिं सदा अभिदुदो भमदि अच्चंतं ॥ १२ ॥

सं. अशुभोदयेनात्मा कुनरस्तिर्यग्भूत्वा नैरयिकः ।
दुःखसहस्रैः सदा अभिद्रुतो भ्रमत्यत्यंतं ॥ १२ ॥

गा. अदिसयमादसमुत्थं विसयातीदं अणोवममणंतं ।
अव्वुच्छिन्नं च सुहं सुद्धवओगप्पसिद्धाणं ॥ १३ ॥

सं. अतिशयमात्मसमुत्थं विषयातीतमनौपम्यमनंतं ।
अव्युच्छिन्नं च सुखं शुद्धोपयोगप्रसिद्धानां ॥ १३ ॥
गा. सुविदितपदत्थसुत्तो संयमतवसंजुदो विगतरागो ।
समणो समसुहदुक्खो भणिदो सुद्धोवओगोत्ति ॥ १४ ॥
सं. सुविदितपदार्थसूत्रः संयमतपःसंयुतो विगतरागः ।
श्रमणः समसुखदुःखो भणितः शुद्धोपयोग इति ॥ १४ ॥
गा. उवओगविसुद्धो जो विगदावरणंतरायमोहरओ ।
भूदो सयमेवादा जादि पा(प?)रं णेयभूदाणं ॥ १५ ॥
सं. उपयोगविशुद्धो यो विगतावरणांतरायमोहरजाः ।
भूतः स्वयमेवात्मा याति पारं ज्ञेयभूतानां ॥ १५ ॥
गा. तह सो लद्धसहावो सव्वण्णू सव्वलोगपदिमहिदो ।
भूदो सयमेवादा हवदि सयंभुत्ति णिद्दिट्ठो ॥ १६ ॥
सं. तथा स लब्धस्वभावः सर्वज्ञः सर्वलोकपतिमहितः ।
भूतः स्वयमेवात्मा भवति स्वयंभूरिति निर्दिष्टः ॥ १६ ॥
गा. भंगविहूणो य भवो संभवपरिवज्जिदो विणासो हि ।
विज्जदि तस्सेव पुणो ठिदिसंभवणाससमवाओ ॥ १७ ॥
सं. भंगविहीनश्च भवः संभवपरिवर्जितो विनाशो हि ।
विद्यते तस्यैव पुनः स्थितिसंभवनाशसमवायः ॥ १७ ॥
गा. उप्पादो य विणासो विज्जदि सव्वस्स अत्थजादस्स ।
पज्जाएण दु केणवि अत्थो खलु होदि सब्भूदो ॥ १८ ॥
सं. उत्पादश्च विनाशो विद्यते सर्वस्यार्थजातस्य ।
पर्यायेण तु केनाप्यर्थः खलु भवति सद्भूतः ॥ १८ ॥
गा. पक्खीणघादिकम्मो अनंतवरवीरिओ अधिकतेजो ।
जादो अदिंदिओ सो णाणं सोक्खं च परिणमदि ॥ १९ ॥
सं. प्रक्षीणघातिकर्मा अनंतवरवीर्योधिकतेजाः ।
जातोतींद्रियः स ज्ञानं सौख्यं च परिणमते ॥ १९ ॥
गा. सोक्खं वा पुण दुक्खं केवलणाणिस्स णत्थि देहगदं ।
जम्हा अदिंदियत्तं जादं तम्हा दु तं णेयं ॥ २० ॥
सं. सौख्यं वा पुनर्दुःखं केवलज्ञानिनो नास्ति देहगतं ।
यस्मादतींद्रियत्वं जातं तस्मात्तु तज्ज्ञेयं ॥ २० ॥
गा. परिणमदे(दो) खलु णाणं पच्चक्खा सव्वदव्वपज्जाया ।
सो णेद ते विजाणदि ओग्गहपुव्वाहिं किरियाहिं ॥ २१ ॥

सं. परिणममानस्य खलु ज्ञानं प्रत्यक्षाः सर्वद्रव्यपर्यायाः ।
स नैव तान्विजानाति अवग्रहपूर्वाभिः क्रियाभिः ॥ २१ ॥
गा. णत्थि परोक्खं किंचि वि समंतसव्वक्खगुणसमिद्धस्स ।
अक्खादीदस्स सदा सयमेव हि णाणजादस्स ॥ २२ ॥
सं. नास्ति परोक्षं किंचिदपि समंतसर्वाक्षगुणसमृद्धस्य ।
अक्षातीतस्य सदा स्वयमेव हि ज्ञानजातस्य ॥ २२ ॥
गा. आदा णाणपमाणं णाणं णेयप्पमाणमुद्दिट्ठं ।
णेयं लोगालोगं तम्हा णाणं तु सव्वगयं ॥ २३ ॥
सं. आत्मा ज्ञानप्रमाणं ज्ञानं ज्ञेयप्रमाणमुद्दिष्टं ।
ज्ञेयं लोकालोकं तस्माज्ज्ञानं तु सर्वगतं ॥ २३ ॥
गा. णाणप्पमाणमादा ण हवदि जस्सेह तस्स सो आदा ।
हीणो वा अधिगो वा णाणादो हवदि ध्रु(धु?)वमेव ॥ २४ ॥
हीणो जदि सो आदा तण्णाणमचेदणं ण जाणादि ।
अधिगो वा णाणादो णाणेण विणा कहं णादि ॥ २५ ॥
सं. ज्ञानप्रमाणमात्मा न भवति यस्येह तस्य स आत्मा ।
हीनो वाधिको वा ज्ञानाद्भवति ध्रुवमेव ॥ २४ ॥
हीनो यदि स आत्मा तज्ज्ञानमचेतनं न जानाति ।
अधिको वा ज्ञानाज्ज्ञानेन विना कथं जानाति ॥ २५ ॥
गा. सव्वगदो जिणवसहो सव्वे वि य तग्गया जगति अट्ठा ।
णाणमयादो य जिणो विसयादो तस्स ते भणिदा ॥ २६ ॥
सं. सर्वगतो जिनवृषभः सर्वेपि च तद्गता जगत्यर्थाः ।
ज्ञानमयत्वाच्च जिनो विषयत्वात्तस्य ते भणिताः ॥ २६ ॥
गा. णाणं अप्पत्ति मदं वट्टदि णाणं विणा ण अप्पाणं ।
तम्हा णाणं अप्पा अप्पा णाणं व अण्णं वा ॥ २७ ॥
सं. ज्ञानमात्मेति मतं वर्तते ज्ञानं विना नात्मानं ।
तस्माज्ज्ञानमात्मात्मा ज्ञानं चान्यद्वा ॥ २७ ॥

* * *

गा. परिणमदि णेयमट्ठं णादा जदि णेव खाइयं तस्स ।
णाणं त्ति तं जिणिंदा खवयंतं कम्ममेवुत्ता ॥ ४२ ॥
सं. परिणमति ज्ञेयमर्थं ज्ञाता यदि नैव क्षायिकं तस्य ।
ज्ञानमिति तं जिनेंद्राः क्षपयंतं कर्मैवोक्तवंतः ॥ ४२ ॥
गा. उदयगदा कम्मंसा जिणवरवसहेण(हिं?) णियदणा(दिए?) भणिया ।
तेसु हि मुहिदो रत्तो दुट्ठो वा बंधमणुहवदि ॥ ४३ ॥

सं. उदयगताः कर्मांशा जिनवरवृषभैर्नियत्या भणिताः।
तेषु हि मूढो रक्तो दुष्टो वा बंधमनुभवति ॥ ४३ ॥
गा. ठाणणिसेज्जविहारा धम्मुवदेसो य णियदयो तेसिं ।
अरहंताणं काले मायाचारुव्व इत्थीणं ॥ ४४ ॥
सं. स्थाननिषद्याविहारा धर्मोपदेशश्च नियतयस्तेषां ।
अर्हतां काले मायाचार इव स्त्रीणां ॥ ४४ ॥

अथ शुभपरिणामाधिकारः ।

गा. देवदजदिगुरुपूजासु दे(ये)व दाणम्मि वा सुसीलेसु ।
उववासादिसु रत्तो सुहोवओगप्पगो अप्पा ॥ ६९ ॥
सं. देवतायतिगुरुपूजासु चैव दाने वा सुशीलेषु ।
उपवासादिषु रक्तः शुभोपयोगात्मक आत्मा ॥ ६९ ॥
गा. जुत्तो सुहेण आदा तिरियो वा माणुसो य(व) देवो वा ।
भूदो तावदकालं लहदि सुहमिंदियं विविहं ॥ ७० ॥
सं. युक्तः शुभेनात्मा तिर्यग्वा मानुषो वा देवो वा ।
भूतस्तावत्कालं लभते सुखमैंद्रियं विविधं ॥ ७० ॥
गा. जदि संति हि पुण्णाणि य परिणामसमुब्भवाणि विविहाणि ।
जणयंति विसयतण्हां जीवाणं देवदंताणं ॥ ७४ ॥
सं. यदि संति हि पुण्यानि च परिणामसमुद्भवानि विविधानि ।
जनयंति विषयतृष्णां जीवानां देवतांतानां ॥ ७४ ॥
गा. ते पुण उदिण्णतण्हा दुहिदा तण्हाहिं विसयसोक्खाणि ।
इच्छंति अणुहवंति य आमरणं दुक्खसंतत्ता ॥ ७५ ॥
सं. ते पुनरुदीर्णतृष्णा दुःखिता तृष्णाभिर्विषयसौख्यानि ।
इच्छंत्यनुभवंति चामरणं दुःखसंतप्ताः ॥ ७५ ॥

एता गाथाः प्रथमप्रकरणस्थाः ।

गा. आदा कम्ममलिमसो धारदि पाणे पुणो पुणो अण्णे ।
ण जहादि जाव ममत्तिं देहपधाणेसु विसयेसु ॥ २४ ॥
सं. आत्मा कर्ममलीमसो धारयति प्राणान् पुनःपुनरन्यान् ।
न जहाति यावन्ममतां देहप्रधानेषु विषयेषु ॥ २४ ॥
गा. णरणारयतिरियसुरा संठाणादीहिं अण्णहा जादे ।
पज्जाया जीवाणं उदयादु हि णामकम्मस्स ॥ २७ ॥
सं. नरनारकतिर्यक्सुरा[:] संस्थानादिभिरन्यथा जाता[:] ।
पर्याया जीवानामुदयाद्धि नामकर्मणः ॥ २७ ॥

गा. णाहं पुग्गलमइओ ण ते मया पोग्गला कया पिंडं ।
तम्हा हि ण देहोहं कत्ता वा तस्स देहस्स ॥ ३६ ॥

सं. नाहं पुद्गलमयो न ते मया पुद्गलाः कृताः पिंडं ।
तस्माद्धि न देहोहं कर्ता वा तस्य देहस्य ॥ ३६ ॥

गा. मुत्तो रूवादिगुणो बज्झादि फासेहिं अण्णमण्णेहिं ।
तव्विवरीदो अप्पा बन्धदि किध पुग्गलं दव्वं ॥ ४७ ॥

सं. मूर्तो रूपादिगुणो बध्यते स्पर्शैरन्योन्यैः ।
तद्विपरीत आत्मा बध्नाति कथं पौद्गलं कर्म (द्रव्यं?)॥ ४७ ॥

गा. रूवादिएहिं रहिदो पेच्छदि जाणादि रूवमादीणि ।
दव्वाणि गुणे य जधा तध बंधो तेण जाणादि(हि) ॥ ४८ ॥

सं. रूपादिकै रहितः पश्यति जानाति रूपादीनि ।
द्रव्याणि गुणांश्च यथा तथा बंधस्तेन जानीहि ॥ ४८ ॥

गा. उवओगमओ जीवो मुब्भ(ज्झ?)दि रज्जेदि वा पदुस्सेदि ।
पप्प विविधे विसए जो हि पुणो तेहिं सो बंधो(द्धो)॥ ४९ ॥

सं. उपयोगमयो जीवो मुह्यति रज्यति वा प्रद्वेष्टि ।
प्राप्य विविधान्विषयान्यो हि पुनस्तैः सो (स) बद्धः ॥ ४९ ॥

गा. परिणामादो बंधो परिणामो रागदो(दे?)समोहजुदो ।
असुहो मोहपदेसो सुहो व असुहो हवदि रागो ॥ ५४ ॥

सं. परिणामाद्बंधः परिणामो रागद्वेषमोहयुतः ।
अशुभो मोहप्रद्वेषौ शुभोशुभो वा भवति रागः ॥ ५४ ॥

गा. कुव्वे सहावमादा हवदि ह कत्ता सगस्स भावस्स ।
पोग्गलदव्वमयाणं ण दु कत्ता सव्वभावाणं ॥ ५८ ॥

सं. कुर्वन्स्वभावमात्मा भवति हि कर्त्ता स्वकस्य भावस्य ।
पुद्गलद्रव्यमयानां न तु कर्ता सर्वभावानां ॥ ५८ ॥

गा. गिण्हदि णेव ण मुंचदि करेदि णहि पुग्गलाणि कम्माणि ।
जीवो पुग्गलमज्झे पवट्टमाणो वि सव्वकालेसु ॥ ५९ ॥

सं. गृह्णाति नैव न मुंचति करोति नहि पु(पौ?)द्गलानि कर्माणि ।
जीवः पुद्गलमध्ये प्रवर्तमानोपि सर्वकालेषु ॥ ५९ ॥

गा. स इदाणिं कत्ता सं सगपरिणामस्स दव्वजादस्स ।
आदीयदे कदाई विमुच्चदि कम्मधूलीहिं ॥ ६० ॥

सं. स इदानीं कर्त्ता सन्स्वकपरिणामस्य द्रव्यजातस्य ।
आदीयते कदाचिद्विमुच्यते कर्मधूलीभिः ॥ ६० ॥

गा. परिणमदि जदा अप्पा सुहम्मि असुहम्मि रागदोसजुदो ।
तं पविसदि कम्मरयं णाणावरणादिभावेहि ॥ ६१ ॥

सं. परिणमति यदात्मा शुभेशुभे रागद्वेषयुतः ।
तत्प्रविशति कर्मरजो ज्ञानावरणादिभावैः ॥ ६१ ॥

गा. एसो बंधसमासो जीवाणं णिच्छएण णिद्दिट्ठो ।
अरहंतेण जदीणं ववहारो अण्णहा भणिदो ॥ ६२ ॥

सं. एष बंधसमासो जीवानां निश्चयेन निर्दिष्टः ।
अर्हद्भिर्यतीनां व्यवहारोन्यथा भणितः ॥ ६२ ॥

गा. ण जहदि जो दु ममत्तिं अहं ममेदत्ति देहदविणेसु ।
सो सामण्णं चत्ता पडिवण्णो होइ उम्मग्गं ॥ ६४ ॥

सं. न जहाति यस्तु ममतामहं ममेदमिति देहद्रविणेषु ।
स श्रामण्यं त्यक्त्वा प्रतिपन्नो भवत्युन्मार्गं ॥ ६४ ॥

गा. णाहं होमि परेसिं ण मे परे संति णाणमहमेको ।
इदि जो झायदि झाणे स अप्पाणं हवदि झादा ॥ ६५ ॥

सं. नाहं भवामि परेषां न मे परे संति ज्ञानमहमेकः ।
इति यो ध्यायति ध्याने स आत्मानं भवति ध्याता ॥ ६५ ॥

गा. एवं णाणप्पाणं दंसणभूदं अदिंदियमहत्थं ।
धुवमचलमणालंबं मण्णेहं अप्पगं सुद्धं ॥ ६६ ॥

सं. एवं ज्ञानात्मानं दर्शनभूतमतींद्रियमहार्थं ।
ध्रुवमचलमनालंबं मन्येहमात्मकं शुद्धं ॥ ६६ ॥

गा. देहा वा दविणा वा सुहदुक्खा वाध सत्तुमित्तजणा ।
जीवस्स न संति धुवा धुवोवओगप्पमो(गो) अप्पा ॥ ६७ ॥

सं. देहा वा द्रविणानि वा सुखदुःखे वाथ शत्रुमित्रजनाः ।
जीवस्य न संति ध्रुवाः ध्रुव उपयोगात्मक आत्मा ॥ ६७ ॥

गा. जो एवं जाणित्ता झादि परं अप्पगं विसुद्धप्पा ।
सागारो णागारो खवेदि सो मोहदुग्गंठिं ॥ ६८ ॥

सं. य एवं ज्ञात्वा ध्यायति परमात्मानं विशुद्धात्मा ।
साका(गा)रो नाका(गा)रः क्षपयति स मोहदुर्ग्रंथिं ॥ ६८ ॥

गा. जो णिहदमोहगंठी रागपदोसो खविय सामण्णे ।
होज्जं समसुहदुक्खो सो सोक्खं अक्खयं लहदि ॥ ६९ ॥

सं. यो निहतमोहग्रंथीः रागद्वेषौ क्षपयित्वा श्रामण्ये ।
भवेत्समसुखदुःखः स सौख्यमक्षयं लभते ॥ ६९ ॥

गा. जो खविदमोहकलुसो विसयविरत्तो मणो निरुंझित्ता ।
समवट्ठिदो सहावे सो अप्पाणं हवदि ज्झादा ॥ ७० ॥
सं. यः क्षपितमोहकलुषो विषयविरक्तो मनो निरुंध्य ।
समवस्थितः स्वभाव स आत्मानं भवति ध्याता ॥ ७० ॥

गा. आपिच्छ(च्छ) बंधुवग्गं विमोइदो गुरुकलत्तपुत्तेहिं ।
आसिज्ज णाणदंसणचरित्ततववीरियायारे ॥ १ ॥
सं. आपृच्छ्य बंधुवर्गं विमोचितो गुरुकलत्रपुत्रैः ।
आसद्य ज्ञानदर्शनचारित्रतपोवीर्याचारं (रान्) ॥१॥
गा. जध जादरूवजादं उप्पाडिदकेसमंसुगं सुद्धं ।
रहिदं हिंसादी(दी)दो अप्पडिकम्मं हवदि लिंगं ॥ ४ ॥
मुच्छा(च्छा)रंभविजुत्तं जुत्तं उवओगजोगसुद्धीहिं ।
लिंगं ण परावेक्खं अपुणब्भवकारणं जोन्हं(जेनं) ॥५॥
सं. यथा जातरूपजातमुत्पाटितकेशश्मश्रुकं शुद्धं ।
रहितं हिंसादितोऽप्रतिकर्म भवति लिंगं ॥४॥
मूर्छारंभवियुक्तं युक्तमुपयोगयोगशुद्धिभ्यां ।
लिंगं न परापेक्षमपुनर्भवकारणं जैनं ॥५॥
गा. आदाय तं पि लिंगं गुरुणा परमेण तं णमंसित्ता ।
सोच्चा सवदं किरिया(यां) उवट्ठिदो होदि सो समणो ॥६॥
सं. आदाय तदपि लिंगं गुरुणा परमेण तं नमस्कृत्य ।
श्रुत्वा सव्रतां क्रियामुपस्थितो भवति स श्रमणः ॥ ६ ॥
गा. वदसमदिंदियरोधो लोचावस्सयकमचेलमण्हाणं ।
खिदिसयणमदंतवणं बि(छि or त्थि)दिभोयणमेयभत्तं च ॥ ७ ॥
एदे खलु मूलगुणा समणाणं जिणवरेहिं पन्नत्ता ।
तेसु पमत्तो समणो छेदोवट्ठावगोहोदि ॥ ८ ॥
सं. व्रतसमतींद्रियरोधो लोचावश्यकमचेलमस्नानं ।
क्षितिशयनमदंतधावण(न)स्थितिभोजनमेकभक्तं च ॥ ७ ॥
एते खलु मूलगुणाः श्रमणानां जिनवरैः प्रज्ञप्ताः ।
तेषु प्रमत्तः श्रमणश्छेदोपस्थापको भवति ॥ ८ ॥
गा. पयदम्हि समारद्धे छेदो समणस्स कायचेट्ठम्मि ।
जायदि जदि तस्स पुणो आलोयणपुव्विया किरिया ॥ १० ॥
छेदुवजुत्तो समणो समणं ववहारिणं जिणमदम्मि ।
आसेज्जालोचित्ता उवदिट्ठं तेण कायव्वं ॥ ११ ॥

सं. प्रयतायां समारब्धायां छेदः श्रमणस्य कायचेष्टायां ।
जायते यदि तस्य पुनरालोचनपूर्विका क्रिया ॥ १० ॥
छेदोपयुक्तः श्रमणः श्रमणं व्यवहारिणं जिनमते ।
आसाद्यालोच्योपदिष्टं तेन कर्तव्यं ॥ ११ ॥

गा. अधिवासे व विवासे छेदविहूणो भवोय सामण्णे ।
समणो विहरदु णिच्चं परिहरमाणो णिबंधाणि ॥ १२ ॥

सं. अधिवासे वा विवासे छेदविहीनो भूत्वा श्रामण्ये ।
श्रमणो विहरतु नित्यं परिहरमाणो निबंधान् ॥ १२ ॥

गा. चरदि णिबद्धो णिच्चं समणो णाणम्मि दंसणमुहम्मि ।
पयदो मूलगुणेसु य जो सो पडिपुण्णसामण्णो ॥ १३ ॥

सं. चरति निबद्धो नित्यं श्रमणो ज्ञाने दर्शनमुखे ।
प्रयतो मूलगुणेषु च यः स परिपूर्णश्रामण्यः ॥ १३ ॥

गा. हवदि व ण हवदि बंधो मदे हिं जीवेध कायचेट्ठम्मि ।
बंधो धुवमुवधीदो इदि सवणा छड्डिया सव्वं ॥ १८ ॥

सं. भवति वा न भवति बंधो मृते हि जीवेथ कायचेष्टायां ।
बंधो ध्रुवमुपधित इति श्रमणास्त्यक्तवंतः सर्वं ॥ १८ ॥

गा. ण हि णिरवेक्खो चाऊ ण हवदि भिक्खुस्स आसयविसुद्धी ।
अविसुद्धस्स य चित्ते कहं णु कम्मक्खयो विहिऊ ॥ १९ ॥

सं. न हि निरपेक्षस्त्यागो न भवति भिक्षोराशयविशुद्धिः ।
अविशुद्धस्य च चित्ते कथं नु कर्मक्षयो विहितः ॥ १९ ॥

गा. छेदो जेण ण विज्जदि गहणविसग्गेसु सेवमाणस्स ।
समणो तेणिह वट्टदु कालं खेत्तं वियाणित्ता ॥ २१ ॥

सं. छेदो येन न विद्यते ग्रहणविसर्गेषु सेवमानस्य ।
श्रमणस्तेनेह वर्ततां कालं क्षेत्रं विज्ञाय ॥ २१ ॥

गा. उवयरणं जिणमग्गे लिंगं जह जादरूवमिदि भणिदं ।
गुरुवयणं पियविणऊ सुत्तज्झयणं च पण्णत्तं ॥ २४ ॥

सं. उपकरणं जिनमार्गे लिंगं यथा जातरूपमिति भणितं ।
गुरुवचनमपि च विनयः सूत्राध्ययनं च प्रज्ञप्तं ॥ २४ ॥

गा. इहलोगनिरवेक्खो अप्पडिबद्धो परम्मि लोह(ग)म्मि ।
जुत्ताहारविहारो रहिदकसाओ हवे समणो ॥ २५ ॥

सं. इहलोकनिरपेक्षोप्रतिबद्धः परस्मिल्लोके ।
युक्ताहारविहारो रहितकषायो भवेच्छ्रमणः ॥ २५ ॥

गा. जस्स अणेसणमप्पा तं पि तओ तप्पडिच्छगा समणा ।

अण्णं भिक्कमणेसणमध ते समणा अणाहारा ॥ २६ ॥
सं. यस्यानेषण आत्मा तदपि तपस्तप्तप्रेष(प्रतीष)काः श्रमणाः ।
अन्यद्वैक्ष्यमनेषणमथ ते श्रमणा अनाहाराः ॥ २६ ॥
गा. केवलदेहो समणो देहे ण ममेत्ति रहिदपरिकम्मो ।
आउत्तो तं तवसा अणिगूहं अप्पणो सत्तिं ॥ २७ ॥
सं. केवलदेहः श्रमणो देहे न ममेति रहितपरिकर्मा ।
आयुक्तवांस्तं तपसानिगूहन्नात्मनः शक्तिं॥ २७ ॥

गा. एयग्गगदो समणो एयग्गं णिच्छिदस्स अत्थेसु ।
णिच्छित्ती आगमदो आगमचेट्ठा तदो जेट्ठा ॥ १ ॥
सं. ऐकाग्र्यगतः श्रमण ऐकाग्र्यं निश्चितस्यार्थेषु ।
निश्चित्तिरागमत आगमचेष्टा ततो ज्येष्ठा ॥ १ ॥
गा. आगमहीणो समणो णेवप्पाणं परं वियाणादि ।
अविजाणंतो अत्थे खवेदि कम्माणि किध भिक्खु ॥ २ ॥
सं. आगमहीनः श्रमणो नैवात्मानं परं विजानाति ।
अविजानन्नर्थान्क्षपयति कर्माणि कथं भिक्षुः ॥ २ ॥
गा. सव्वे आगमसिद्धा अत्था गुणपज्जयेहिं चित्तेहिं ।
जाणंति आगमेण हि पेच्छि(पेच्छि)त्ता ते वि ते समणा ॥ ४ ॥
सं. सर्वे आगमसिद्धा अर्था गुणपर्यायैश्चित्रैः ।
जानंत्यागमेन हि दृष्ट्वा तानपि ते श्रमणाः ॥ ४ ॥
गा. आगमपुव्वा दिट्ठी ण हवदि जस्सेह संजमो तस्स ।
णत्थित्ति भणइ सुत्तं असंजदो हवदि किध समणो ॥ ५ ॥
सं. आगमपूर्वा दृष्टिर्न भवति यस्येह संयमस्तस्य ।
नास्तीति भणति सूत्रमसंयतो भवति कथं श्रमणः ॥ ५ ॥
गा. णहि आगमेण सिज्झदि सद्दहणं जदि ण अत्थि अत्थेसु ।
सद्दहमाणो अत्थे असंजदो वा ण णिव्वादि ॥ ६ ॥
सं. नह्यागमेन सिध्यति श्रद्धानं यदि नास्त्यर्थेषु ।
श्रद्दधानोप्यर्थानसंयतो वा न निर्वाति ॥ ६ ॥
गा. परमाणुपमाणं वा मुच्छा देहादियेसु जस्स पुणो ।
विज्जदि जदि सो सिद्धिं ण लहइ सव्वागमधरो वि ॥ ८ ॥
सं. परमाणुप्रमाणं वा मूर्छा देहादिकेषु यस्य पुनः ।
विद्यते यदि स सिद्धिं न लभते सर्वागमधरोपि ॥ ८ ॥
गा. पंचसमिदो तिगुत्तो पंचेंदियसंवुदो जिदकसाओ ।

दंसणणाणसमग्गो समणो संजदो भणिदो ॥ ९ ॥

सं. पंचसमितिस्त्रिगुप्तः पंचेंद्रियसंवृतो जितकषायः ।
दर्शनज्ञानसमग्रः श्रमणः स संयतो भणितः ॥ ९ ॥

गा. समसत्तुबंधुवग्गो समसुहदुक्खो पसंसणिंदसमो ।
समलोठकंचणो पुण जीविदमरणे समो समणो ॥ १० ॥

सं. समशत्रुबंधुवर्गः समसुखदुःखः प्रशंसानिंदासमः ।
समलोष्टकांचनः पुनर्जीवितमरणे समः श्रमणः ॥ १० ॥

अंतिमाः पंच गाथाः ।

गा. जे अजधागहिदत्था एदे तच्चत्ति णिच्छिदा समये ।
अच्चंतफलसमिद्धं भमंति तेतो परं कालं ॥ १ ॥

सं. ये अयथागृहीतार्था एते तत्त्वमिति निश्चिताः समये ।
अत्यंतफलसमृद्धं भ्रमंति तेतः परं कालं ॥ १ ॥

गा. अजधाचारविजुत्तो जधत्थपदणिच्छिदो पसंतप्पा ।
अफले चिरं न जीवदि इह सो संपुण्णसामण्णो ॥ २ ॥

सं. अयथाचारवियुक्तो यथार्थपदनिश्चितः प्रशांतात्मा ।
अफले चिरं न जीवति इह स संपूर्णश्रामण्यः ॥ २ ॥

गा. सम्मं विदितपदत्था चत्ता उवधिं वहित्थमज्झत्थं ।
विसयेसु णावसत्ता जे ते सुद्धत्ति णिद्दिट्ठा ॥ ३ ॥

सं. सम्यग्विदितपदार्थास्त्यक्त्वोपाधिं बहिस्थमध्यस्थं ।
विषयेषु नावसक्ता ये ते शुद्धा इति निर्दिष्टाः ॥ ३ ॥

गा. सुद्धस्स य सामण्णं भणियं सुद्धस्स दंसणं णाणं ।
सुद्धस्त य निव्वाणं सो चिय सिद्धो णमो तस्स ॥ ४ ॥

सं. शुद्धस्य च श्रामण्यं भणितं शुद्धस्य दर्शनं ज्ञानं ।
शुद्धस्य च निर्वाणं स एव सिद्धो नमस्तस्मै ॥ ४ ॥

गा. बुज्झदि सासणमेयं सागाराणायारचरियया जुत्तो ।
जो सो पवयणसारं लहुणा कालेण पप्पोदि ॥ ९ ॥

सं. बुध्यते शासनमेतत्सागारानागारचर्यया युक्तः ।
यः स प्रवचनसारं लघुना कालेन प्राप्नोति ॥ ९ ॥

From a Ms. recently purchased.

अंते ।

मूलग्रंथ करता भयौ कुंदकुंद मतिमांन । अमृतचंद टीका करी देवभाष परवान ॥१॥ जैसो करता मूलकौ तैसो टीकाकार । जाते अतिसुंदर मरम बरतैं प्रवचनसार ॥ २ ॥ सकल-तत्त्वप्रकासिनी तत्त्वदीपिका नाम । टीकासरसुती देखी की यह टीका अभिराम ॥ ३ ॥चौपई॥

बालबोध यह कीनी जैसें। सो तुम सुणहु कहूं मै तैसें। नगरआगरेमैं हितकारी। कौंरपाल ग्याता अविकारी ॥ ४ ॥ तिनि विचारि जियमै यह कीनी। जै भाषा यह होइ नवीनी। अलपबुधी भी अरथ बखानैं। अगम अगोचर पद यह चानैं ॥ ५ ॥ यह विचारि मनमैं तिनि राषी। पांडे हेमराजसौं भाषी। आगैं राजमल्लनैं कीनी। समयसार भाषा रस लीनी ॥ ६ ॥ अब जौ प्रवचनकी व्है भाषा। तौ जिनधर्म्म बधैं सौ शाषा। तातैं करहु विलंब न कीजैं। परभावना अंग फल लीजैं ॥ ७ ॥ सोरठा। निज सुबोध अनुसारि। जैसैं हित उपदेसर्यौ। रची भाषि अविकार। जैवंती प्रगटौ सदा ॥ ८ ॥ हेमराज हित आंनि। भविक जीवके हित भणी। जिनवरआंण प्रवांनि। भाषा प्रवचनकी करी ॥ ९ ॥ दोहरा। अवनीपति वंदै चरण। सुनैं कमल विहसंत। साहिजहां दिनकर उदैं। अरिगण तिमिर नसंत ॥ १० ॥ सत्रहसैं नव ओतरैं। माघमास सितपाष। पंचमि आदितवारकौं। पूरन कीन्ही भाष। इति श्रीप्रवचनसारसिद्धांतस्य बालावबोधटीका पंडितश्रीहेमराजविरचिता संपूर्णा ॥ संवत् १८०९ वर्षे पौषकृष्णे सप्तम्यां तिथौ बुधवासरे पं। श्रीमयाचंद्रेण

LLL. No. 297. *Dharmâmṛita with a commentary.*

धर्मामृतशास्त्रं।

मूलस्यांते।

अथ प्रशस्तिः ॥ श्रीमानस्ति सपादलक्षविषयः शाकंभरीभूषण-
स्तत्र श्रीरतिधाममंडलकरं नामास्ति दुर्गं महत्।
श्रीरत्न्यामुदपादि तत्र विमलव्याघ्रेरवालान्वया-
च्छ्रीसल्लक्षणतो जिनेंद्रसमयश्रद्धालुराशाधरः ॥ १ ॥
सरस्वत्यामिवात्मानं सरस्वत्यामजीजनत्।
यः पुत्रं छाहडं गुण्यं रंजितार्जुनभूपतिं ॥ २ ॥
व्याघ्रेरवालवरवंशसरोजहंसः
काव्यामृतौघरसपानसुतृप्तगात्रः।
सल्लक्षणस्य तनयो नयविश्वचक्षु-
राशाधरो विजयतां कलिकालिदासः ॥ ३ ॥
इत्युदयसेनमुनिना कविसुहृदा योभिनंदितः प्रीत्या।
प्रज्ञापुंजोसीति च योभिहितो मदनकीर्तियतिपतिना ॥ ४ ॥
म्लेच्छेशेन सपादलक्षविषये व्याप्ते सुवृत्तक्षति-
त्रासाद्विंध्यनरेंद्रतोःपरिमलस्फुर्जत्त्रिवर्गौजसि।

---

१ ०मल्लक्षणतो Ms. of Trishashṭi.

प्राप्तो मालवमंडले बहुपरीवार:पुरीमावस-
न्यो धारामपठज्जिनप्रमितिवाक्शास्त्रे महावीरत: ॥ ५ ॥
आशाधर त्वं मयि विद्धि सिद्धं निसर्गसौदर्यमजर्यमार्यं ।
सरस्वतीपुत्रतया यदेतदर्थेपरं वाच्यमयं प्रपंच: ॥ ६ ॥
इत्युपश्लोकितो विद्वद्विल्हणेन कवीशिना ।
श्रीविंध्यभूपतिमहासांधिविग्राहिकेण य: ॥ ७ ॥
श्रीमदर्जुनभूपालराज्ये श्रावकसंकुले ।
जिनधर्मोदयार्थं यो नलकच्छपुरेवसत् ॥ ८ ॥
यो द्राग्व्याकरणाब्धिपारमनयच्छुश्रूषमाणान्न का-
न्षट्तर्कीपरमास्त्रमाप्य न यत: प्रत्यर्थिन: केक्षिपन् ।
चेरु: केस्खलितं न येन जिनवाग्दीपं पथि ग्राहिता:
पीत्वा काव्यसुधां यतश्च रसिकेष्वापु: प्रतिष्ठां न के ॥ ९ ॥
स्याद्वादविद्याविशदप्रसाद: प्रमेयरत्नाकरनामधेय: ।
तर्कप्रबंधो निरवद्यपद्यपीयूषपूरो वहति स्म यस्मात् ॥ १० ॥
सिद्धंयकं भरतेश्वराभ्युदयसत्काव्यं निबंधोज्ज्वलं
यस्त्रैविद्यकवींद्रमोदनसहं स्वश्रेयसेरीरचत् ।
योर्हद्वाक्यरसं निबंधरुचिरं शास्त्रं च धर्मामृतं
निर्माय न्यदधान्मुमुक्षुविदुषामानंदसांद्रे हृदि ॥ ११ ॥
राजीमतीविप्रलंभं नाम नेमीश्वरानुगं ।
व्यधत्त खंडकाव्यं य: स्वयंकृतनिबंधनं ॥ १२ ॥
आदेशात्पितुरध्यात्मरहस्यं नाम यो व्यधात् ।
शास्त्रं प्रसन्नगंभीरं प्रियमारब्धयोगिनां ॥ १३ ॥
यो मूलाराधनेष्टोपदेशादिषु निबंधनं ।
व्यधत्तामरकोशे च क्रियाकलापमुज्जगौ ॥ १४ ॥
रौद्रटस्य व्यधात्काव्यालंकारस्य निबंधनं ।
सहस्रनामस्तवनं सनिबंधं च योर्हतां ॥ १५ ॥
सनिबंधं यश्च जिनयज्ञकल्पमरीरचत् ।
त्रिषष्टिस्मृतिशास्त्रं यो निबंधालंकृतं व्यधात् ॥ १६ ॥
योर्हन्महाभिषेकार्चाविधिं मोहतमोरविं ।
चक्रे नित्यमहोद्द्योतं स्नानशास्त्रं जिनेशिनां ॥ १७ ॥
रत्नत्रयविधानस्य पूजामाहात्म्यवर्णकं ।
रत्नत्रयविधानाख्यं शास्त्रं वितनुते स्म य: ॥ १८ ॥
आयुर्वेदविदामिष्टं व्यक्तुं वाग्भटसंहितां ।

अष्टांगहृदयोद्द्योतं निबंधमसृजच्च यः ॥ १९ ॥
सोहमाशाधरोकार्षं टीकामेतां मुनिप्रियां ।
स्वोपज्ञधर्मामृतोक्तयतिधर्मप्रकाशिनीं ॥ २० ॥
शब्दे चार्थे च यत्किंचिदत्रास्ति स्खलितं मम ।
छद्मस्थभावात्संशोध्य सूरयस्तत्पठंत्विमां ॥ २१ ॥
नलकच्छपुरे पौरपौरस्त्यः परमार्हतः ।
जिनयज्ञगुणौचित्यकृपादानपरायणः ॥ २२ ॥
खंडिल्यान्वयकल्याणमाणिक्यं विनयादिमान् ।
साधुः पापाभिधः श्रीमानासीत्पापपराङ्मुखः ॥ २३ ॥
तत्पुत्रो बहुदेवोभूदाद्यः पितृभरक्षमः ।
द्वितीयः पद्मसिंहश्च पद्मालिंगितविग्रहः ॥ २४ ॥
बहुदेवात्मजाश्चासन्हरदेवः स्फुरद्गुणः ।
उदयी स्तंभदेवश्च त्रयस्त्रैवर्गिकादृताः ॥ २५ ॥
मुग्धबुद्धिप्रबोधार्थं महीचंद्रेण साधुना ।
धर्मामृतस्य सागारधर्मटीकास्ति कारिता ॥ २६ ॥
तस्यैव यतिधर्मस्य कुशाग्रीयधियामपि ।
सुदुर्बोधस्य टीकायै प्रसादः क्रियतामिति ॥ २७ ॥
हरदेवेन विज्ञप्तो धनचंद्रोपरोधतः ।
पंडिताशाधरश्चक्रे टीकां क्षोदक्षमामिमां ॥ २८ ॥
विद्वद्भिर्भव्यकुमुदचंद्रिकेत्याख्ययोदिता ।
द्विष्ठाप्याकल्पमेषास्तां चिंत्यमाना मुमुक्षुभिः ॥ २९ ॥
प्रमारवंशवार्धींदुदेवपालनृपात्मजे ।
श्रीमज्जैतुगिदेवेसिस्थाम्नावंतीनवत्यलं ॥ ३० ॥
नलकच्छपुरे श्रीमन्नेमिचैत्यालयेसिधत् ।
विक्रमाब्दशतेष्वेषा त्रयोदशसु कार्तिके* ॥ ३१ ॥
अनुष्टुप्छंदसामस्याः प्रमाणं द्विशताधिकैः ।
सहस्रैर्द्वादशभिर्तैर्विज्ञेयमनुमानतः ॥ १ ॥ ३२ ॥
अलमतिप्रसंगेन ॥
शांतिः शं तनुतां समस्तजगतः संगच्छतां धार्मिकैः
श्रेयः श्रीः परिवर्धतां नयधुराधुर्यो धरित्रीपतिः ।
सद्विद्यारसमुद्रिरंतु कवयो नामाप्यघस्यास्तु मा

---

*Com.: संवत्सरः ॥ १३०० वर्षे कार्तिकसुदि पंचम्यां सोमदिने शुभलग्ने ॥

प्रार्थ्यं वा कियदेक एव शिवकृद्धर्मो जयत्वर्हताम् ॥ ३३ ॥
इत्याशाधरविरचिता भव्यात्महरदेवानुमता धर्मामृतयतिधर्मटीका समाप्ता ॥

संवत् १५४९ वर्षे ज्येष्ठवदि १० श्रीमूलसंघे नन्द्याम्नाये बलात्कारगणे सरस्वतीगच्छे श्रीकुंदकुंदाचार्यान्वये भ०श्रीपद्मनंदिदेवास्तत्पट्टे भ०श्रीशुभचंद्रदेवास्तत्पट्टे भ०श्रीजिनचंद्रदेवास्तच्छिष्यमुनिश्रीरत्नकीर्तिस्तदाम्नाये खंडेलवालान्वये टौंग्यागोत्रे साधुश्रीमांगाभार्या पदी द्वितीया लाडी। तत्पुत्रास्त्रयो धीरा दानपूजाविचक्षणाश्च ऊधरनामा तद्भार्याऽतिवदेवीनाम्नी। द्वितीयः साधुपता। तृतीयः साधुराल्हा। पतीभार्या हिवासिरिनाम्नी। तत्पुत्राः सप्त। साधुमहिराजा। सीहाधामा। लाला। वाला। कान्हा। टीला। नामानः। राल्हाभार्या रइणा पुत्रधीना। एतेषां मध्ये साधुश्री ऊधरनाम्ना शास्त्रमिदं लेखयित्वा मुनिश्रीरत्नकीर्तये भक्तया विधिना प्रदत्तमिदं आचन्द्रार्कं स्थेयादातुर्ज्ञानं प्रवर्धतां श्रीसंघे मंगलं भवतु ॥

MMM. No. 294. *From the Tattvârthasâradîpaka.*

तत्त्वार्थसारदीपकः ।

अर्थैर्जिनमुखोत्पन्नं गणेंद्ररचितं गिरा ।
अंगपूर्वांगबाह्येषु यन्मतिज्ञानपूर्वकं ॥ ७३ ॥
तच्छ्रुतज्ञानमत्यर्थं लोकालोकार्थदीपकं ।
वक्ष्ये ज्ञानाय भव्यानां स्वपरात्मप्रकाशकं ॥ ७४ ॥
आचारांगं भवेद्विश्वयत्याचारप्ररूपकं ।
आद्यं समस्तमष्टादशसहस्रपदप्रमं (१८०००) ॥ ७५ ॥
सज्ज्ञानविनयच्छेदोपस्थापनक्रियादयः ।
यत्रोच्यंते द्वितीयांगं तत्सूत्रकृतनामकं ॥ ७६ ॥
स्यात्षट्त्रिंशत्सहस्राणां(णि?) (३६०००) पदसंख्या जिनोदितं ।
सर्वद्रव्यपदार्थानां निर्णयो यत्र कथ्यते ॥ ७७ ॥
स्थानांगं तद्द्विचत्वारिंशत्सहस्रपदप्रमम् (४२०००) ।
द्रव्यक्षेत्रद्विधाकालभावानां यत्र कोविदैः ॥ ७८ ॥
समानगणितादीश्च समसंख्या निगद्यते ।
समवायचतुःषष्टिसहस्रलक्षमस्ति तत् (१६४०००) ॥ ७९ ॥
अस्ति जीवोत्र किं नास्तीति कृतानां गणेशिना ।
षष्टिसहस्रप्रश्नानां प्रोत्तरं यत्र दीयते ॥ ८० ॥
जिनेंद्रध्वनिना व्याख्याप्रज्ञप्त्यंगं तदुच्यते ।

अष्टाविंशत्सहस्राग्राद्विलक्षपदसंख्यकं ॥ ८१ ॥
श्रीतीर्थेशगणेशानां नानाधर्मकथापराः ।
वर्ण्यंते यत्र भव्यानां धर्मसेवगमातृकाः ॥ ८२ ॥
ज्ञातृधर्मकथांगं तद्विश्वधर्मकथाकरं ।
षट्पंचाशत्सहस्राग्रपंचलक्षपदप्रमं ॥ ८३ ॥
श्रावकाणां क्रियाधर्मव्रतशीलादयोखिलाः ।
अत्रामुत्रार्थधर्माप्तयै यत्रोच्यंते गणाधिपैः ॥ ८४ ॥
शुभाचाराकरं तच्चोपासकाध्ययनाह्वयं ।
स्यात्सप्तातिसहस्रैकादशलक्षपदप्रमं ॥ ८५ ॥
प्रत्येकं सर्वतीर्थेशां तीर्थे दशदशप्रमाः ।
अंतकृत्केवलिनो यत्रोच्यंते धैर्यशालिनः ॥ ८६ ॥
घोरोपसर्गजेतारस्तदंतकृद्दशाभिधं ।
त्रयोविंशातिलक्षाष्टाविंशत्सहस्रसत्पदं ॥ ८७ ॥
सर्वेषु जिनतीर्थेषु प्रत्येकं दश योगिनः ।
जित्वा घोरोपसर्गादीन् श्रीपंचानुत्तरं गताः ॥ ८८ ॥
कथ्यंते यत्र चांगं तदनुत्तरौपपादिकं ।
नवद्विचतुरब्धित्रिशून्यांकसंख्यसत्पदं ॥ ८९ ॥
लक्षास्त्रिनवतिश्चैवाथ सहस्राणि षोडश ।
एतदंकप्रमाणांगं प्रश्नव्याकरणाख्यकं ॥ ९० ॥
बहुधा नष्टमुष्ट्यादीन्परप्रश्नं समादिशत् ।
कोटयेकचतुरशीतिलक्षसंख्यपदप्रमं ॥ ९१ ॥
शुभाशुभादिकर्मौघानां कृतानां च देहिनां ।
विपाकस्तवकांगं स्याद्विपाकसूत्रनामकं ॥ ९२ ॥
चतस्रः कोटयो लक्षाः पंचदशप्रमाणकाः ।
द्विसहस्राखिलांगानां पदसंख्येति कीर्तिता ॥ ९३ ॥
परिकर्म च सूत्रं प्रथमानुयोगनामकं ।
पूर्वगताह्वयं चूलिकेति पंचविधं भवेत् ॥ ९४ ॥
अंतिमं दृष्टिवादांगं क्रियावाद्यादिसूचकं ।
चंद्रस्यायुर्विभूत्याद्या यस्यां प्रोक्ता जिनाधिपैः ॥ ९५ ॥
चंद्रप्रज्ञप्तिसंज्ञा सा चंद्रगत्यादिसूचिका ।

षट्त्रिंशल्लक्षयुक्पंचसहस्रपदसंमिता ॥ ९६ ॥
लक्षाः पंच सहस्राणि त्रीणीति पदसंख्यका ।
सूर्यस्यायुःपरीवारचारक्षेत्रादिसंपदां ॥ ९७ ॥
सम्यग्निरूपिका सूर्यप्रज्ञप्तिरुच्यते बुधैः ।
पंचविंशत्सहस्रात्रिलक्षसत्पदसंमिता ॥ ९८ ॥
जंबूद्वीपकुलाद्रीणां भोगभूमीतरात्मनां ।
पृथक्प्ररूपिका जंबूद्वीपप्रज्ञप्तिरुच्यते ॥ ९९ ॥
स्यात्षट्त्रिंशत्सहस्रद्विपंचाशल्लक्षसत्पदा ।
असंख्यद्वीपवार्धीनां तिर्यक्स्थित्यादि भूभृतां ॥ १०० ॥
सम्यक्प्ररूपिका द्वीपवार्धिप्रज्ञप्तिरुत्तमा ।
लक्षाश्चतुरशीतिः षट्त्रिंशत्सहस्रसंयुता ॥ १ ॥
इति संख्यांकिता व्याख्याप्रज्ञप्तिः प्रतिपादिका ।
षड्द्रव्यलक्षणादीनां गुणपर्यायभाषणैः ॥ २ ॥
एका कोटी तथा लक्षा एकाशीतिः सहस्रकाः ।
पंचेति पदसंख्याढ्यं पंचधा परिकर्म च ॥ ३ ॥
कर्मणां कर्तृभोक्तृत्वादयो यत्रोदिता नृणां ।
तत्सूत्रं स्यात्पदं त्र्यष्टाशीतिलक्षपदप्रमं ॥ ४ ॥
स्यात्प्रथमानुयोगं पंचसहस्रपदप्रमं ।
सत्त्रिषष्टिशलाकापुरुषस्वरूपदेशकं ॥ ५ ॥
आद्यमुत्पादपूर्वं स्यात्कोट्येकपदमानकं ।
जीवादीनां किलोत्पादव्ययध्रौव्यादिसूचकं ॥ ६ ॥
अग्रायणीयपूर्वं षण्णवतिलक्षसत्पदं ।
अंगानामग्रभूतार्थप्रधानार्थप्ररूपकं ॥ ७ ॥
वीर्यप्रवादपूर्वं सप्ततिलक्षपदप्रमं ।
चक्रिकेवलिदेवेंद्रादीनां वीर्यदेशकं ॥ ८ ॥
अस्तिनास्तिप्रवादं स्यात्षष्टिलक्षपदप्रमं ।
द्रव्यपंचास्तिकायास्तिनास्त्यादिनयभाषकं ॥ ९ ॥
ज्ञानप्रवादपूर्वं चैकोनकोटीपदप्रमा ।
पंचज्ञानत्रिकाज्ञानोत्पत्त्याधारादिदेशकं ॥ १० ॥

सत्यप्रवादपूर्वं षडग्रकोटीपदप्रमं ।
वाग्गुप्तिसूनृतासत्यादीनां सूचकमंजसा ॥ ११ ॥
आत्मप्रवादपूर्वं षड्विंशकोटीपदप्रमं ।
जीवानां कर्मकर्तृत्वभोक्तृत्वादिनिरूपकं ॥ १२ ॥
एका(कः)कोट्यधिकाशीतिलक्षसत्पदसंमितं ।
कर्मप्रवादपूर्वं स्यात्कर्मणां सूचकं नृणां ॥ १३ ॥
बंधोदयशमादीनां निर्जरानुभवात्मनां ।
चतुर्भिराधिकाशीतिलक्षसंख्यपदप्रमं ॥ १४ ॥
प्रत्याख्यानाव्हयं पूर्वं प्रत्याख्यानस्य धीमतां ।
व्रतानां नियमादिस्वरूपाणां च प्ररूपकं ॥ १५ ॥
विद्यानुवादमेका(कः)कोटीदशलक्षसत्पदं ।
सर्वविद्यानिमित्ताद्यष्टांगनिमित्तसूचकं ॥ १६ ॥
कल्याणनामधेयं षड्विंशकोटीपदप्रमं ।
सत्त्रिषष्टिशलाकापुरुषकल्याणदेशकं ॥ १७ ॥
प्राणावायं भवेत्कोटीनां त्रयोदशसत्पदं ।
प्राणायानचिकित्सादिप्रतिपादकमंगिनां ॥ १८ ॥
क्रियाविशालपूर्वं स्यान्नवकोटिपदप्रमं ।
छंदोलंकारसत्काव्यं कलागुणादिदेशकं ॥ १९ ॥
द्विषट्कोट्यग्रपंचाशल्लक्षसत्पदमानकं ।
स्याल्लोकबिंदुसारांख्यं मोक्षमार्गादिसूचकं ॥ २० ॥
पंचाग्रनवतिः कोट्यो लक्षाः पंचाशदेव हि ।
पंचेति सर्वपूर्वाणां पदसंख्यास्ति पिंडिता ॥ २१ ॥
द्वे कोट्यौ नव लक्षाणि नवाशीतिसहस्रकाः ।
द्वे शतेत्रेति चांकोक्तपदसंख्यासमन्विता ॥ २२ ॥
आद्या जलगताभिख्या चूलिकास्ति निरूपिका ।
जलेषु गमनस्तंभनादि सन्नादिकात्मनः ॥ २३ ॥
एतावत्पदसंख्या चूलिका स्थलगताभिधा ।
धरागमनसन्मंत्रतंत्रादिप्रतिपादिका ॥ २४ ॥
तावत्पदप्रमा मायागतारव्या चूलिका स्मृता ।

इंद्रजालादिहेतूनां मंत्रवादादिसूचिका ॥ २५ ॥
पूर्वोक्तपदसंख्या चूलिका रूपगताह्वया ।
नानाव्याघ्रेभरूपादिकर्तृविद्यादिदेशिका ॥ २६ ॥
तत्प्रामाण्यपदाख्या चूलिकाकाशगता मता ।
आकाशगमनादीनां मंत्रतंत्रादिसूचिका ॥ २७ ॥
दश कोट्यश्च लक्षाण्येकोनपंचाशदेव हि ।
सहस्राः षट्चत्वारिंशत्पदसंख्येति चूलिका ॥ २८ ॥
अष्टोत्तरशतकोट्योष्टषष्टिलक्षसंख्यकाः ।
षट्पंचाशत्सहस्राणि पंचेति पदसंमिता ॥ २९ ॥
संख्या पिंडीकृता प्रोक्ता श्रीगणेशैर्जिनागमे ।
दृष्टिवादाख्यपूर्वस्यांतिमस्य पंचधात्मनः ॥ ३० ॥
द्विषट्कोट्यः शताग्राख्यशीतिलक्षाः सहस्रकाः ।
अष्टपंचाशदेवाथ पंचेति चांकसंख्यया ॥ ३१ ॥
पिंडीकृतानि सर्वाणि पदानि स्युर्जिनागमे ।
समस्तद्वादशांगानां रचितानां गणेशिना ॥ ३२ ॥
शतषोडशकोट्योथ चतुस्त्रिंशच्च कोटयः ।
त्र्यशीतिप्रमलक्षाण्यष्टसप्ततिशतानि च ॥ ३३ ॥
अष्टाशीत्यक्षराणीत्यक्षरसंख्या जिनोदिता ।
पदैकस्य पृथग्भूता पदेषु सकलेषु च ॥ ३४ ॥
उत्पादाख्यादिमे पूर्वे वस्तूनि दश संति च ।
अग्रायणीयपूर्वे स्युर्वस्तून्येव चतुर्दश ॥ ३५ ॥
वस्तून्यष्ट तृतीये पूर्वेष्टादश चतुर्थके ।
द्वे षड्वस्तूनि पूर्वे पंचमे षष्ठे च द्वादश ॥ ३६ ॥
सप्तमे षोडशैव स्युरष्टमे तानि विंशतेः ।
पूर्वे च नवमे त्रिंशद्दशमे प्रोदितानि च ॥ ३७ ॥
पूर्वे पंचदशैवं स्युर्वस्तूनि श्रीजिनागमे ।
प्रत्येकं दश वस्तूनि शेषपूर्वचतुष्टये ॥ ३८ ॥
पंचनवतिसंयुक्तं शतं वस्तूनि संति च ।
सर्वद्विसप्तपूर्वाणां पिंडीकृतानि पिं(पं)डितैः ॥ ३९ ॥
प्रत्येकं कृत्स्नवस्तूनां प्राभृताः कथिता जिनैः ।
जैनागमे समाना विंशतिविंशतिसंख्यकाः ॥ ४० ॥

तेषां समस्तवस्तूनां प्राभृताः कीर्तिता बुधैः ।
मेलिताख्रिसहस्राः संयुक्ता नवशतैः श्रुते ॥ ४१ ॥
सामायिकं चतुर्विंशतिस्तवौ(वो)वंदनां ततः ।
प्रतिक्रमणसंज्ञं वैनयिकं कृतिकर्म चैं ॥ ४२ ॥
दशवैकालिकाभिख्यमुत्तराध्ययनाव्हयं ।
कल्पादिव्यवहारोथ कल्पाकल्पाविधानकं ॥ ४३ ॥
महाकल्पाभिधानं च पुंडरीकसमाव्हयं ।
महादिपुंडरीकाख्यमशीतिकसमाख्यकं ॥ ४४ ॥
इमान्यत्रांगबाह्यानि प्रकीर्णकानि चागमे ।
चतुर्दशाल्पबुद्धीनां बोधाय रचितान्यपि ॥ ४५ ॥
अष्ट कोट्योथ लक्षैकोष्टसहस्रास्तथा शतं ।
पंचसप्ततिरेवेति पदसंख्या जिनोदिता ॥ ४६ ॥
चतुर्दशप्रकीर्णानां सर्वेषां पिंडितागमे ।
एतत्सर्वं श्रुतज्ञानं ज्ञेयं विश्वार्थदीपकं ॥ ४७ ॥
एतज्ज्ञानसुधारसं निरुपमं जन्मादिदाहापह-
मंतातीतगुणार्णवं सुविमलं मोहारिवर्ज्जं परं
श्रीसर्वज्ञमुखेंदुनिर्गतमिहामुत्रातिशर्मावहं
दक्षाः कर्णपुटैः पिबंतु सततं दुष्कर्मशांत्यै चिदे(ति?) ॥ ४८ ॥
श्रुतमपि मतिपूर्वं विश्वनेत्रं समस्तं रहितनिखिलदोषं स्वर्गमोक्षैकहेतुं ।
त्रिजगति वरदीपं ध्वस्तकुज्ञानजालं मम भवतु मयेऽयं पंचसज्ज्ञानसिद्धयै ॥१४९॥
इतिश्रीतत्त्वार्थसारदीपकमहाग्रंथे मतिश्रुतज्ञानभेदप्ररूपको नाम प्रथमोध्यायः ॥१॥

NNN. No. 290. *Kârtikeyânupreksha—Adhikâra XII.*

कार्तिकेयानुप्रेक्षा । द्वादशोधिकारः ।

जो जाणदि पच्चक्खं तियालगुणपज्जएहिं संजुत्तं ।
लोयालोयं सयलं सो सव्वण्हू हवे देवो ॥ ३०२ ॥
जदि ण हवदि सव्वण्हू ता को जाणदि अदींदियं अत्थं ।
इंदियणाणं ण मुणदि थूलं पि असेसपज्जायं ॥ ३०३ ॥
तेणुवइट्ठो धम्मो संगासत्ताण तह असंगाणं ।
पढमो वारहभेओ दसभेओ भासिओ विदिओ ॥ ३०४ ॥
सम्मद्दंसणसुद्धो रहिओ मज्जाइथूलदोसेहिं ।
वयधारी सामाइओ पव्ववई पासुआहारी ॥ ३०५ ॥

राईभोयणविरओ मेहुणसारंभसंगचत्तो य ।
कज्जाणुमोयविरओ उद्दिट्ठाहारविरदो य ॥ ३०६ ॥
चदुगदिभव्वो सण्णी सुविसुद्धो जग्गमाणपज्जत्तो ।
संसारतडे णियडो णाणी पावेइ सम्मत्तं ॥ ३०७ ॥
सत्तण्हं पयडीणं उवसमदो होदि उवसमं सम्मं ।
खयदो य होइ खइयं केवलिमूले मणुस्सस्स ॥ ३०८ ॥
अणउदयादो छण्हं सजाइरूवेण उदयमाणाणं ।
सम्मत्तकम्मउदए खयओवसमियं हवे सम्मं ॥ ३०९ ॥
गिण्हदि मुंचदि जीवो बे सम्मत्ते असंखवाराओ ।
पढमकसायविणासं देसवयं कुणदि उक्कस्सं ॥ ३१० ॥
जो तच्चमणेयंतं णियमा सद्दहदि सत्तभंगेहिं ।
लोयाण पण्हवसादो ववहारपवत्तणट्ठं च ॥ ३११ ॥
जो आयरेण मण्णदि जीवाजीवादिणवविहं अत्थं ।
सुदणाणेण णएहिं य सो सद्दिट्ठी हवे सुद्धो ॥ ३१२ ॥
जो ण य कुव्वदि गव्वं पुत्तकलत्ताइसव्वअत्थेसु ।
उवसमभावे भावदि अप्पाणं मुणदि तिणमित्तं ॥ ३१३ ॥
विसयासत्तो विसया सव्वारंभेसु वड्ढमाणो वि ।
मोहविलासो एसो इदि सव्वं मण्णदे हेयं ॥ ३१४ ॥
उत्तमगुणगहणरओ उत्तमसाहूण विणयसंजुत्तो ।
साह(हु?)म्मि य अणुराई सो सद्दिट्ठी हवे परमो ॥ ३१५ ॥
देहमिलियं पि जीवं णियणाणगुणेण मुणदि जो भिण्णं ।
जीवविलियं पि देहं कंचुउ(अ?)सरिसं वियाणेइ ॥ ३१६ ॥
णिज्जियदोसं देवं सव्वजीवाण दयावरं धम्मं ।
वज्जियगंथं च गुरुं जो मण्णदि सो हु सद्दिट्ठी ॥ ३१७ ॥
दोससहियं पि देवं जीवहिंसाइसंजुदं धम्मं ।
गंथासत्तं च गुरुं जो मण्णदि सो हु कुद्दिट्ठी ॥ ३१८ ॥
ण य कोवि दोदि लच्छीं ण कोइ जीवस्स कुणइ उवयारं ।
उवयारं अवयारं कम्मं पि सुहासुहं कुणदि ॥ ३१९ ॥
भत्तीए पुज्जमाणो वितरदेवो विदेदि जदि लच्छीं ।
तो किं धम्मं कीरदि एवं चिंतेइ सद्दिट्ठी ॥ ३२० ॥
जं जस्स जम्मि देसे जेण विहाणेण जम्मि कालम्हि ।
णादं जिणेण णियदं जम्मं वा अहव मरणं वा ॥ ३२१ ॥

तं तस्स तम्मि देसे तेण विहाणेण तम्हि कालम्मि ।
को सक्कइ चालेदुं इंदो वा अह जिणिंदो वा ॥ ३२२ ॥
एवं जो णिच्छयदो जाणादि दव्वाणि सव्वपज्जाए ।
सो सद्दिट्ठी सुद्धो जो संकादि सो हु कुदिट्ठी ॥ ३२३ ॥
जो ण विजाणइ तच्चं सो जिणवयणे करेदि सद्दहणं ।
जं जिणवरेहिं भणियं तं सव्वमह समिच्छामि ॥ ३२४ ॥
रयणाण महारयणं सव्वजोयाण उत्तमं जोयं ।
रिद्धीण महारिद्धी सम्मत्तं सव्वसिद्धियरं ॥ ३२५ ॥
सम्मत्तगुणपहाणो देविंदणरिंदवंदिओ होदि ।
चत्तवयो चिय पावदि सग्गसुहं उत्तमं विविहं ॥ ३२६ ॥
सम्माइट्ठी जीवो दुग्गदिहेदुं ण बंधदे कम्मं ।
जं बहु भवेसु बद्धं दुष्क(रूक)म्मं तं पि णासेदि ॥ ३२७ ॥
बहुतससमण्णिदं जं मज्जं मंसादि णिंदिदं दव्वं ।
जो ण य सेवदि णियमा सो दंसणसावओ होदि ॥ ३२८ ॥
दिढचित्तो जो कुव्वदि एवं पि वयणियाणपरिहीणो ।
वेरग्गभावियमणो सो वि य दंसणगुणो होदि ॥ ३२९ ॥
पंचाणुवयधारी गुणवयसिक्खावएहिं संजुत्तो ।
दिढचित्तो समजुत्तो णाणी वयसावओ होदि ॥ ३३० ॥
जो वाव(वा?)रइ सदओ अप्पाणसमं परं पि मण्णंतो ।
णिंदणगरहणजुत्तो परिहरमाणो महारंभे ॥ ३३१ ॥
तसघादं जो ण करदि मणवयकाएहिं णेव कारयदि ।
कुव्वंतं पि ण इच्छदि पढमवयं जायदे तस्स ॥ ३३२ ॥
हिंसावयणं ण वयदि कक्कसवयणं पि जो ण भासेदि ।
णिट्ठुरवयणं पि तहा ण भासदे गुज्जवयणं पि ॥ ३३३ ॥
हिदमिदवयणं भासादि संतोसकरं तु सव्वजीवाणं ।
धम्मपयासणवयणं अणुव्वदी हवदि सो विदिओ ॥ ३३४ ॥
जो बहुमुल्लं वत्थुं अप्प[य?]मुल्लेण णेय गिण्हेदि ।
वीसरियं पि ण गिण्हदि लाहे थूवेहि तूसेदि ॥ ३३५ ॥
जो परदव्वं ण हरदि मायालोहेण कोहमाणेण ।
दिढचित्तो सुद्धमई अणुव्वई सो हवे तिदिओ ॥ ३३६ ॥
असुइमयं दुग्गंधं महिलादेहं विरच्चमाणो जो ।
रूवं लावण्णं पि य मणमोहणकारणं मुणइ ॥ ३३७ ॥

जो मण्णदि परमहिलं जणणीबहिणीसुआइसारिच्छं ।
मणवयणे कायेण वि बंभवई सो हवे थूओ ॥ ३३८ ॥
जो लोहं णिहणित्ता संतोसरसायणेण संतुट्ठो ।
णिहणदि तिण्हा दुट्ठा मण्णंतो विणस्सरं सव्वं ॥ ३३९ ॥
जो परिमाणं कुव्वदि धणधण्णसुवण्णखित्तमाईणं ।
उवओगं जाणित्ता अणुव्वयं पंचमं तस्स ॥ ३४० ॥
जह लोहणासणट्ठं संगपमाणं हवेइ जीवस्स ।
सव्वं दिसिसु पमाणं तह लोहं णासए णियमा ॥ ३४१ ॥
जं परिमाणं कीरदि दिसाण सव्वाण सुप्पसिद्धाणं ।
उवओगं जाणित्ता गुणव्वदं जाण तं पढमं ॥ ३४२ ॥
कज्जं किं पि ण साहदि णिच्चं पावं करेदि जो अत्थो ।
सो खलु हवे अणत्थो पंचपयारो वि सो विविहो ॥ ३४३ ॥
परदोसाणं गहणं परलच्छीणं समीहणं जं च ।
परइत्थीआलोओ परकलहालोयणं पढमं ॥ ३४४ ॥
जो उवएसो दिज्जदि किसिपसुपालणवणिज्जपमुहेसु ।
पुर(रि)सित्थीसंजोए अणत्थदंडो हवे विदिओ ॥ ३४५ ॥
विहलो जो वावारो पुढवीतोयाण अग्गिपवणाणं ।
तह वि वणप्फदिछेओ अणत्थदंडो हवे तिदिओ ॥ ३४६ ॥
मज्जारपहुदिधरणं आउधलोहादिविक्कणं जं च ।
लक्काखलादिगहणं अणत्थदंडो हवे तुरिओ ॥ ३४७ ॥
जं सवणं सत्थाणं भंडणवसियरणकामसत्थाणं ।
परदोसाणं च तहा अणत्थदंडो हवे चरिमो ॥ ३४८ ॥
एवं पंचपयारं अणत्थदंडं दुहावहं णिच्चं ।
जो परिहरेइ णाणी गुणव्वदी सो हवे विदिओ ॥ ३४९ ॥
जाणित्ता संपत्तीभोयणतंबोलवत्थमाईणं ।
जं परिमाणं कीरदि भोउवभोयं वयं तस्स ॥ ३५० ॥
जो परिहरेइ संतं तस्स वयं थुव्वदे सुरिंदेहिं ।
जो मणुलड्डुव भक्खदि तस्स वयं अप्पसिद्धिकरं ॥ ३५१ ॥
सामाइयस्स करणे खेत्तं कालं च आसणं विलउ ।
मयवयणकायसुद्धी णायव्वा हुंति सत्तेव ॥ ३५२ ॥
जत्थ ण कलयलसद्दं बहुजणसंघट्टणं ण जत्थत्थि ।
जत्थ ण दंसादीया एस पसत्थो हवे देसो ॥ ३५३ ॥

पुव्वण्हे मज्झण्हे अवरण्हे तिहिवि णालियाछक्को ।
सामाइयस्स कालो सविणयणिस्सेसणिद्दिट्ठो ॥ ३९४ ॥
बंधित्ता पज्जंकं अहवा उद्धेण ओभउ ठिच्चा ।
कालपमाणं किच्चा इंदि[अ]वावारवज्जिदो होउं ॥ ३९५ ॥
जिणवयणेयग्गमणो सपुंडकाओ य अंजलिं किच्चा ।
ससरूवे संलीणो वंदणअत्थं विचिंतंतो ॥ ३९६ ॥
किच्चा देसपमाणं सव्वं सावज्जवज्जिदो होउं ।
जो कुव्वदि सामइयं सो मुणिसरिसो हवे सावउ ॥ ३९७ ॥
ण्हाणविलेवणभूसणइत्थीसंसग्गगंधधूवदीवादि ।
जो परिहरेदि णाणी वेरग्गाभरणभूसणं किच्चा ॥ ३९८ ॥
दोसु वि पव्वेसु सया उववासं एयभत्तणिव्वियडी ।
जो कुणादि एवमाई तस्स वयं पोसहं विदियं ॥ ३९९ ॥
तिविहे पत्तम्हि सया सद्धाइगुणेहिं संजुदो णाणी ।
दाणं जो देदि सयं णवदाणावहीहिं संजुत्तो ॥ ४०० ॥
सिक्खावयं च तइयं तस्स हवे सव्वसिद्धिसोक्खयरं ।
दाणं चउव्विहं पि य सव्वे दाणाण सारयरं ॥ ४०१ ॥
भोयणदाणेण सोक्खं ओसहदाणेण सत्थदाणं च ।
जीवाण अभयदाणं सुदुल्लहं सव्वदाणाणं ॥ ४०२ ॥
भोयणदाणे दिण्णे तिण्णि वि दाणाणि होंति दिण्णाणि ।
भुक्कतिसाए वाही दिणे दिणे होंति देहीणं ॥ ४०३ ॥
भोयणबलेण साहू सत्थं सेवदि रत्तिदिवहं पि ।
भोयणदाणे दिण्णे पाणा विय रक्खिया होंति ॥ ४०४ ॥
इहपरलोयणिरीहो दाणं जो देदि परमभत्तीए ।
रयणत्तये सुठविदो संघो सयलो हवे तेण ॥ ४०५ ॥
उत्तमपत्तविसेसे उत्तमभत्तीए उत्तमं दाणं ।
एयदिणे वि य दिण्णं इंदसुहं उत्तमं देदि ॥ ४०६ ॥
पुव्वपमाणकदाणं सव्वदिसीणं पुणोवि संवरणं ।
इंदियविसयाण तहा पुणोवि जो कुणदि संवरणं ॥ ४०७ ॥
वासादिकयपमाणं दिणे दिणे लोहकामसमणत्थं ।
सावज्जवज्जणट्ठं तस्स चउत्थं वयं होदि ॥ ४०८ ॥
वारसवएहिं जुत्तो जो सल्लेहणं करेदि उवसंतो ।
सो सुरसोक्खं पाविय कमेण सोक्खं परं लहदि ॥ ४०९ ॥

एक्कं पि वयं विमलं सद्दिट्ठी जइ कुणइ दिढचित्तो ।
तो विविहरिद्धिजुत्तं इंदत्तं पावइ णियमा ॥ ३७० ॥
जो कुणइ काउसग्गं बारसआउत्तसंजदो धीरा(रो) ।
णमणदुगं पि करंतो चदुप्पणामो पसण्णप्पा ॥ ३७१ ॥
चिंतंतो ससरूवं जिणबिंबं अहव अक्खरं परमं ।
ज्झायदि कम्मविवायं तस्स वयं होदि सामाइयं ॥ ३७२ ॥
सत्तमितेरसिदिवसे अवरण्हे जाइऊण जिणभवणे ।
किरियाकम्मं काऊ उववासं चउव्विहं गहिय ॥ ३७३ ॥
गिहवावारं चत्ता रत्तिं गमिऊण धम्मचिंताए ।
पच्चूसे उट्ठित्ता किरियाकम्मं च कादूण ॥ ३७४ ॥
सत्थब्भासेण पुणो दिवसं गमिऊण वंदणं किच्चा ।
रत्तिं णेदूण तहा पच्चूसे वंदणं किच्चा ॥ ३७५ ॥
पु(पू)जणविहिं च किच्चा पत्तं गहिऊण णवरि तिविहं पि ।
भुंजाविऊण पत्तं भुंजंतो पोसहो होदि ॥ ३७६ ॥
एक्कं पि णिरारंभं उपवास जो करेदि उवसंतो ।
बहुभवसंचियकम्मं सो णाणी खवदि लीलाए ॥ ३७७ ॥
उपवासं कुव्वंतो आरंभं जो करेदि मोहादो ।
सो णियदेहं सोसदि ण ज्झाडइ कम्मलेसं पि ॥ ३७८ ॥
सचि(चि)त्तं पत्तफलं छल्ली मूलं च किसलयं बीजं ।
जो ण य भक्खदि णाणी सचित्तविरओ हवे सो वि ॥ ३७९ ॥
जो ण य भक्खेदि सयं तस्स ण अण्णस्स जुज्जदे दाउं ।
भुत्तस्स भोजिदस्स हि णत्थि विसेसो तदो कोवि ॥ ३८० ॥
जो वज्जेदि सचित्तं दुज्जयजीहा विणिज्जया तेण ।
दयभावो होदि किओ जिणवयणं पालियं तेण ॥३८१ ॥
जो चउविहं पि भोज्जं रयणीए णेव भुंजदे णाणी ।
ण य भुंजावइ अण्णं णिसिविरओ सो हवे भोज्जो ॥ ३८२ ॥
जो णिसिभुत्तिं वज्जदि सो उववासं करेदि छम्मासं ।
संवच्छरस्स मज्झे आरंभं मुयदि रयणीए ॥ ३८३ ॥
सव्वेसिं इत्थीणं जो अहिलासं ण कुव्वदे णाणी ।
मणवायाकाएण य बंभवई सो हवे सदउ ॥ ३८४ ॥
जो आरंभं ण कुणदि अण्णं कारयदि णेव अणुमण्णो ।
हिंसासंतत्थमणो चत्तारंभो हवे सो हि ॥ ३८५ ॥

जो परिवज्जइ गंथं अब्भंतरबाहिरं व साणंदो ।
पावंति मण्णमाणो णिग्गंथो सो हवे णाणी ॥ ३८६ ॥
बाहिरगंथविहीणा दालिद्दमणुआ सहावदो होंति ।
अब्भंतरगंथं पुण ण सक्कदे कोवि छंडेदुं ॥ ३८७ ॥
जो अणुमणणं ण कुणदि गिहत्थकज्जेसु पावमूलेसु ।
भवियव्वं भावंतो अण(णु)मणविरओ हवे सो दु ॥ ३८८ ॥
जो पुण चिंतदि कज्जं सुहासुहं रायदोससंजुत्तो ।
उवओगेण विहीणं स कुणदि पावं विणा कज्जं ॥ ३८९ ॥
जो णवकोडिविसुद्धं भिक्खायरणेन भुंजदे भोज्जं ।
जायणरहियं जोग्गं उद्दिट्ठाहारविरओ सो ॥ ३९० ॥
जो सावयवयसुद्धो अंते आराहणं परं कुणदि ।
सो अच्चुदम्हि सग्गे इंदो सुरसेविओ होदि ॥ ३९१ ॥

अंते प्रशस्तिः ।

अनुप्रेक्षा इति प्रोक्ता भावना द्वादश स्फुटं ।
यश्चिंतयति सच्चित्ते स भवेन्मुक्तिवल्लभः ॥ १ ॥
श्रीमूलसंघे जिननंदिसंघः वरो बलात्कारगणः प्रसिद्धः ।
श्रीकुंदकुंदो वरसूरिवर्यो विभाति भाभूषणभूषितांगः ॥ २ ॥
तदन्वये श्रीमुनिपद्मनंदी ततोभवच्छ्रीसकलादिकीर्तिः ।
तदन्वये श्रीभुवनादिकीर्तिः श्रीज्ञानभूषो वरवित्तिभूषः ॥ ३ ॥
तदन्वये श्रीविजयादिकीर्तिस्तत्पट्टधारी शुभचंद्रदेवः ।
तेनेयमाकारि विशुद्धटीका श्रीमत्सुमत्यादिसुकीर्तितश्च ॥ ४ ॥
सूरिश्रीशुभचंद्रेण वादिपर्वतवज्रिणा ।
त्रिविद्येनानुप्रेक्षाया वृत्तिर्विरचिता वरा ॥ ५ ॥
श्रीमद्विक्रमभूपतेः परिमिते वर्षे शते षोडशे
माघे मासि दशाग्रवह्निमहिते ख्याते दशम्यां तिथौ ।
श्रीमच्छ्रीमाहिसारसेरनगरे चैत्यालये श्रीपुरः
श्रीमच्छ्रीशुभचंद्रदेवविहिता टीका सदा नंदत ॥ ६ ॥
वर्णिश्रीक्षी(क्षे)मचंद्रेण विनयेन कृतप्रार्थना(?) ।
शुभचंद्रगुरो स्वामिन् कुरु टीकां मनोहरां ॥ ७ ॥
तेन श्रीशुभचंद्रेण त्रैविद्येन गणेशिना ।
कार्तिकेयानुप्रेक्षाया वृत्तिर्विरचिता वरा ॥ ८ ॥
तथा साधुसुमत्यादिकीर्तिना कृतप्रार्थना ।
सार्थीकृता समर्थेन शुभचंद्रेण सूरिणा ॥ ९ ॥

भट्टारकपदाधीशा मूलसंघे विदां वराः ।
रमावीरेंदुचिद्रूपगुरवो हि गणेशिनः ॥ १० ॥
लक्ष्मीचंद्रगुरुस्वामी शिष्यस्तस्य सुधीयशाः ।
वृत्तिर्विस्तारिता तेन श्रीशुभेंदुप्रसादतः ॥ ११ ॥

इति श्रीस्वामिकार्तिकेयानुप्रेक्षायां त्रिविद्यविद्याधरषड्भाषाकविचक्रवर्त्तिश्रीशुभचंद्रविरचितटीकायां धर्मानुप्रेक्षायां द्वादशोधिकारः ॥ १२ ॥ अथ शुभसंवछरे संवत् १७८४ पोसशुदि ९ दिने लिपीकृतम् ॥

OOO. *Jainasûtra by Umâsvâti.*

तत्त्वार्थाधिगमं नाम मोक्षशास्त्रं ।

ॐ नमः सिद्धेभ्यः ।

मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृतां ।
ज्ञातारं विश्वतत्त्वानां वंदे तद्गुणलब्धये ॥ १ ॥
सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥ २ ॥
तत्त्वार्थश्रद्धानं सम्यग्दर्शनं ॥ ३ ॥
तन्निसर्गादधिगमाद्वा ॥ ४ ॥
जीवाजीवास्रवबंधसवरनिर्जरामोक्षास्तत्त्वं ॥ ५ ॥
नामस्थापनाद्रव्यभावस्तन्न्यासः ॥ ६ ॥
प्रमाणनयैरधिगमः ॥ ७ ॥
निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः ॥ ८ ॥
सत्संख्याक्षेत्रस्पर्शनकालांतरभावाल्पबहुत्वैश्च ॥ ९ ॥
मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानं ॥ १० ॥
तत्प्रमाणे ॥ ११ ॥
आद्ये परोक्षं ॥ १२ ॥
प्रत्यक्षमन्यत् ॥ १३ ॥
मतिः स्मृतिः संज्ञा चिंताभिनिबोध इत्यनर्थांतरं ॥ १४ ॥
तदिंद्रियानिंद्रियनिमित्तं ॥ १५ ॥
अवग्रहेहावायधारणाः ॥ १६ ॥
बहुबहुविधिक्षिप्रनिसृतानुक्तध्रुवाणां सेतराणां ॥ १७ ॥
अर्थस्य ॥ १८ ॥
व्यंजनस्यावग्रहः ॥ १९ ॥
न चक्षुरनिंद्रियाभ्यां ॥ २० ॥
श्रुतं मतिपूर्वं व्यनेकद्वादशभेदं ॥ २१ ॥
भवप्रत्ययोवधिर्देवनारकाणां ॥ २२ ॥

क्षयोपशमनिमित्तः षड्विकल्पः शेषाणां ॥ २३ ॥
ऋजुविपुलमती मनःपर्ययः ॥ २४ ॥
विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः ॥ २५ ॥
विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्याययोः ॥ २६ ॥
मतिश्रुतयोर्निबंधो द्रव्येष्वसर्वपर्यायेषु ॥ २७ ॥
रूपिष्ववधेः ॥ २८ ॥
तदनंतभागे मनःपर्ययस्य ॥ २९ ॥
सर्वद्रव्यपर्यायेषु केवलस्य ॥ ३० ॥
एकादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः ॥ ३१ ॥
मतिश्रुतावधयो विपर्ययश्च ॥ ३२ ॥
सदसतोरविशेषाद्यदृच्छोपलब्धेरुन्मत्तवत् ॥ ३३ ॥
नैगमसंग्रहव्यवहारर्जुसूत्रशब्दसमभिरूढैवंभूता नयाः ॥ ३४ ॥

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे प्रथमोऽध्यायः ॥ १ ॥

औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च ॥ १ ॥
द्विनवाष्टादशैकविंशतित्रिभेदा यथाक्रमं ॥ २ ॥
सम्यक्त्वचारित्रे ॥ ३ ॥
ज्ञानदर्शनदानलाभभोगोपभोगवीर्याणि च ॥ ४ ॥
ज्ञानाज्ञानदर्शनालब्धयश्चतुस्त्रित्रिपंचभेदाः सम्यक्त्वचारित्रसंयमासंयमाश्च ॥ ५ ॥
गतिकषायलिंगमिथ्यादर्शनाज्ञानासंयतासिद्धलेश्याश्चतुश्चतुस्त्र्येकैकषड्भेदाः ॥ ६ ॥
जीवभव्याभव्यत्वानि च ॥ ७ ॥
उपयोगो लक्षणं ॥ ८ ॥
स द्विविधोऽष्टचतुर्भेदः ॥ ९ ॥
संसारिणो मुक्ताश्च ॥ १० ॥
समनस्कामनस्काः ॥ ११ ॥
संसारिणस्त्रसस्थावराः ॥ १२ ॥
पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः ॥ १३ ॥
द्वींद्रियादयस्त्रसाः ॥ १४ ॥
पंचेंद्रियाणि ॥ १५ ॥
द्विविधानि ॥ १६ ॥
निर्वृत्त्युपकरणे द्रव्येंद्रियं ॥ १७ ॥
लब्ध्युपयोगो भावेंद्रियं ॥ १८ ॥
स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि ॥ १९ ॥

स्पर्शरसगंधवर्णशब्दास्तदर्थाः ॥ २० ॥
श्रुतमनिंद्रियस्य ॥ २१ ॥
वनस्पत्यंतानामेकं ॥ २२ ॥
कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानि ॥ २३ ॥
संज्ञिनः समनस्काः ॥ २४ ॥
विग्रहगतौ कर्मयोगः ॥ २५ ॥
अणुश्रेणिगतिः ॥ २६ ॥
अविग्रहा जीवस्य ॥ २७ ॥
विग्रहवती च संसारिणः ॥ २८ ॥
प्राक् चतुर्भ्यः ॥ २९ ॥
एकसमया विग्रहाः ॥ ३० ॥
एकं द्वौ त्रीन्वानाहारकः ॥ ३१ ॥
सम्मूर्छनगर्भोपपादा जन्मः(न्म) ॥ ३२ ॥
सचित्तशीतसंवृताः सेतरा मिश्राश्चैकशस्तद्योनयः ॥ ३३ ॥
जरायुजांडजपोतानां गर्भः ॥ ३४ ॥
देवनारकाणामुपपादः ॥ ३५ ॥
शेषाणां सम्मूर्छनं ॥ ३६ ॥
औदारिकवैक्रियकाहारकतैजसकार्मणानि शरीराणि ॥ ३७ ॥
परं परं सूक्ष्मं ॥ ३८ ॥
प्रदेशतोसंख्येयगुणं प्राक्तैजसात् ॥ ३९ ॥
अनंतगुणे परे ॥ ४० ॥
अप्रतीघाते ॥ ४१ ॥
अनादिसंबंधे च ॥ ४२ ॥
सर्वस्य ॥ ४३ ॥
तदादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः ॥ ४४ ॥
निरुपभोगमंत्यं ॥ ४५ ॥
गर्भसम्मूर्छनजमाद्यं ॥ ४६ ॥
औपपादिकं वैक्रियकं ॥ ४७ ॥
लब्धिप्रत्ययं च ॥ ४८ ॥
तैजसमपि ॥ ४९ ॥
शुभं विशुद्धमव्याघाति चाहारकं प्रमत्तसंयतस्यैव ॥ ५० ॥
नारकसम्मूर्छिनो नपुंसकानि ॥ ५१ ॥

न देवाः ॥ ५२ ॥
शेषास्त्रिवेदाः ॥ ५३ ॥
औपपादिकचरमोत्तमदेहासंख्येयवर्षायुषोनपवर्त्यायुषः ॥ ५४ ॥
इति तत्त्वार्थाधिगमे मोक्षशास्त्रे द्वितीयोध्यायः ॥ २ ॥

रत्नशर्कराबालुकापंकधूमतमोमहातमःप्रभाभूमयो घनांबुवाताकाशप्रतिष्ठाः सप्ताधोधः॥१॥
तासु त्रिंशत्पंचविंशतिपंचदशदशत्रिपंचोनैकनरकशतसहस्राणि पंच चैव यथाक्रमं ॥ २॥
नारका नित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः ॥ ३ ॥
परस्परोदीरितदुःखाः ॥ ४ ॥
संक्लिष्टासुरोदीरितदुःखाश्च प्राक्चतुर्थ्याः ॥ ५ ॥
तेष्वेकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमा सत्त्वानां परा स्थितिः ॥ ६ ॥
जंबूद्वीपलवणोदादयः शुभनामानो द्वीपसमुद्राः ॥ ७ ॥
द्विर्द्विर्विष्कंभाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः ॥ ८ ॥
तन्मध्ये मेरुनाभिर्वृत्तो योजनशतसहस्रविष्कंभो जंबूद्वीपः ॥ ९ ॥
भरतहैमवतहरिविदेहरम्यकहैरण्यवतैरावतवर्षाः क्षेत्राणि ॥ १० ॥
तद्विभाजिनः पूर्वापरायता हिमवन्महाहिमवन्निषधनीलरुक्मिशिखरिणो वर्षधरपर्वताः ॥ ११ ॥
हेमार्जुनतपनीयवैडूर्यरजतहेममयाः ॥ १२ ॥
मणिविचित्रपार्श्वा उपरि मूले च तुल्यविस्ताराः ॥ १३ ॥
पद्ममहापद्मतिगिंछकेसरिमहापुंडरीकपुंडरीका ह्रदास्तेषामुपरि ॥ १४ ॥
प्रथमो योजनसहस्रायामस्तदर्द्धविष्कंभो ह्रदः ॥ १५ ॥
दशयोजनावगाहः ॥ १६ ॥
तन्मध्ये योजनपुष्करं ॥ १७ ॥
तद्द्विगुणद्विगुणा ह्रदाः पुष्कराणि च ॥ १८ ॥
तन्निवासिन्यो देव्यः श्रीह्रीधृतिकीर्तिबुद्धिलक्ष्म्यः पल्योपमस्थितयः ससामानिकपरिषत्काः ॥ १९ ॥
गंगा सिंधू रोहिद्रोहितास्या हरिद्धरिकांता शीता शीतोदा नारी नरकांता सुवर्णरूप्यकूला रक्ता रक्तोदा सरितस्तन्मध्यगाः ॥ २० ॥
द्वयोर्द्वयोः पूर्वाः पूर्वगाः ॥ २१ ॥
शेषास्त्वपरगाः ॥ २२ ॥
चतुर्दशनदीसहस्रपरिवृता गंगासिंध्वादयो नद्यः ॥ २३ ॥
भरतः षड्विंशतिपंचयोजनशतविस्तारः षट् चैकोनविंशतिभागा योजनस्य ॥ २४ ॥
तद्द्विगुणद्विगुणविस्तारा वर्षधरवर्षा विदेहांताः ॥ २५ ॥
उत्तरा दक्षिणतुल्याः ॥ २६ ॥

भरतैरावतयोर्वृद्धिह्रासौ षट्समयाभ्यामुत्सर्पिण्यवसर्पिणीभ्यां ॥ २७ ॥
ताभ्यामपरा भूमयोवस्थिताः ॥ २८ ॥
एकद्वित्रिपल्योपमस्थितयो हैमवतकहरिवर्षकदैवकुरवकाः ॥ २९ ॥
तथोत्तराः ॥ ३० ॥
विदेहेषु संख्येयकालाः ॥ ३१ ॥
भरतस्य विष्कंभो जंबूद्वीपस्य नवतिशतभागः ॥ ३२ ॥
द्विर्धातकीखंडे ॥ ३३ ॥
पुष्करार्धे च ॥ ३४ ॥
प्राङ्मानुषोत्तरान्मनुष्याः ॥ ३५ ॥
आर्या म्लेच्छाश्च ॥ ३६ ॥
भरतैरावतविदेहाः कर्मभूमयोन्यत्र देवकुरूत्तरकुरुभ्यः ॥ ३७ ॥
नृस्थिती परावरे त्रिपल्योपमांतर्मुहूर्ते ॥ ३८ ॥
तिर्यग्योनिजानां च ॥ ३९ ॥

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे तृतीयोध्यायः ॥ ३ ॥

देवाश्चतुर्निकायाः ॥ १ ॥
आदितस्त्रिषु पीतांतलेश्याः ॥ २ ॥
दशाष्टपंचद्वादशविकल्पाः कल्पोपपन्नपर्यंताः ॥ ३ ॥
इंद्रसामानिकत्रायस्त्रिंशपारिषदात्मरक्षलोकपालानीकप्रकीर्णकाभियोग्यकिल्बिषिकाश्चैकशः ॥ ४ ॥
त्रायस्त्रिंशलोकपालवर्ज्या व्यंतरज्योतिष्काः ॥ ५ ॥
पूर्वयोर्द्वींद्राः ॥ ६ ॥
कायप्रवीचारा आ ऐशानात् ॥ ७ ॥
शेषाः स्पर्शरूपशब्दमनःप्रवीचाराः ॥ ८ ॥
परेऽप्रवीचाराः ॥ ९ ॥
भवनवासिनो सुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः ॥ १० ॥
व्यंतराः किन्नरकिंपुरुषमहोरगगंधर्वयक्षराक्षसभूतपिशाचाः ॥ ११ ॥
ज्योतिष्काः सूर्याचंद्रमसौ ग्रहनक्षत्रप्रकीर्णकतारकाश्च ॥ १२ ॥
मेरुप्रदक्षिणानित्यगतयो नृलोके ॥ १३ ॥
तत्कृतः कालविभागः ॥ १४ ॥
बहिरवस्थिताः ॥ १५ ॥
वैमानिकाः ॥ १६ ॥
कल्पोपपन्नाः कल्पातीताश्च ॥ १७ ॥
उपर्युपरि ॥ १८ ॥

सौधर्मैशानसनत्कुमारमाहेंद्रब्रह्मब्रह्मोत्तरलांतवकापिष्टशुक्रमहाशुक्रशतारसहस्रारेष्वानत-प्राणतयोरारणाच्युतयोर्नवसु ग्रैवेयकेषु विजयवैजयंतजयंतापराजितेषु सर्वार्थसिद्धौ च ॥ १९ ॥

स्थितिप्रभावसुखद्युतिलेश्याविशुद्धींद्रियावधिविषयतोधिकाः ॥ २० ॥

गतिशरीरपरिग्रहाभिमानतो हीनाः ॥ २१ ॥

पीतपद्मशुक्ललेश्याद्वित्रिशेषेषु ॥ २२ ॥

प्राग्ग्रैवेयकेभ्यः कल्पाः ॥ २३ ॥

ब्रह्मलोकालया लौकांतिकाः ॥ २४ ॥

सारस्वतादित्यवह्न्यरुणगर्दतोयतुषिताव्याबाधारिष्टाश्च ॥ २५ ॥

विजयादिषु द्विचरमाः ॥ २६ ॥

औपपादिकमनुष्येभ्यः शेषास्तिर्यग्योनय : ॥ २७ ॥

स्थितिरसुरनागसुपर्णद्वीपशेषाणां सागरोपमत्रिपल्योपमार्धहीनमिताः ॥ २८ ॥

सौधर्मैशानयोः सागरोपमे अधिके ॥ २९ ॥

सनत्कुमारमाहेंद्रयोः सप्त ॥ ३० ॥

त्रिसप्तनवैकादशत्रयोदशपंचदशभिरधिकानि तु ॥ ३१ ॥

आरणाच्युतादूर्ध्वमेकैकेन नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धौ च ॥ ३२ ॥

अपरापल्योपममधिकं ॥ ३३ ॥

परतः परतः पूर्वापूर्वानंतराः ॥ ३४ ॥

नारकाणां च ॥ ३५ ॥

द्वितीयादिषु ॥ ३६ ॥

दशवर्षसहस्राणि प्रथमायां ॥ ३७ ॥

भुवनेषु च ॥ ३८ ॥

व्यंतराणां च ॥ ३९ ॥

परापल्योपममधिकं ॥ ४० ॥

ज्योतिष्काणां च ॥ ४१ ॥

तदष्टभागोपरा ॥ ४२ ॥

लौकांतिकानामष्टौ ॥ ४३ ॥

सागरोपमानि सर्वेषां ॥ ४४ ॥

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे चतुर्थोध्यायः ॥ ४ ॥

अजीवकायाधर्माधर्माकाशपुद्गलाः ॥ १ ॥

द्रव्याणि ॥ २ ॥

जीवाश्च ॥ ३ ॥

नित्यावस्थितान्यरूपाणि ॥ ४ ॥
रूपिणः पुद्गलाः ॥ ५ ॥
आआकाशादेकद्रव्याणि ॥ ६ ॥
निष्क्रियाणि च ॥ ७ ॥
असंख्येयाः प्रदेशा धर्माधर्मैकजीवानां ॥ ८ ॥
आकाशस्यानंताः ॥ ९ ॥
संख्येयासंख्येयाश्च पुद्गलानां ॥ १० ॥
नाणोः ॥ ११ ॥
लोकाकाशेवगाहः ॥ १२ ॥
धर्माधर्मयोः कृत्स्ने ॥ १३ ॥
एकप्रदेशादिषु भाज्यः पुद्गलानां ॥ १४ ॥
असंख्येयभागादिषु जीवानां ॥ १५ ॥
प्रदेशसंहारविसर्पाभ्यां प्रदीपवत् ॥ १६ ॥
गतिस्थित्युपग्रहौ धर्माधर्मयोरुपकारः ॥ १७ ॥
आकाशस्यावगाहः ॥ १८ ॥
शरीरवाङ्मनःप्राणापानाः पुद्गलानां ॥ १९ ॥
सुखदुःखजीवितमरणोपग्रहाश्च ॥ २० ॥
परस्परोपग्रहो जीवानां ॥ २१ ॥
वर्तनापरिणामक्रियापरत्वापरत्वे च कालस्य ॥ २२ ॥
स्पर्शरसगंधवर्णवंतः पुद्गलाः ॥ २३ ॥
शब्दबंधसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवंतश्च ॥ २४ ॥
अणवः स्कंधाश्च ॥ २५ ॥
भेदसंघातेभ्य उत्पद्यंते ॥ २६ ॥
भेदादणुः ॥ २७ ॥
भेदसंघाताभ्यां चाक्षुषः ॥ २८ ॥
सद्द्रव्यलक्षणं ॥ २९ ॥
उत्पादव्ययध्रौव्ययुक्तं सत् ॥ ३० ॥
तद्भावाव्ययं नित्यं ॥ ३१ ॥
अर्पितानर्पितसिद्धेः ॥ ३२ ॥
स्निग्धरूक्षत्वाद्बंधः ॥ ३३ ॥
न जघन्यगुणानां ॥ ३४ ॥
गुणसाम्ये सदृशानां ॥ ३५ ॥
द्व्यधिकादिगुणानां तु ॥ ३६ ॥

बंधेधिकौ पारिणामिकौ च ॥३७॥
गुणपर्ययवद्द्रव्यं ॥३८॥
कालश्च ॥३९॥
सोनंतसमयः ॥४०॥
द्रव्याश्रया निर्गुणा गुणाः ॥४१॥
तद्भावः परिणामः ॥४२॥
इति तत्त्वार्थाधिगमे मोक्षशास्त्रे पंचमोध्यायः ॥ ५ ॥

कायवाङ्मनःकर्म योगः ॥ १ ॥
स आश्रवः ॥ २ ॥
शुभः पुण्यस्याशुभः पापस्य ॥ ३ ॥
सकषायाकषाययोः सांपरायिकेर्यापथयोः ॥ ४ ॥
इंद्रियकषाया व्रतक्रियाः पंचचतुःपंचपंचविंशतिसंख्याः पूर्वस्य भेदाः ॥ ५ ॥
तीव्रमंदज्ञाताज्ञातभावाधिकरणवीर्यविशेषेभ्यस्तद्विशेषः ॥ ६ ॥
अधिकरणं जीवाजीवाः ॥ ७ ॥
आद्यं संरंभसमारंभारंभयोगकृतकारितानुमतकषायविशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैकशः ॥ ८ ॥
निर्वर्तनानिक्षेपसंयोगनिसर्गा द्विचतुर्द्वित्रिभेदाः परं ॥ ९ ॥
तत्प्रदोषनिह्नवमात्सर्यांतरायासादनोपघाता ज्ञानदर्शनावरणयोः ॥१०॥
दुःखशोकतापाक्रंदनवधपरिदेवनान्यात्मपरोभयस्थान्यसद्वेद्यस्य ॥११॥
भूतव्रत्यनुकंपादानसरागसंयमादियोगः क्षांतिः शौचमिति सद्वेद्यस्य ॥१२॥
केवलिश्रुतसंघधर्मदेवावर्णवादो दर्शनमोहस्य ॥१३॥
कषायोदयात्तीव्रपरिणामश्चारित्रमोहस्य ॥१४॥
बह्वारंभपरिग्रहत्वं नारकस्यायुषः ॥१५॥
माया तैर्यग्योनस्य ॥१६॥
अल्पारंभपरिग्रहत्वं मानुषस्य ॥१७॥
स्वभावमार्दवं च ॥१८॥
निःशीलव्रतत्वं च सर्वेषां ॥१९॥
सरागसंयमासंयमाकामनिर्जरावालतपांसि दैवस्य ॥२०॥
सम्यक्त्वं च ॥२१॥
योगवक्रता विसंवादनं चाशुभस्य नाम्नः ॥२२॥
तद्विपरीतं शुभस्य ॥२३॥
दर्शनविशुद्धिर्विनयसंपन्नता शीलव्रतेष्वनतीचारोभीक्ष्णज्ञानोपयोगसंवेगौ शक्तितस्त्यागत-

पसी साधुसमाधिर्वैयावृत्यकरणमर्हदाचार्यबहुश्रुतप्रवचनभक्तिरावश्यकापरि-
हाणिर्मार्गप्रभावना प्रवचनवात्सल्यमिति तीर्थकरत्वस्य ॥२४॥
परात्मनिंदाप्रशंसे सदसद्गुणोच्छादनोद्भावने च नीचैर्गोत्रस्य ॥२५॥
तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य ॥२६॥
विघ्नकरणमंतरायस्य ॥२७॥
इति तत्त्वार्थाधिगमे मोक्षशास्त्रे षष्ठोध्यायः ॥६॥

हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतं ॥१॥
देशसर्वतोणुमहती ॥२॥
तत्स्थैर्यार्थं भावनाः पंचपंच ॥३॥
वाङ्मनोगुप्तीर्यादाननिक्षेपणसमित्यालोकितपानभोजनानि पंच ॥ ४ ॥
क्रोधलोभभीरुत्वहास्यप्रत्याख्यानान्यनुवीचीभाषणं च पंच ॥ ५ ॥
शून्यागारविमोचितावासपरोपरोधाकरणभैक्ष्यशुद्धिसद्धर्मा विसंवादाः पंच ॥ ६ ॥
स्त्रीरागकथाश्रवणतन्मनोहरांगनिरीक्षणपूर्वरतानुस्मरणवृष्येष्टरसस्वशरीरसंस्कारत्यागाः
पंच ॥ ७ ॥
मनोज्ञामनोज्ञेंद्रियविषयरागद्वेषवर्जनानि पंच ॥ ८ ॥
हिंसादिष्विहामुत्रापायावद्यदर्शनं ॥ ९ ॥
दुःखमेव वा ॥ १० ॥
मैत्रीप्रमोदकारुण्यमाध्यस्थानि च सत्त्वगुणाधिक्लिश्यमानाविनयेषु ॥ ११ ॥
जगत्कायस्वभावौ वा संवेगवैराग्यार्थं ॥ १२ ॥
प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा ॥ १३ ॥
असदभिधानमनृतं ॥ १४ ॥
अदत्तादानं स्तेयं ॥ १५ ॥
मैथुनमब्रह्म ॥ १६ ॥
मूर्छा परिग्रहः ॥ १७ ॥
निःशल्यो व्रती ॥ १८ ॥
अगार्यनगारश्च ॥ १९ ॥
अणुव्रतोगारी ॥ २० ॥
दिग्देशानर्थदंडविरतिसामायिकप्रोषधोपवासोपभोगपरिभोगपरिमाणातिथिसंविभागव्रत-
संपन्नश्च ॥ २१ ॥
मारणांतिकीं संलेखनां योषिता ॥ २२ ॥
शंकाकांक्षाविचिकित्सान्यदृष्टिप्रशंसासंस्तवाः सम्यग्दृष्टेरतीचाराः ॥ २३ ॥
व्रतशीलेषु पंच पंच यथाक्रमं ॥ २४ ॥

बंधवधच्छेदातिभारारोपणान्नपाननिरोधाः ॥ २५ ॥
मिथ्योपदेशरहोभ्याख्यानकूटलेखक्रियान्यासापहारसाकारमंत्रभेदाः ॥ २६ ॥
स्तेनप्रयोगतदाहृतादानविरुद्धराज्यातिक्रमहीनाधिकमानोन्मानप्रतिरूपकव्यवहाराः ॥ २७ ॥
परविवाहकरणेत्वरिकापरिगृहीतापरिगृहीतागमनानंगक्रीडाकामतीव्राभिनिवेशाः ॥ २८ ॥
क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यप्रमाणातिक्रमाः ॥ २९ ॥
ऊर्ध्वाधस्तिर्यग्व्यतिक्रमक्षेत्रवृद्धिस्मृत्यंतराधानानि ॥३०॥
आनयनप्रेष्यप्रयोगशब्दरूपानुपातपुद्गलक्षेपाः ॥३१॥
कंदर्पकौत्कुच्यमौखर्यासमीक्षाधिकरणोपभोगपरिभोगानर्थक्यानि ॥ ३२ ॥
योगदुःप्रणिधानानादरस्मृत्यनुपस्थानानि ॥ ३३ ॥
अप्रत्यवेक्षिताप्रमार्जितोत्सर्गादानसंस्तरोपक्रमणानादरस्मृत्यनुपस्थानानि ॥ ३४ ॥
सचित्तसंबंधसम्मिश्राभिषवदुःपक्वाहाराः ॥ ३५ ॥
सचित्तनिक्षेपापिधानपरव्यपदेशमात्सर्यकालातिक्रमाः ॥ ३६ ॥
जीवितमरणाशंसामित्रानुरागसुखानुबंधनिदानानि ॥ ३७ ॥
अनुग्रहार्थं स्वस्यातिसर्गो दानं ॥ ३८ ॥
विधिद्रव्यदातृपात्रविशेषात्तद्विशेषः ॥ ३९ ॥
इति तत्त्वार्थाधिगमे मोक्षशास्त्रे सप्तमोध्यायः ॥ ७ ॥

मिथ्यादर्शनाविरतिप्रमादकषाययोगा बंधहेतवः ॥ १ ॥
सकषायत्वाज्जीवः कर्मणो योग्यान्पुद्गलानादत्ते संबंधः ॥ २ ॥
प्रकृतिस्थित्यनुभागप्रदेशास्तद्विधयः ॥३ ॥
आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रांतरायाः ॥४ ॥
पंचनवद्व्यष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपंचभेदा यथाक्रमं ॥ ५ ॥
मतिश्रुतावधिमनःपर्ययकेवलानां ॥ ६ ॥
चक्षुरचक्षुरवधिकेवलानां निद्रानिद्रानिद्राप्रचलाप्रचलाप्रचलास्त्यानगृद्धयश्च ॥७॥
सदसद्वेद्ये ॥८॥
दर्शनचारित्रमोहनीयाकषायकषायवेदनीयाख्यास्त्रिद्विनवषोडशभेदाः सम्यक्त्वमिथ्यात्वतदुभयान्यकषायकषायौ हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुंनपुंसकवेदा अनंतानुबंध्यप्रत्याख्यानसंज्वलनविकल्पाश्चैकशः क्रोधमानमायालोभाः ॥९॥
नारकतैर्यग्योनमानुषदैवानि ॥१०॥
गतिजातिशरीरांगोपांगनिर्माणबंधनसंघातसंस्थानसंहननस्पर्शरसगंधवर्णानुपूर्व्या गुरुलघूपघातपरघाततपोद्योतोच्छ्वासविहायोगतयः प्रत्येकशरीरत्रससुभगसुस्वरशुभ-

सूक्ष्मपर्याप्तस्थिरादेययशःकीर्तिसेतराणि तीर्थकरत्वं च ॥११॥
उच्चैर्नीचैश्च ॥१२॥
दानलाभभोगोपभोगवीर्याणां ॥१३॥
आदितस्तिसणामंतरायस्य च त्रिंशत्सागरोपमकोटीकोट्यः परा स्थितिः ॥१४॥
सप्ततिर्मोहनीयस्य ॥१५॥
विंशतिर्नामगोत्रयोः ॥ १६ ॥
त्रयस्त्रिंशत्सागरोपमाण्यायुषः ॥१७॥
अपरा द्वादश मुहूर्ता वेदनीयस्य ॥ १८ ॥
नामगोत्रयोरष्टौ ॥ १९ ॥
शेषाणामंतर्मुहूर्ता ॥ २० ॥
विपाकोनुभवः ॥ २१ ॥
स यथानाम ॥ २२ ॥
ततश्च निर्जरा ॥ २३ ॥
नामप्रत्ययाः सर्वतो योगविशेषात्सूक्ष्मैकक्षेत्रावगाहस्थिताः सर्वात्मप्रदेशेष्वनंतानंत-प्रदेशाः ॥ २४ ॥
सद्वेद्यशुभायुर्नामगोत्राणि पुण्यं ॥ २५ ॥
अतोन्यत्पापं ॥ २६ ॥

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे अष्टमोध्यायः ॥ ८ ॥

आस्रवनिरोधः संवरः ॥ १ ॥
स गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रैः ॥ २ ॥
तपसा निर्जरा च ॥ ३ ॥
सम्यग्योगनिग्रहो गुप्तिः ॥ ४ ॥
ईर्याभाषैषणादाननिक्षेपोत्सर्गाः समितयः ॥ ५ ॥
उत्तमक्षमामार्दवार्जवसत्यशौचसंयमतपस्त्यागाकिंचन्यब्रह्मचर्याणि धर्मः ॥ ६ ॥
अनित्याशरणसंसारैकत्वान्यत्वाशुच्यास्रवसंवरनिर्जरालोकबोधिदुर्लभधर्मस्वाख्यात-त्वानुचिंतनमनुप्रेक्षाः ॥ ७ ॥
मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहाः ॥ ८ ॥
क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्यानिषद्याशय्याक्रोशवधयाच्ञालाभ-रोगतृणस्पर्शमलसत्कारपुरस्कारप्रज्ञाज्ञानादर्शनानि ॥ ९ ॥
सूक्ष्मसांपरायच्छद्मस्थवीतरागयोश्चतुर्दश ॥ १० ॥
एकादश जिने ॥ ११ ॥
बादरसांपराये सर्वे ॥ १२ ॥
ज्ञानावरणे प्रज्ञाज्ञाने ॥ १३ ॥

दर्शनमोहांतराययोरदर्शनालाभौ ॥ १४ ॥
चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कारपुरस्काराः ॥ १५ ॥
वेदनीये शेषाः ॥ १६ ॥
एकादयो भाज्यानि युगपदेकस्मिन्नेकोनविंशतेः ॥ १७ ॥
सामायिकच्छेदोपस्थापनापरिहारविशुद्धिसूक्ष्मसांपराययथाख्यातमिति चारित्रं ॥ १८ ॥
अनशनावमोदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशा बाह्यं तपः ॥१९॥
प्रायश्चित्तविनयवैयावृत्यस्वाध्यायव्युत्सर्गध्यानानुत्तरं ॥ २० ॥
नवचतुर्दशपंचद्विभेदा यथाक्रमं ॥ २१ ॥
प्राग्ध्यानात् ॥ २२ ॥
आलोचनप्रतिक्रमणतदुभयविवेकव्युत्सर्गतपश्छेदपरिहारोपस्थापना ॥ २३ ॥
ज्ञानदर्शनचारित्रोपचाराः ॥ २४ ॥
आचार्योपाध्यायतपस्विशैक्ष्यग्लानगणकुलसंघसाधुमनोज्ञानां ॥ २५ ॥
वाचनाप्रच्छनानुप्रेक्षाम्नायधर्मोपदेशाः ॥ २६ ॥
बाह्याभ्यंतरोपध्योः ॥ २७ ॥
उत्तमसंहननस्यैकाग्रचिंतानिरोधो ध्यानमंतर्मुहूर्तात् ॥ २८ ॥
आर्तरौद्रधर्मशुक्लानि ॥ २९ ॥
परे मोक्षहेतू ॥ ३० ॥
आर्तममनोज्ञस्य संप्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः ॥ ३१ ॥
विपरीतं मनोज्ञस्य ॥ ३२ ॥
वेदनायाश्च ॥ ३३ ॥
निदानं च ॥ ३४ ॥
तदविरतदेशविरतप्रमत्तसंयतानां ॥ ३५ ॥
हिंसानृतस्तेयविषयसंरक्षणेभ्यो रौद्रमविरतदेशविरतयोः ॥ ३६ ॥
आज्ञापायविपाकसंस्थानविचयाय धर्म्यं ॥ ३७ ॥
शुक्ले चाद्ये पूर्वविदः ॥ ३८ ॥
परे केवलिनः ॥ ३९ ॥
पृथक्त्वैकत्ववितर्कसूक्ष्मक्रियाप्रतिपातिव्युपरतक्रियानिवर्तीनि ॥ ४० ॥
त्र्येकयोगकाययोगायोगानां ॥ ४१ ॥
एकाश्रये सवितर्कविचारे पूर्वे ॥ ४२ ॥
अवीचारं द्वितीयं ॥ ४३ ॥
वितर्कः श्रुतं ॥ ४४ ॥
वीचारोऽर्थव्यंजनयोगसंक्रांतिः ॥ ४५ ॥
सम्यग्दृष्टिश्रावकविरतानंतवियोजकदर्शनमोहक्षपकोपशमकोपशांतमोहक्षपक-क्षीणमोह-

जिनाः क्रमशोसंख्येयगुणनिर्जराः ॥ ४६ ॥
पुलाकबकुशकुशीलनिर्ग्रंथस्नातका निर्ग्रंथाः ॥ ४७ ॥
संयमश्रुतप्रतिसेवनातीर्थलिंगलेश्योपपादस्थानविकल्पतः साध्याः ॥ ४८ ॥
इति तत्त्वार्थाधिगमे मोक्षशास्त्रे नवमोध्यायः ॥ ९ ॥

मोहक्षयाज्ज्ञानदर्शनावरणांतरायक्षयाच्च केवलं ॥ १ ॥
बंधहेत्वभावानिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो मोक्षः ॥ २ ॥
औपशमिकादिभव्यत्वानां च ॥ ३ ॥
अन्यत्र केवलसम्यक्त्वज्ञानदर्शनासिद्धत्वेभ्यः ॥ ४ ॥
तदनंतरमूर्ध्वं गच्छत्यालोकांतात् ॥ ५ ॥
पूर्वप्रयोगादसंगत्वाद्बंधच्छेदात्तथागतिपरिणामाच्च ॥ ६ ॥
आविद्धकुलालचक्रवद्व्यपगतलेपालाबुवदेरंडबीजवदग्निशिखावच्च ॥ ७ ॥
धर्मास्तिकायाभावात् ॥ ८ ॥
क्षेत्रकालगतिलिंगतीर्थं चारित्रप्रत्येकबुद्धबोधितज्ञानावगाहनांतरसंख्याल्पबहुत्वतः साध्याः ॥ ९ ॥
इति तत्त्वार्थाधिगमे मोक्षशास्त्रे दशमोध्यायः ॥ १० ॥

मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृतां ।
ज्ञातारं विश्वतत्त्वानां वंदे तद्गुणलब्धये ॥ १ ॥
अक्षरमात्रपदस्वररहितं व्यंजनसंधिविवर्जितरेफं ।
साधुभिरत्र मम क्षमितव्यं को न विमुह्यति शास्त्रसमुद्रे ॥ २ ॥
दशाध्याये(यैः) परिच्छिन्ने तत्त्वार्थे पठिते सति ।
फलं स्यादुपवासस्य भाषितं मुनिपुंगवैः ॥ ३ ॥
तत्त्वार्थसूत्रकर्तारं गृध्रपिच्छोपलक्षितं ।
वंदे गणींद्रसंजातमुमास्वामिमुनीश्वरं ॥ ४ ॥
जं सक्कइ तं कीरइ जं च ण सक्केइ तं च सद्दहइ ।
सद्दहमाणो जीवो पावइ अजरामरं ट्ठाणं ॥ ५ ॥
तवयरणं वयधरणं संयमसरणं च जीवदयाकरणं ।
अंते समाहिमरणं चउगइदुखं(ख्कं) णिवारेइ ॥ ६ ॥
इति तत्त्वार्थमहिमा समाप्तः ।

P P P. No. 301. *Padmapurâna.*

पद्मपुराणं । प्रथमं पर्व ।

वर्धमानजिनेंद्रोक्तः सोयमर्थो गणेश्वरं ।
इंद्रभूतिं परिप्राप्तः सुधर्मं धारणीभवं ॥ ४१ ॥
प्रभवं क्रमतः कीर्तिं ततोनुत्तरवाग्मिनं ।

लिखितं तस्य संप्राप्य रवेर्यत्नोयमुद्गतः ॥ ४२ ॥
स्थितिर्वंशसमुत्पत्तिः प्रस्थानं संयुगं ततः ।
लवणांकुशसंभूतिर्भवोक्तिः परिनिर्वृतिः ॥ ४३ ॥
अवांतरभवैर्भूरिप्रकारैश्चारुपर्वभिः ।
युक्ताः सप्त पुराणेस्मिन्नधिकारा इमे स्मृताः ॥ ४४ ॥
पद्मचेष्टितसंबंधकारणं तावदत्र च ।
त्रैशिलादिगतं वक्ष्ये सूत्रं संक्षेपि तद्यथा ॥४५ ॥
वीरस्य समवस्थानं कुशाग्रगिरिमूर्धनि ।
श्रेणिकस्य परिप्रश्नमिंद्रभूतेर्महात्मनः ॥ ४६ ॥
तत्र प्रश्ने युगे यत्ना(त्न?)मुत्पत्तिं कुलकारिणां ।
भीतीश्च जगतो दुःखकारिणाकस्मिकेक्षणात् ॥ ४७ ॥
ऋषभस्य समुत्पत्तिमभिषेकं नगाधिपे ।
उपदेशं च विविधं लोकस्यार्तिविनाशनं ॥ ४८ ॥
श्रामण्यं केवलोत्पत्तिमैश्वर्यं विष्टपातिगं ।
सर्वामराधिपायानं निर्वाणसुखसंगमं ॥ ४९ ॥
प्रथनं बाहुबलिनो भरतेन समं महत् ।
समुद्भवं द्विजातीनां कुतीर्थिकगणस्य च ॥ ९० ॥
इक्ष्वाकुप्रभृतीनां च वंशानां परिकीर्तनं ।
विद्याधरसमुद्भूतिं विद्युद्दंष्ट्रस्य संभवं ॥ ९१ ॥
उपसर्गं जयंतस्य केवलज्ञानसंपदं ।
नागराजस्य संक्षोभं विद्याहरणतर्जने ॥ ९२ ॥
अजितस्यावतरणं पूर्णाब्दसुतासुखं ।
विद्याधरकुमारस्य शरणं प्रतिसंश्रयं ॥ ९३ ॥
रक्षोनाथपरिप्राप्तं रक्षोद्वीपसमाश्रयं ।
सगरस्य समुद्भूतिं दुःखदीक्षणनिर्वृती ॥ ९४ ॥
अतिक्रांतमहारक्षोजन्मनः परिकीर्तनं ।
शाखामृगध्वजानां च प्रज्ञप्तिमतिविस्तरात् ॥ ९५ ॥
तडित्केशस्य चरितमुदधेरमरस्य च ॥
किष्किंधांधखगोत्पादं श्रीमालाखेचरागमं ॥ ९६ ॥
वधाद्विजयसिंहस्य कोपं चाशनिवेगजं ।
अंधकांतमरिप्राप्तिं पुरस्य विनिवेशनं ॥ ९७ ॥
किष्किंधपुरविन्यासं मधुपर्वतमूर्धनि ।

सुकेशनंदनादीनां लंकाप्राप्तिनिरूपणं ॥ ५८ ॥
निर्घातवधहेतुं च मालिनः संपदं परं ।
दक्षिणे विजयार्धस्य भागे च रथनूपुरे ॥ ५९ ॥
पुरे जननमिंद्रस्य सर्वविद्याभृतां विभोः ।
मालिनः पंचतावाप्तिं जन्म वैश्रवणस्य च ॥ ६० ॥
पुष्पांतकसमावेशं तनयस्य सुमालिनः ।
कैकयस्यासहं योगं चारुस्वप्नावलोकनं ॥ ६१ ॥
दशाननस्य प्रजनं विद्यानां समुपासनं ।
अनावृतस्य संक्षोभमागमं च सुमालिनः ॥ ६२ ॥
मंदोदर्याः परिप्राप्तिं कन्यकानां परीक्षणं ।
चेष्टितं भानुकर्णस्य कोपं वैश्रवणोद्भवं ॥ ६३ ॥
यक्षराक्षससंग्रामं धनदस्य तपस्यनं ।
लंकागमं दशास्यस्य प्रश्नचैत्यावलोकनं ॥ ६४ ॥
श्रीमतो हरिषेणस्य माहात्म्यं पापनाशनं ।
त्रिजगद्भूषणाभिख्यद्विरदेंद्राविलोकनं ॥ ६५ ॥
यमस्थानच्युतिं चार्करजःकिष्किंधसंगमं ।
चोरणं कैकसेय्याश्च खरालंकारसंश्रयं ॥ ६६ ॥
अनुराधामहादुःखं चंद्रोदरवियोगतः ।
विराधितपुरभ्रंशं सुग्रीवश्रीसमागमं ॥ ६७ ॥
वालेः प्रव्रजनं क्षोभमष्टापदमहीभृतः ।
सुग्रीवस्य सुतारायां लाभं साहसगामिनः ॥ ६८ ॥
संतापं विजयार्धाद्रिगमनं रावणस्य च ।
अनरण्यसहस्रांशुवैराग्यं यज्ञनाशनं ॥ ६९ ॥
मधुपूर्वभवाख्यानमुपरंभाभिलाषणं ।
विद्यालाभं महेंद्रस्य राज्यलक्ष्मीपरिक्षयं ॥ ७० ॥
दशास्यमेरुगमनं पुनश्च विनिवर्तनं ॥ ७१ ॥
अनंतवीर्यसंप्रश्नं दशास्यनियमक्रियं ।
हनूमतः समुत्पत्तिं कपिकेतोर्महात्मनः ॥ ७२ ॥
अष्टापदे महेंद्रेण प्रह्लादस्याभिलाषणं ।
वायोः कोपं प्रसादं च तज्जायाप्रजनोत्सने ॥ ७३ ॥
दिगंबरेण कथनं हनुमत्पूर्वजन्मनः ।
सूतिं हनूसहप्राप्तिं प्रतिसूर्येण कारितं ॥ ७४ ॥
भूताटवीं प्रविष्टस्य वायोरिभविलोकने ।

विद्याधरसमायोगमंजनादर्शनोत्सवं ॥ ७५ ॥
वायुपुत्रसहायत्वं दारुणं परमं रणं ।
रावणस्य महाराज्यं जैनमुत्सेधमंतरं ॥ ७६ ॥
रामकेशवतच्छत्रुषट्खंडपरिचेष्टितं ।
दशस्यंदनसंभूतिं केकयावरसंपदं ॥ ७७ ॥
पद्मलक्ष्मणशत्रुघ्नभरतानां समुद्भवं ।
सीतोत्पत्तिं प्रभाचक्रहृतिं तन्मातृशोचनं ॥ ७८ ॥
नारदालिखितां सीतां दृष्ट्वा मातुर्विमूढतां ।
स्वयंवराय वृत्तांतं चापरत्नस्य चोद्भवं ॥ ७९ ॥
सर्वभूतशरण्यस्य दशस्यंदनदीक्षणं ।
भाचक्रान्यभवज्ञानं विदेहायाश्च दर्शनं ॥ ८० ॥
केकयावरतो राज्यप्रापणं भरतस्य च ।
वैदेहीपद्मसौमित्रिगमनं दक्षिणाशया ॥ ८१ ॥
चेष्टितं वज्रकर्णस्य लाभं कल्याणयौषितं ।
रुद्रभूतिवशीकारं वालिखिल्यविमोचनं ॥ ८२ ॥
निकारमरुणग्रामे रामपुर्या निवेशनं ।
संगमं वनमालाया अतिवीर्यसमुन्नतिं ॥ ८३ ॥
प्राप्तिं च जितपद्मायाः कौलदेशविभूषणं ।
चरितं कारणं रामचैत्यानां वंशपर्वते ॥ ८४ ॥
जटायुर्नियमप्राप्तिं पात्रदानफलोदयं ।
महानागरथारोहं संवूकविनिपातनं ॥ ८५ ॥
कैकसेय्याश्च वृत्तांतं खरदूषणविग्रहं ।
सीताहरणशोकं च शोकं रामस्य दुर्धरं ॥ ८६ ॥
विराधितस्यागमनं खरदूषणपंचतां ।
विद्यानां रत्नजटिनः छेदं सुग्रीवसंगमं ॥ ८७ ॥
निधनं साहसगतेः सीतोदंतं विहायसा ।
यानं विभीषणायानं विद्याप्तिं हरिपद्मयोः ॥ ८८ ॥
इंद्रजित्कुंभकर्णाब्दस्वरपन्नगबंधनं ।
सौमित्रिशक्तिनिर्भेदविशल्याशल्यताकृतिं ॥ ८९ ॥
रावणस्य प्रवेशं च जिनशांतिगृहे स्तुतिं ।
लंकाभिभवनं प्रातिहार्यं देवैः प्रकल्पितं ॥ ९० ॥
चक्रोत्पत्तिं च सौमित्रेः कैकसेयस्य हिंसनं ।
विलापं तस्य नारीणां केवल्यागमनं ततः ९१ ॥

दीक्षामिंद्रजिदादीनां सीतया सह संगमं ।
नारदस्य च संप्राप्तिमयोध्यायां निवेशनं ॥ ९२ ॥
पूर्वजन्मानुचरितं गजस्य भरतस्य च ।
तत्प्रव्रज्यां महाराज्यं सीरचक्रप्रहारिणोः ॥ ९३ ॥
लाभं मनोरमायाश्च लक्ष्म्यालिंगितवक्षसः ।
संयुगे मरणप्राप्तिं सुमधोर्लवणस्य च ॥ ९४ ॥
मथुरायां सदेशायामुपसर्गविनाशनं ।
सप्तर्षिसंश्रयात्सीतानिर्वासपरिदेवने ॥ ९५ ॥
वज्रजंघपरित्राणं लवणांकुशसंभवं ।
अन्यराज्यपराभूतिं पित्रा सह महाहवं ॥ ९६ ॥
सर्वभूषणकैवल्यसंप्राप्तावमरागमं ।
प्रातिहार्यं च वैदेह्या विभीषणभवांतरं ॥ ९७ ॥
तपः कृतांतवक्त्रस्य परिक्षोयं(भं?) स्वयंवरे ।
श्रमणत्वं कुमाराणां प्रभामंडलदुर्मतिं ॥ ९८ ॥
दीक्षां पवनपुत्रस्य नारायणपरासुतां ।
रामात्मजतपःप्राप्तिं पद्मशोकं सुदारुणं ॥ ९९ ॥
पूर्वाप्तदेवजनिताद्बोधान्निर्ग्रंथताश्रयं ।
केवलज्ञानसंप्राप्तिं निर्वाणपदसंगतिं ॥ १०० ॥
एतत्सर्वं समाधाय मनः शृणुत सज्जनाः ।
सिद्धास्पदपरिप्राप्तेस्सोपानमभिसौख्यदं ॥ १०१ ॥
पद्मादीन्मुनिसत्तमान्स्मृतिपथे तावन्नृणां कुर्वतां
दूरं भावभरानतेन मनसा मोदं परं बिभ्रतां ।
पापं याति भिदां सहस्रगणनैः खंडैश्चिरं संचितं
निःशेषं चरितं तु चंद्रधवलं किं शृण्वतामुच्यते ॥ १०३ ॥
एतद्यैः कृतमुत्तमं परिहृतं तैश्चेदमेनस्करं
कर्मात्यंतविवेकचित्तचतुरा[ः ?] संतः प्रशस्ता जनाः ।
सेवध्वं चरितं पुराणपुरुषैरासेवितं शक्तितः
सन्मार्गे प्रकटीकृते हि रविणा कश्चारुदृष्टिः स्खलेत् ॥
इत्यार्षे रविषेणाचार्यप्रोक्ते पद्मचरिते सूत्रविधानं नाम प्रथमं पर्व ॥

अंते ।

एतत्तत्सुसमाहितं सुनिपुणं दिव्यं पवित्राक्षरं
नानाजन्मसहस्रसंचितघनक्लेशौघनिर्णाशनं ।
आख्यानैर्विविधैश्चितं सुपुरुषव्यापारसंकीर्तनं

भव्यांभोजपर[प्र?]हर्षजननं संकीर्तितं भक्तितः ॥ ६६ ॥
निर्दिष्टं सकलैर्नेतेन भुवनैः श्रीवर्धमानेन यत्
भूयो वासवभूतिना निगदितं जंतोः(बोः)प्रश(शि)ष्यस्य च ।
शिष्येणोत्तरवाग्मिना प्रकटितं पद्मस्य वृत्तं मुनेः
श्रेयःसाधुसमाधिवृद्धिकरणं सर्वोत्तमं मंगलं ॥ ६७ ॥
ज्ञाताशेषकृतांतसन्मतिमनःसोपानपर्वावली
पारंपर्यसमागतं सुवचनं सारार्थमत्यद्भुतं ।
आसीदिंद्रगुरोर्दिवाकरयतिः शिष्योस्य चार्हन्मुनिः
तस्माल्लक्ष्मणसेनसन्मुनिरदःशिष्यो रविस्तत्स्मृतं ॥ ६९ ॥

* * *

द्विशताभ्यधिकेन(dele न) समासहस्रे समतीतेर्धचतुर्थवर्ष सं(deleसं)-
युक्ते ।
जिनभास्करवर्धमानसिद्धे चरितं पद्ममुनेरिदं निबद्धं ॥ १८३ ॥

QQQ. No. 288. *Ádipurâṇa by Jinasena.*

आदिपुराणं । प्रथमोध्यायः ।

कवयः सिद्धसेनाद्याः वयं च कवयो मताः ।
मणयः पद्मरागाद्याः ननु काचेपि मेचकः ॥ ३९ ॥
यद्वचोदर्पणे कृत्स्नं वाङ्मयं प्रतिबिंबितं ।
तान्कवीन्बहु मन्येहं किमन्यैः कविमानिभिः ॥ ४० ॥
नमः पुराणकारेभ्यो यद्वक्त्राब्जे सरस्वती ।
येषामन्यकवित्वस्य सूत्रतापायितं वचः ॥ ४१ ॥
प्रवादिकरियूथानां केसरी नयकेसरः ।
सिद्धसेनकविर्जीयाद्विकल्पनखरांकुरः ॥ ४२ ॥
नमः समंतभद्राय महते कविवेधसे ।
यद्वचोवज्रपातेन निर्भिन्नाः कुमताद्रयः ॥ ४३ ॥
कवीनां गमकानां च वादिनां वाग्मिनामपि ।
यशः सामंतभद्रीयं मूर्ध्नि चूडामणीयते ॥ ४४ ॥
श्रीदत्ताय नमस्तस्मै तपःश्रीदीप्तमूर्तये ।
कंठीरवायितं येन प्रवादीभप्रभेदने ॥ ४५ ॥
विदुष्विणीषु संसत्सु यस्य नामापि कीर्तितं ।
निखर्वयति तद्गर्वं यशोभद्रः स पातु नः ॥ ४६ ॥
चंद्रांशुशुभ्रयशसं प्रभाचंद्रकविं स्तुवे ।
कृत्वा चंद्रोदयं येन शश्वदाह्लादितं जगत् ॥ ४७ ॥

चंद्रोदयकृतस्तस्य यशः केन न शस्यते ।
यदाकल्पमनाम्लानि सतां शेखरतां गतं ॥ ४८ ॥
शीतीभूतं जगद्यस्य वाचाराध्य चतुष्टयं ।
मोक्षमार्गं स पायान्नः शिवकोटिर्मुनीश्वरः ॥ ४९ ॥
काव्यानुचिंतने यस्य जटाः प्रबलवृत्तयः ।
अर्थान् स्मानुवदंतीव जटाचार्यः स नोवतात् ॥ ५० ॥
धर्मसूत्रानुगा हृद्या यस्य वाङ्मयोमलाः ।
कथालंकारतां भेजुः काणभिक्षुर्जयत्यसौ ॥ ५१ ॥
कवीनां तीर्थकृद्देवः किंतरां तत्र वर्ण्यते ।
विदुषां वाङ्मलध्वंसि तीर्थं यस्य वचोमयं ॥ ५२ ॥
भट्टाकलंकश्रीपालपात्रकेसरिणां गुणाः ।
विदुषां हृदयारूढा हारायंतेतिनिर्मलाः ॥ ५३ ॥
कवित्वस्य परा सीमा वाग्मित्वस्य परं पदं ।
गमकत्वस्य पर्यंतो वादिसिंहोर्च्यते न कैः ॥ ५४ ॥
श्रीवीरसेन इत्याप्तभट्टारकपृथुप्रथः ।
स नः पुनातु पूतात्मा वादिवृंदारको मुनिः ॥ ५५ ॥
लोकवित्त्वं कवित्वं च स्थितं भट्टारके द्वयं ।
वाग्मिता वाग्मिनो यस्य वाचा वाचस्पतेरपि ॥ ५६ ॥
सिद्धांतोपनिबंधानां विधातुर्मद्गुरोश्चिरं ।
मन्मनःसरसि स्थेयान्मृदुपादकुशेशयं ॥ ५७ ॥
धवलां भारतीं तस्य कीर्तिं च शुचिनिर्मलां ।
धवलीकृतनिःशेषभुवनां नंनमीम्यहं ॥ ५८ ॥
जन्मभूमिस्तपोलक्ष्म्याः श्रुतप्रशमयोर्निधिः ।
जयसेनगुरुः पातु बुधवृंदाग्रणीः स नः ॥ ५९ ॥
स पूज्यः कविभिर्लोके कवीनां परमेश्वरः ।
वागर्थसंग्रहं कृत्स्नं पुराणं यः समग्रहीत् ॥ ६० ॥
कवयोन्येपि संत्येव कस्तानुद्देष्टुमप्यलं ।
सत्कृता ये जगत्पूज्यास्ते मया मंगलार्थिना ॥ ६१ ॥

* * * * *

कवेर्भावोथवा कर्म काव्यं तज्ज्ञैर्निरुच्यते ।
तत्प्रतीतार्थमग्राम्यं सालंकारमनाकुलं ॥ ६४ ॥
केचिदर्थस्य सौंदर्यमपरे पदसौष्ठवं ।
वाचामलंक्रियां प्राहुस्तद्द्वयं नो मतं मतं ॥ ८५ ॥

सालंकारमुपारूढरसमुद्भूतसौष्ठवं ।
अनुच्छिष्टं सतां काव्यं सरस्वत्या मुखायते ॥ ९६ ॥
अस्पष्टबंधलालित्यमपेतं रसवत्तया ।
न तत्काव्यमतिग्राम्यं केवलं कटु कर्णयोः ॥ ९७ ॥
सुश्लिष्टपदविन्यासं प्रबंधं रचयंति ये ।
श्रव्यं बंधप्रसन्नार्थं ते महाकवयो मताः ॥ ९८ ॥

* * * * *

अद्भुतार्थामिमां दिव्यां परमार्थां बृहत्कथां ।
लंभैरनेकैः संदृब्धां गुणाढ्यैः पूर्वसूरिभिः ॥ ११९ ॥

चतुर्थाध्यायतः ।

लोकोत्पत्तिक्रमो ज्ञेयो जीवाद्यर्थावगाहकः ।
नित्यः स्वभावनिर्वृत्तः सोनंताकाशमध्यगः ॥ १५ ॥
स्रष्टास्य जगतः कश्चिदस्तीत्येके जगुर्जडाः ।
तद्दुर्णयनिरासार्थं सृष्टिवादः परीक्ष्यते ॥ १६ ॥
स्रष्टा सर्गबहिर्भूतः कस्थः सृजति तज्जगत् ।
निराधारश्च कूटस्थः सृष्ट्वैतत्क्व निवेशयेत् ॥१७ ॥
नैको विश्वात्मकस्यास्य जगतो घटने पटुः ।
वितनोश्च न तन्वादिमूर्तमुत्पत्तुमर्हति ॥ १८ ॥
कथं च स सृजेल्लोकं विनान्यैः कारणादिभिः ।
तानि सृष्ट्वा सृजेल्लोकमिति चेदनवस्थितिः ॥ १९ ॥
तेषां स्वभावसिद्धत्वे लोकेप्येतत्प्रसज्यते ।
किं च निर्मातृवद्विश्वं स्वतः सिद्धिमवाप्नुयात् ॥ २० ॥
सृजेद्विनापि सामग्र्या स्वतंत्रः प्रभुरिच्छया ।
इतीच्छामात्रमेवैतत्कः श्रद्दध्यादयुक्तिकं ॥ २१ ॥
कृतार्थस्य विनिर्मित्सा कथमेवास्य युज्यते ।
अकृतार्थोपि न स्रष्टुं विश्वमीष्टे कुलालवत् ॥ २२ ॥
अमूर्तो निष्क्रियो व्यापी कथमेष जगत्सृजेत् ।
न सिसृक्षापि तस्यास्ति विक्रियारहितात्मनः ॥ २३ ॥
तथाप्यस्य जगत्सर्गे फलं किमपि मृग्यतां ।
निष्ठितार्थस्य धर्मादिपुरुषार्थैष्वनार्थिनः ॥ २४ ॥
स्वभावतो विनैवार्थात्सृजतोनर्थसंगतिः ।
क्रीडेयं कापि चेदस्य दुरंता मोहसंततिः ॥ २५ ॥
कर्मापेक्षः शरीरादि देहिनां घटयेद्यदि ।

नन्वेवमीश्वरो न स्यात्पारतंत्र्यात्कुविंदवत् ॥ २६ ॥
निमित्तमात्रमिष्टश्चेत्कार्ये कर्मादिहेतुके ।
सिद्धोपस्थाप्यसौ हंत पोष्यते किमकारणं ॥ २७ ॥
वत्सलः प्राणिनामेकः सृजन्ननुनिघृक्षया ।
ननु सौख्यमयीं सृष्टिं विदध्यादनुपप्लुतां ॥ २८ ॥
सृष्टिप्रयासवैयर्थ्यं सर्जने जगतः सतः ।
नात्यंतमसतः सर्गो युक्तो व्योमारविंदवत् ॥ २९ ॥
नोदासीनः सृजेन्मुक्तः संसारी सोप्यनीश्वरः ।
सृष्टिवादावतारोयं ततश्च न कुतश्चन ॥ ३० ॥
महानधर्मयोगोस्य सृष्ट्वा संहरतः प्रजाः ।
दुष्टनिग्रहबुद्ध्या चेद्वरं दैत्याद्यसर्जनं ॥ ३१ ॥
बुद्धिमद्धेतुसांनिध्ये तन्वाद्युत्पत्तुमर्हति ।
विशिष्टसंनिवेशादिप्रतीतेर्नगरादिवत् ॥ ३२ ॥
इत्यसाधनमेवैतदीश्वरास्तित्वसाधने ।
विशिष्टसंनिवेशादेरन्यथाप्युपपत्तितः ॥ ३३ ॥
चेतनाधिष्ठितं ह्येदं कर्मनिर्मातृचेष्टितं ।
तन्वक्षसुखदुःखादिवैश्वरूप्याय कल्पते ॥ ३४ ॥
निर्माणकर्मनिर्मातृकौशलापादितोदयं ।
अंगोपांगादिवैचित्र्यमंगिनां संगिरामहे ॥ ३५ ॥
तदेतत्कर्मवैचित्र्याद्बलानात्मकं जगत् ।
विश्वकर्माणमात्मानं साधयेत्कर्मसारथिं ॥ ३६ ॥
विधिः स्रष्टा विधाता च दैवं कर्म पुराकृतं ।
ईश्वरश्चेति पर्याया विज्ञेयाः कर्मवेधसः ॥ ३७ ॥
स्रष्टारमंतरेणापि व्योमादीनां च संगरात् ।
सृष्टिवादी स निर्ग्राह्यः शिष्टैर्दुर्मतदुर्मदी ॥ ३८ ॥
ततोसावकृतोनादिनिधनः कालतत्त्ववत् ।
लोको जीवादितत्त्वानामाधारात्मा प्रकाशते ॥ ३९ ॥

अष्टात्रिंशाध्यायतः ।

गर्भान्वयक्रियाश्चैव तथा दीक्षान्वयक्रियाः ।
कर्त्रन्वयक्रियाश्चेति तास्त्रिधैवं बुधैर्मताः ॥ ५१ ॥
आधानाद्यास्त्रिपंचाशज्ज्ञेया गर्भान्वयक्रियाः ।
चत्वारिंशदथाष्टौ च स्मृता दीक्षान्वयक्रियाः ॥ ५२ ॥

कर्त्रन्वयक्रियाश्चैव सप्त तज्ज्ञैः समुच्चिताः ।
तासां यथाक्रमं नामनिर्देशोयमनूद्यते ॥ ९३ ॥
अंगानां सप्तमादंगाद्दुस्तरादर्णवादपि ।
श्लेकैरष्टाभिरुत्तेष्ये प्राप्तं ज्ञानबलं मया ॥ ९४ ॥
आधानं प्रीतिसुप्रीती धृतिर्मोदः प्रियोद्भवः ।
नामकर्मबहिर्यानानिषद्याः प्राशनं तथा ॥ ९५ ॥
व्युष्टिश्च केशवापश्च लिपिसंख्यानसंग्रहः ।
उपनीतिर्व्रतचर्या व्रतावतरणं तथा ॥ ९६ ॥
विवाहो वर्णलाभश्च कुलचर्या गृहीशिता ।
प्रशांतिश्च गृहत्यागो दीक्षाद्यं जिनरूपता ॥ ९७ ॥
मौनाध्ययनवृत्तत्वं तीर्थकृत्त्वस्य भावनाः ।
गुरुस्थानाभ्युपगमो गणापग्रहणं तथा ॥ ९८ ॥
स्वगुरुस्थानरुं(?)क्रांतिर्निःसंगत्वात्मभावना ।
योगनिर्वाणसंप्राप्तिर्योगनिर्वाणसाधनं ॥ ९९ ॥
इंद्रोपपादाभिषेकौ विधिदानसुखोदयः ।
इंद्रत्यागावतारौ च हिरण्योत्कृष्टजन्मता ॥ ६० ॥
मंदरेंद्राभिषेकश्च गुरूप्त(?)ज्योपलंभनं ।
यौवराज्यं सुराज्यं च चक्रलाभो दिशां जयः ॥ ६१ ॥
चक्राभिषेकसाम्राज्ये निष्क्रांतिर्योगसंमहः ।
आर्हत्यं तद्विहारैश्च योगत्यागोग्रनिर्वृतिः ॥ ६२ ॥
त्रयःपंचाशदेता हि मता गर्भान्वयक्रियाः ।
गर्भाधानादिनिर्वाणपर्यंताः परमागमे ॥ ६३ ॥

RRR. No. 289. *Uttarapurâṇa by Guṇabhadra.*

उत्तरपुराणांतस्थं ।

चतुर्विंशतितीर्थेशांश्चतुर्गतिनिवृत्तये ।
वृषभादिमहावीरपर्यंतान्प्रणमाम्यहं ॥ १ ॥
यस्यानताः पदनखेंदवबिंबचुंबिचूडामणिप्रकटसन्मुकुटाः सुरेंद्राः ।
न्यक्कुर्वते स्म हरमर्धशशांकमौलिलीलोद्धतं स जयताज्जिनवर्धमानः ॥ २ ॥
श्रीमूलसंघवाराशौ मणीनामिव सार्चिषां ।
महापुरुषरत्नानां स्थानं सेनान्वयोजनि ॥ ३ ॥

तत्र वित्रासिताशेषप्रवादिमदवारणः ।
वीरसेनाग्रणीर्वीरसेनभट्टारको बभौ ॥ ४ ॥
ज्ञानचारित्रसामग्रीवाग्रहीदिह[1] विग्रहं ।
विराजते विधातुं यो विनेयानामनुग्रहं ॥ ५ ॥
यत्क्रमानम्रराजन्यमुखाब्जान्यादधुः श्रियं ।
चित्रं विकाशमासाद्य नखचंद्रमरीचिभिः ॥ ६ ॥
सिद्धिभूपद्धतिर्[2]यस्य टीकां संवीक्ष्य भिक्षुभिः ।
टीक्यते हेलयान्येषां विषमापि पदे पदे ॥ ७ ॥
यस्यास्याब्जजवाक्श्रिया धवलया कीर्त्येव संश्रव्यया
संप्रीतिं सततं समस्तसुधियां संपादयंत्या सतां ।
विश्वव्याप्तिपरिश्रमादिव चिरं लोके स्थितिः संश्रिता
श्रोत्रालीनमलान्यनाद्युपचितान्यस्तानि निःशेषतः ॥ ८ ॥

अभवदिव हिमाद्रेर्देवसिंधुप्रवाहो
ध्वनिरिव सकलज्ञात्सर्वशास्त्रैकमूर्तिः ।
उदयगिरितटाद्वा भास्करो भासमानो
मुनिरनु जिनसेनो वीरसेनादमुष्मात् ॥ ९ ॥

यस्य प्रांशुनखांशुजालविसरद्वारंतराविर्भव-
त्पादांभोजरजःपिशंगमुकुटप्रत्यग्ररत्नद्युतिः ।
संस्मर्ता स्वममोघवर्षनृपतिः पूतोहमद्येत्यलं
स श्रीमाञ्जिनसेनपूज्यभगवत्पादो जगन्मंगलं ॥ १० ॥

प्रावीण्यं पदवाक्ययोः परिणतिः पक्षांतराक्षेपणे
सद्भावावगतिः कृतांतविषया श्रेयः कथाकौशलं ।
ग्रंथग्रंथिभिदिः सदध्वकवितेत्यग्र्यो गुणानां गणो
यं संप्राप्य चिरं कलंकविकलः काले कलौ सुस्थितः ॥ ११ ॥

ज्योत्स्नेव तारकाधीशे सहस्रांशाविव प्रभा ।
स्फटिके स्वच्छतेवासीत्सहजास्मिन् सरस्वती ॥ १२ ॥
दशरथगुरुरासीत्तस्य धीमान् सधर्मा शशिन इव दिनेशो विश्वलोकैकचक्षुः ।
निखिलमिदमदीपि व्यापितद्वाङ्मयूखैः प्रकटितनिजभावं निर्मलैर्धर्मसारैः ॥ १३ ॥

सद्भावः सर्वशास्त्राणां तद्भास्वद्वाक्यविस्तरे ।
दर्पणार्पितबिंबाभो बालैरप्याशु बुध्यते ॥ १४ ॥

---

१ सामग्रीमग्रहीदिव *v. l.*
२ पद्धतिं यस्य *v. l.*

प्रत्यक्षीकृतलक्ष्यलक्षणविधिर्वैश्वोपविद्यांतरा-
त्सिद्धांताब्ध्यवसानयानजनितप्रागल्भ्यवृद्धिर्धीः ।
नानानूननयप्रमाणनिपुणोगण्यैर्गुणैर्भूषितः
शिष्यः श्रीगुणभद्रसूरिरनयोरासीज्जगद्विश्रुतः ॥ १५ ॥
पुण्यश्रियोयमजयत्सुभगत्वदर्प-
मित्याकलय्य परिशुद्धमतिस्तपःश्रीः ।
मुक्तिश्रिया पटुतमा प्राहितेव दूती
प्रीत्या महागुणधनं समाशिश्रियद्यं ॥ १६ ॥
तस्य वचनांशुविसरः संततहृतदुस्तरांतरंगतमाः ।
कुवलयपद्माह्लादी जितशशिहरिदैश्वराश्मिसत्प्रसरः ॥ १७ ॥
कविपरमेश्वरनिगदितगद्यकथामातृकं पुरोश्चरितं ।
सकलच्छंदोलंकृतिलक्ष्यं सूक्ष्मार्थगूढपदरचनं ॥ १८ ॥
व्यावर्णनानुसारं साक्षात्कृतसर्वशास्त्रसद्भावं ।
अपहस्तितान्यकाव्यं श्रव्यं व्युत्पन्नमतिभिरादेयं ॥ १९ ॥
जिनसेनभगवतोक्तं मिथ्याकविदर्पदलनमतिललितं ।
सिद्धांतोपनिबंधनकर्त्रा भर्त्रा विनेयानां ॥ २० ॥
अतिविस्तरभीरुत्वादवशिष्टं संगृहीतममलधिया ।
गुणभद्रसूरिणेदं प्रहीनकालानुरोधेन ॥ २१ ॥
व्यावर्णनादिरहितं सुबोधमखिलं सुलेखमखिलहितं ।
महितं महापुराणं पठंतु शृण्वंतु भक्तिमद्भव्याः ॥ २२ ॥
इदं भावयतां पुंसां तापौ (?) भवविभित्सया ।
भव्यानां भाविसिद्धीनां शुद्धदृग्वृत्तावेद्वतां ॥ २३ ॥
शांतिर्वृद्धिर्जयः श्रेयः प्रायः प्रेयःसमागमः ।
विगमो विघ्नव्यूहेराप्तिरभ्यर्थ्यार्थसंपदां ॥ २४ ॥
बंधहेतुफलज्ञानं स्याच्छुभाशुभकर्मणां ।
विज्ञेयो मुक्तिसद्भावो मुक्तिहेतुश्च निश्चितः ॥ २५ ॥
निर्वेगत्रितयोद्भूतिर्धर्मश्रद्धाप्रवर्धनं ।
असंख्येयगुणश्रेण्या निर्जराशुभकर्मणां ॥ २६ ॥

---

१ व्यवहार for व्यवसान. *v.l.*
२ जितशिशिराशिशिररश्मि *v. l.*
३ मातृकं *v. l.*
४ नयो for तापा *v. l.*

आस्रवस्य च संरोधः कृत्स्नकर्मविमोक्षणात् ।
सिद्धिरात्यंतिकी प्रोक्ता सैव संसिद्धिरात्मनः ॥ २७ ॥
तदेतदेवं व्याख्येयं श्रव्यं भव्यैर्निरंतरं ।
चिंत्यं पूज्यं मुदा लेख्यं लेखनीयं च भक्तिकैः ॥ २८ ॥

विदितसकलशास्त्रो लोकसेनो मुनीशः
कविरविकलवृत्तस्तस्य शिष्येषु मुख्यः।
सततमिहपुराणे प्राप्य साहाय्यमुच्चै-
र्गुरुविनयमनैषीन्मान्यतां स्वस्य साद्रिः ॥ २९ ॥

यस्योत्तुंगमतंगजा निजमदस्रोतस्विनीसंगमा-
द्भृंगं वारि कलंकितं कटु मुहुः पीत्वाप्यगच्छत्तृषः ।
कौमारं घनचंदनं वनमपां पत्युस्तरंगानिलै-
र्मंदांदोलितमस्तभास्करकरच्छायं समाशिश्रियत् ॥ ३० ॥

दुग्धाब्धौ गिरिणा हरौ हतसुखा गोपीकुचोद्वृत्तनैः
पद्मे भानुकरैर्भिदेलिमदले रात्रौ च संकोचिते ।
यस्योरःशरणे प्रथीयसि भुजस्तंभांतरोत्तंभित-
स्थेये हारकलापतोरणगुणे श्रीः सौख्यमागाच्चिरं ॥ ३१ ॥
अकालवर्षभूपाले पालयत्यखिलामिलां ।
तस्मिन्विध्वस्तनिःशेषद्विषि वीप्रयशोजुषि ॥ ३२ ॥
पद्मालयमुकुलकुलप्रविकासकसत्प्रतापततमहसि ।
श्रीमति लोकादित्ये प्रध्वस्तविततशत्रुसंतमसे ॥ ३३ ॥

चेल्लपताके चेल्लध्वजानुजे चेल्लकेतनतनूजे ।
जैनेंद्रधर्मवृद्धिविधायिनि खविधुवीप्रपृथुयशसि ॥ ३४ ॥
वनवासदेशमखिलं भुंजति निष्कंटकं सुखं सुचिरं ।
तत्पितृनिजनामकृते ख्याते बंकापुरे पुरेष्वधिके ॥ ३५ ॥
शकनृपकालाभ्यंतरविंशत्यधिकाष्टशतमिताब्दांते ।
मंगलमहार्थकारिणि पिंगलनामनि समस्तजनसुखदे ॥ ३६ ॥

श्रीपंचम्यां बुधार्द्रायुजि दिवसवरे मंत्रिवारे बुधांशे
पूर्वायां सिंहलग्ने धनुषि धरणिजे वृश्चिकार्के तुलायां ।
सार्पे शुक्रे कुलीरे रविजसुरगुरौ निष्ठितं भव्यवर्यैः
प्राप्तेज्यं शास्त्रसारं जगति विजयते पुण्यमेतत्पुराणं ॥ ३७ ॥

यावद्धरा जलनिधिर्गगनं हिमांशुस्तिग्मद्युतिः सुरगिरिः ककुभां विभागाः ।
तावत्सतां वचसि चेतसि पूतमेतच्छ्रोतव्यतास्थितिमुपैतु महापुराणं ॥ ३८ ॥

धर्मोत्र मुक्तिपदमत्र कवित्वमत्र तीर्थेशिनां चरितमत्र महापुराणे ।
यद्वा कवींद्रजिनसेनमुखारविंदनिर्यद्वचांसि न मनांसि हरंति केषां ॥ ३९ ॥
कविवरजिनसेनाचार्यवर्यार्यमासौ मधुरिमणि न वाच्यो नाभिसूनोः पुराणे ।
तदनु च गुणभद्राचार्यवाचो विचित्राः सकलकविकरींद्रव्रातसिंह्यो जयंति ॥ ४० ॥
यदि सकलकवींद्रप्रोक्तसूक्तप्रचारश्रवणसरसचेतास्तत्त्वमेवं सखे स्याः ।
कविवरजिनसेनाचार्यवक्त्रारविंदप्रणिगदितपुराणाकर्णनाभ्यर्णकर्णः ॥ ४१ ॥
धर्मः कश्चिदिहास्ति नैतदुचितं वक्तुं पुराणं महत्
श्रव्याः किंतु कथास्त्रिषष्टिपुरुषाख्यानं चरित्रार्णवः ।
कोप्यस्मिन्कवितागुणोस्ति कवयोप्येतद्वचोब्जालयः
कोसावत्र कविः कवींद्रगुणभद्राचार्यवर्यः स्वयं ॥ ४२ ॥

इत्यार्षे भगवद्गुणभद्राचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसंग्रहे पुराणसमाप्तौ प्रशस्तिवर्णनं नाम सप्तसप्ततितमं पर्व ॥

स्व० श्रीः संवत् १६४६ शक १५७२ भाद्रमासि कृष्णे गुरुवारे ॥

The part of stanza 37 in the above which contains the positions of the heavenly bodies is corrupt. It has thus been corrected by Mr. Śaṁkar B. Dîkshit after an actual calculation :

श्रीपंचम्यां बुधार्द्रायुजि दिवसवरे मंत्रिवारे सुधांशौ
पूर्वायां सिंहलग्ने धनुषि धरणिजे वृश्चिकार्कौ तुलागौ ।
सूर्ये शुक्रे कुलीरे गवि च सुरगुरौ

The following are his notes on the passage:—

" Here मंत्रिवारे=गुरुवारे; वृश्चिकार्कौ=आर्कौ (शनौ) वृश्चिके; तुलागौ=तुलायामगौ (राहौ); गवि=वृषभे. That is, the positions were: — सूर्यः—कुलीरे; चंद्रः—पूर्वा[भाद्रपदा]यां; धरणिजः—धनुषि; बुधः—आर्द्रायां; सुरगुरुः—वृषभे; शुक्रः—कुलीरे; शनिः—वृश्चिके; राहुः—तुलाया. The लग्न was सिंह (which was from about 4 to 9 ghaṭîs after sunrise). And this statement is correct, in Śaka years 819 and 820, for no other day but अमांत आषाढ कृ. ९ गुरुवार Śaka 819, 23rd June, 897 A. D." For श्रीपंचम्यां बुधार्द्रायुजि some Mss. have श्रीपंचम्यश्वयुजे which violates the metre as it is, but might be amended to श्रीपंचम्याश्वयुज्यायुजि, if this were astronomically correct.

SSS. No. 309. *Śântinâthapurâṇa.*

शांतिनाथपुराणे ।

येन प्ररूपितो धर्मो वर्ततेद्यापि दुख(र्ग?)मे ।
काले मुनिवरैर्लोके धृतश्च श्राबि(व)कैः सदा ॥ १२ ॥

तस्मै श्रीवर्धमानाय महावीराय प्रत्यहं ।
जगत्त्रयहितायैव नमः कर्मारिशांतये ॥ १३ ॥
शेषान् सर्वजिनाधीशान्धर्मसाम्राज्यनायकान् ।
लोकत्रयहितान्वंदे स्तुतान्कृत्वनरामरैः ॥ १४ ॥
चतुर्विंशतितीर्थेशान्सादृश्यान् (न्सदृशान्) सद्गुणैर्भुवि ।
महातिशयसंपन्नान्प्रातिहार्यादिभूषितान् ॥ १५ ॥
अनंतगुणसंयुक्तान्भव्यजी वाववोधकान् ।
मुक्तिभर्तृन्प्रवंदेहं प्रारब्धार्थप्रसिद्धये ॥ १६ ॥
प्रवर्तयति यो धर्मं पूज्यः सर्वनरामरैः ।
संघमध्ये सभायुक्तो विदेहे पूर्वनामनि ॥ १७ ॥
तं श्रीसीमंधरं वंदे भव्यलोकैकबांधवं ।
धर्माकरं जिनाधीशं जगदानंददायि(य)कं ॥ १८ ॥
अन्ये ये बहवः संति तीर्थनाथाः सुरार्चिताः ।
अर्धतृतीयसद्द्वीपे तान्सर्वान्प्रणमाम्यहं ॥ १९ ॥
प्रकटीकृतसद्धर्मान्जिनाधीशान्गणाधिपान् ।
त्रिजगज्जनसंसेव्यान्कालत्रितयसंभवान् ॥ २० ॥
केवलज्ञानसद्दीपान् प्राप्तानंतदर्शनानि(न्वि?)तान् ।
प्रणमामि महासौख्यान्महावीर्यान्सुमुक्तिदान् ॥ २१ ॥
सिद्धान्कर्मारिनिर्मुक्तान्गुणाष्टकविभूषितान् ।
लोकाग्रशिखरारूढाञ्जिननाथनमस्कृतान् ॥ २२ ॥
अनंतसुखसंपन्नान्सर्वक्लेशपरिच्युतान् ।
स्मरामि मानसे नित्यं तद्गुणग्रामहेतवे ॥ २३ ॥
ये चरंति स्वयं साक्षात्पंचाचारगुणान्भुवि ।
चारयंति विनेयानां मुनीनां मुक्तिसिद्धये ॥ २४ ॥
तेषामाचार्यवर्गाणां पादपद्मान्सुरार्चितान् ।
प्रणमाम्युत्तमांगेन पंचाचारविशुद्धये ॥ २५ ॥
ये पठंति स्वयं सिद्धैः (द्धया) अंगपूर्वप्रकीर्णकान् ।
पाठयंति यतीनां च शिष्याणां मुक्तिहेतवे ॥ २६ ॥
तान्पाठकमुनीन्वंदे द्वादशांगाब्धिपारगान् ।
सर्वसत्त्वहितोद्युक्तानंगपूर्वादिप्राप्तये ॥ २७ ॥
ये साधयंति लोकेस्मिन्मुक्तिमार्गं सुनिर्मलं ।
तपोभिर्दुष्करैर्घोरै रत्नत्रयसमायुतः ॥ २८ ॥

त्रिकालयोगयुक्तांस्तान्साधून्वंदे गुणाकरान् ।
तपसा धैर्यसंपन्नांस्तद्गुणाय महायतीन् ॥ २९ ॥
ग्रंथादौ संस्तुता येपि वंदिताश्च नमस्कृताः ।
स्वशक्त्या भक्तिभारेण पंचैव परमेष्ठिनः ॥ ३० ॥
ते कुर्वंतु ममात्यंतं मतिं ग्रंथार्थपारगां ।
प्रारब्धशास्त्रसिद्ध्यर्थं बोधिं च मुक्तिहेतवे ॥ ३१
ये ग्रंथंति स्वयं साक्षाद्द्वादशांगश्रुतं परं ।
पवित्रं भव्यलोकानां हितमुद्दिश्य मुक्तिदं ॥ ३२ ॥
सर्वान्वृषभसेनादीन्गौतमांतान्गणाधिपान् ।
तान्नमामि त्रिशुद्ध्याहं कवित्वादिगुणाप्तये ॥ ३३ ॥
सुधर्माचार्यनेवाहं केवलावगमेशिनं ।
सुधर्मामृतसंवृष्ट्या वंदे मेघोपमं भुवि ॥ ३४ ॥
येन बाल्येतिवैराग्यखड्गेनैव हतो रिपुः ।
कामो मोहश्च वंदे तं श्रीजंबूस्वामिनं परं ॥ ३५ ॥
विष्णुश्च नंदिमित्राख्योपराजितसमाह्वयः ।
गोवर्धनो भद्रबाहुर्गतः पारं श्रुतांबुधेः ॥ ३६ ॥
श्रुतकेवलिनश्चैव पंचैते मुनिनायकाः ।
भवंति प्रणमाम्येतान्धर्मसन्मार्गवर्तकान् ॥ ३७ ॥
विशाखाचार्यमुख्या ये बहवः संति सूरयः ।
प्रत्येकं मंगलार्थं तान्प्रवंदे धर्मदीपकान् ॥३८॥
श्रीकुंदकुंदनामानमाचार्यं भव्यबोधकं ।
महाकविं सुरैः पूज्यं तद्गुणाय नमाम्यहं ॥ ३९ ॥
नमोस्तु कवये त्यक्तकलंकवचसे भुवि ।
हितायाप्यकलंकाय स्वामिने वादिने सदा ॥ ४० ॥
नमः समंतभद्राय कवींद्राय चिदात्मने ।
नमः श्रीपूज्यपादाय प्रपूज्याय बुधोत्तमैः ॥ ४१ ॥
सिद्धांतपारगायैव नेमिचंद्राय संनमः ।
प्रभाचंद्राय लोकेस्मिन्नमश्चंद्रोपमाय वै ॥ ४२ ॥
ये संति बहवोन्येपि जिनसेनादिसूरयः ।
सम्यक्त्वालंकृता दक्षाः ज्ञानविज्ञानपारगाः ॥ ४३ ॥
धर्मप्रभावका नित्यं मुक्तिसंगमलालसाः ।
ग्रंथादौ मंगलार्थं च तेषां पादौ नमाम्यहं ॥ ४४ ॥

ते सर्वे कवयोत्रैव वंदिता पूज्यतास्तुताः ।
दिशंतु मे मतिं सारां सर्वशास्त्रार्थपारगां ॥ ४९ ॥

TTT. No. 303. *Pârśvanâthacharitra.*

पार्श्वनाथचरित्रं ।

आद्यं ।

नमः श्रीपार्श्वनाथाय विश्वविघ्नौघनाशिने ।
त्रिजगत्स्वामिने मूर्ध्ना ह्यनंतमहिमात्मने ॥ १ ॥

* * *

जैनशासनमाहात्म्यप्रकाशनपरान्वरान् ।
महाकवीन्महर्षींश्च द्वादशांगाब्धिपारगान् ॥ २८ ॥
गौतमादीन्गणाधीशान्विश्वनाथैर्नुतक्रमान् ।
वंदे सर्वहितान्मूर्ध्ना तद्गुणग्राहहेतवे ॥ २९ ॥
येन पूर्वविदेहे साक्षाज्जिनेंद्रो नमस्कृतः ।
नमामि शिरसा कुंदकुंदाचार्यं कविं हितं ॥ ३० ॥
कलंकातिगवाक्याय कवित्वादिगुणाब्धये ।
वादिने धर्मधौर्याय अकलंकस्वामिने नमः ॥ ३१ ॥
समंताद्भुवने भद्रा विश्वलोकोपकारिणी ।
यद्वाणी तं प्रवंदे समंतभद्रकवीश्वरं ॥ ३२ ॥
अन्येपि जिनसेनाचार्यादयः कवयोखिलाः ।
वंदितास्ते स्तुताः संतु मे कवित्वादिसिद्धये ॥ ३३ ॥

अंते ।

इति भट्टारकश्रीसकलकीर्तिविरचिते श्रीपार्श्वनाथचरित्रे श्रीपार्श्वनाथमोक्षगमनो नाम त्रयोविंशतितमः सर्गः संवत् १६६२ वर्षे भाद्रपदमासे शुक्लपक्षे पंचम्यां तिथौ ५भृगुवासरे* * *

UUU. No. 314. *Harivaṁśapurâṇa.*

हरिवंशपुराणं । आद्यं ।

सिद्धं संपूर्णभव्यार्थं सिद्धेः कारणमुत्तमं ।
प्रशस्तदर्शनज्ञानचारित्रप्रतिपादनं ॥ ४५ ॥

* * *

श्रीवीरजिननाथोक्तो गौतमं गणनायकं ।
सोर्थः प्राप्तः सुधर्मं च श्रीजंबूस्वामिनं ततः ॥ ४६ ॥
विद्युच(च)रं ततः कीर्तिमनुत्तरविदं क्रमात् ।

रविषेणाभिधाचार्यं जिनसेनं गुरुं ततः ॥ ४७ ॥
तद्वाक्यरचनां प्राप्य मयात्र क्रियते स्फुटं ।
ग्रंथः सुखेन मनुजा यथा जानंति सत्कथां ॥ ४८ ॥
भद्रबाहुं प्रणम्याथ यतिसंघनमस्कृतं ।
श्रीकुंदकुंदाचार्यादीन्मुनीश्रत्नत्रयांकितान् ॥ ४९ ॥
गुरुं सकलकीर्तिं च श्रुतांभोधिं महामुनिं ।
भक्त्या भुवनकीर्तिं च चंचत्कीर्तिं तपोनिधिं ॥ ५० ॥
निर्ग्रंथाञ्शुद्धचारित्रान्नित्याद्यानपरानपि ।
अनुक्रमात्संगमुक्तान्रागद्वेषातिगान्सदा ॥ ५१ ॥
तन्मया जिनदासेन संक्षेपादुच्यतेधुना ।
हरिवंशस्य चरितं भव्यश्रुतिसुखाकरं ॥ ५२ ॥

अंते ।

श्रीवर्धमानेन जिनेश्वरेण त्रैलोक्यवंद्येन यदुक्तमादौ ।
ततः परं गौतमसंज्ञकेन गणेश्वरेण प्रथितं जनानां ॥ ३३ ॥
ततः क्रमाच्छ्रीजिनसेननाम्नाचार्येण जैनागमकोविदेन ।
सत्काव्यकेलीसदनेन पृथ्व्यां नीतं प्रसिद्धिं चरितं हरेश्च ॥ ३४ ॥
श्रीकुंदकुंदान्वयभूषणोथ बभूव विद्वान्किल पद्मनंदी ।
मुनीश्वरो वादिगजेंद्रसिंहः प्रतापवान्भूवलये प्रसिद्धः ॥ ३५ ॥
तत्पट्टपंकेजविकासभास्वान्बभूव निर्ग्रंथवरः प्रतापी ।
महाकवित्वादिकलाप्रवीणस्तपोनिधिः श्रीसकलादिकीर्तिः ॥ ३६ ॥
पट्टे तदीये गुणवान्मनीषी क्षमानिधानो भुवनादिकीर्तिः ।
जीयाच्चिरं भव्यसमूहवंद्यो नानायतिव्रातनिषेवणीयः ॥ ३७ ॥
जगति भुवनकीर्तिर्भूतले ख्यातकीर्तिः
श्रुतजलनिधिवेत्तानंगमानप्रभेत्ता ।
विमलगुणनिवासश्छिन्नसंसारपाशः
स जयति जिनराजः साधुराजीसमाजः(जे) ॥ ३८ ॥
सद्ब्र(ब्र)ह्मचारी गुरुपूर्वकोस्य भ्राता गुणज्ञोस्ति विशुद्धचित्तः ।
जिनस्य दासो जिनदासनामा कामारिजेता विदितो धरित्र्याम् ॥ ३९ ॥
श्रीनेमिनाथस्य चरित्रमेतदनेन नीत्वा रविषेणसूरेः ।
समुद्भवं स्वान्यसुखप्रबोधहेतोश्चिरं नंदतु भूमिपीठे ॥ ४० ॥ ४१—४७ ।

इति श्रीहरिवंशे भट्टारकश्रीसकलकीर्तिशिष्यब्रह्मचारिजिनदासविरचिते नेमिनाथनिर्वाणगमनवर्णनो नामैकोनचत्वारिंशत्तमः सर्गः * * संवत् १६९६ वर्षे पौष शुदि १०गुरुवासरे * *

VVV. No. 310. *Srîpâlacharita.*

श्रीपालचरितं। अंते।

गच्छे (च्छे) श्रीमति मूलसंघतिलके सारस्वतीये शुभे
श्रीभट्टारकपद्मनंदिमुनिपो देवेंद्रकीर्तिस्ततः।
विद्यानंदिगुरुस्ततो गुणनिधिः पट्टे तदीये सुधीः
श्रीभट्टारकमल्लिभूषणगुरुः सद्बोधसिंधुर्महान् ॥ ३१ ॥
तच्छिष्यो गुणरत्नरंजितमतिः श्रीसिंहनंदी गुरुः
सद्रत्नत्रयमंडितोतिनितरां भव्यौघनिस्तारकः।
तेषां पादपयोजयुग्ममधुपः श्रीनेमिदत्तो यती(तिः)
चक्रे चारुचरित्रमेतदुचितं श्रीपालजं संक्रियात्(?) ॥ ३२ ॥
अग्रोतोत्तमवंशमंडनमणिः स ब्रह्मचारी शुभः
श्रीभट्टारकमल्लिभूषणगुरोः पादाब्जसेवारतः।
जीयादत्र महेंद्रदत्तसुयती(तिः) संज्ञानवान्निर्मलः
सूरिश्रीश्रुतसागरादियतिनां सेवापरः सन्मतिः ॥ ३३ ॥
ख्याते मालवदेशशस्थे पूर्णाशानगरे वरे।
श्रीमदादिजिनागारे सिद्धं शास्त्रमिदं शुभं ॥ ३४ ॥

संवत्सार्द्धसहस्रे च पंचाशीतिसमुत्तरे।
आषाढे शुक्लपंचम्यां संपूर्णं रविवासरे ॥ ३५ ॥

इति श्रीसिद्धचक्रपूजातिशयं प्राप्ते श्रीपालमहाराजचरिते भट्टारकश्रीमल्लिभूषणशिष्याचार्य-श्रीसिंहनंदिब्रह्मश्रीशांतिदासानुमोदिते ब्रह्मनेमिदत्तविरचिते श्रीपालमहामुनींद्रनिर्वाणगमन-वर्णनो नाम नवमोधिकारः समाप्तः ॥ ९ ॥ संवत् १७९० वरषे(र्षे) भाद्रपदसितपंचम्यां शुक्रवासरे * * *

WWW. No. 292. *Jivamdharasvâmicharitra.*

जीवंधरस्वामिचरित्रं। आद्यं।

श्रीसन्मतिः सतां कुर्यात्सर्वहितं(त)फलं परं।
येनाप्येत महामुक्तराजस्य वरवैभवः ॥ १ ॥ २–९।
गौतमं धर्मपारीणं पूज्यपादं प्रबोधकं।
समंतभद्रमानंदमकलंकगुणाकरं ॥ ६ ॥
जिनसेनं शुभासीनं ज्ञानभूषं परं गुरुं।
शुभचंद्रं प्रणम्योच्चैर्वक्ष्ये श्रीजीवकोद्भवं ॥ ७ ॥

अथ जंबूमति द्वीपे शस्ये भरतनामनि।
देशोस्ति मगधाभिख्यो नानाग्रामपुराश्रितः ॥ ८ ॥

अंते ।

श्रीमूलसंघो यतिमुख्यसेव्यः
श्रीभारतीगछ(च्छ)विशेषशोभः ।
मिथ्यामतध्वांताविनाशदक्षो
जीयाच्चिरं श्रीशुभचंद्रभासी ॥ ८२ ॥
श्रीमद्विक्रमभूपतेर्वसुहतद्वैते शते सप्तह (?)
वेदै (दैः) न्यूनतरे शुभे शुभतरे मासे वरे च (?) शुचौ
वारे गीष्पतिके त्रयोदशतिथौ सन्नूतने पत्तने
श्रीचंद्रप्रभधाम्नि वै विरचितं चेदं मया तोषतः ॥ ८३ ॥
इति श्रीमज्जीवंधरस्वामिचरिते जीवंधरस्वामिमोक्षगमनवर्णनं नाम त्रयोदशो लंभः॥१३॥

XXX. No. 313. *Subhaumacharitra..*

सुभौमचरित्रान्तः ।

अथ प्रशस्तिः ॥ अथासीन्मूलसंघेस्मिन्गछे(च्छे) सारस्वताभिधे ।
मुनिः श्रीकुंदकुंदाख्यः श्रीसीमंधरतीर्थगः ॥ ७८ ॥
तस्यान्वये विदां मान्यः पद्मनंदी यतीश्वरः ।
भव्यांगिपद्मनंदी च समभूत्तपसां निधिः ॥ ७९ ॥
भट्टारकवरेण्योस्य पट्टे सकलकीर्तिवाक् ।
धर्मः प्रकाशितो येन स जीयाज्जगदीश्वरः ॥ ८० ॥
गुरुर्भुवनकीर्त्याख्यस्तत्पट्टोदयभानुमान् ।
जातवाञ्जनितानंदो वनवासी महातपाः ॥ ८१ ॥
गुरुभ्राता तदीयोभूद्रत्नकीर्तिगुणाग्रणीः ।
स्थविरो मंडलाचार्यपदभाग्धर्मकार्यकृत् ॥ ८२ ॥
तत्पट्टे मंडलाचार्यो यशःकीर्तिर्यशोनिधिः ।
अजायतागमाध्यात्मपुराणार्थविचक्षणः ॥ ८३ ॥
वादित्वस्य परं(रा) सीमा गमकस्य परं पदं ।
कवित्वादेः परं धाम गुणचंद्रस्तदन्वये ॥ ८४ ॥
जिनचंद्रो जयत्वत्र बलात्कारगणाग्रणीः ।
तत्पट्टे सर्वथैकांतानिर्जिताशेषवाक्सू (?) रिः ॥ ८५ ॥
पट्टे सकलचंद्रोभूत्तदीये विपुलोदये ।
सैद्धांतिकः सतां वंद्यः सूरिवर्यो विदां वरः ॥ ८६ ॥
यस्त पट्टे वरीवर्ति भट्टारकपदास्थितः ।
रत्नंचद्रो विदां मान्यः स्याद्वादसकलार्थवित् ॥ ८७ ॥

संवते(ति) षोडशाख्याने श्र्यशीतिवत्सरांकिते ।
मासि भाद्रपदे श्वेतपंचम्यां गुरुवारके ॥ ८८ ॥
पत्तने पाटलीपुत्रे मगधांतःप्रवर्तिनि ।
स्वर्धुनीतटगे पार्श्वसुदर्शनालयाश्रिते ॥ ८९ ॥
सलेमसाहसद्राज्ये सर्वभूच्छाधिपाधिपे ।
रक्षत्यत्र धराचक्रं निर्जिताखिलविद्विषि ॥ ९० ॥
श्रीमत्प्रभाचंद्रगणींद्रपट्टे भट्टारकश्रीमुनिचंद्रकीर्तेः ।
पट्टांबरोद्भासनभानुमाली भट्टारकोभूद्दिविजेंद्रकीर्तिः ॥ ९१ ॥
तच्छिष्यतदाम्नायकौ हि सुभगौ खंडेलवालान्वयौ
श्रीतेजपालहेमनामपरभौ धनराड्रेषांगजौ ।
संप्रीतौ गुरुभक्तिभाजनपरौ सद्दर्शनालंकृतौ
चक्राते सुभौमचरित्ररचने साहाय्यसापेक्षतां ॥ ९२ ॥
सौमण्यगोत्रे तेजाख्यो बुधादिपदसंयुतः ।
पट्टणिगोत्रजो हेम[:] पट्टणे च तदन्वये ॥ ९३ ॥
संमेदाचलयात्रायै रत्नचंद्रास्समागताः ।
जगन्मल्लात्मजाचार्यजयकीर्तिभिरन्विताः ॥ ९४ ॥
श्रीमत्कमलकीर्त्याह्वैः सूरिभिश्च सुवर्णिभिः ।
कल्याणकचराख्यानकान्हजीभोगिदासकैः ॥ ९५ ॥
श्रीमद्धुवडजातीयमह्याख्यवणिक्पतिः ।
चंपाकुक्षिसमुत्पन्ना रत्नचंद्रा व्यरीरचन् ॥ ९६ ॥ त्रिभिः कुलकं ।
श्रीमत्खंडेलवालेषु श्रयग्रवालेषु दानिषु ।
जैसवालेषु सद्भक्तिं कुर्वत्सु श्रावकेषु च ॥ ९७ ॥
धनराट्कोसिपुत्रस्य तेजपालविपश्चितः ।
साहाय्याखिलसामग्रीं सा(ग्रीम)पेक्ष्य स्वेप्सितप्रदां ॥ ९८ ॥
श्रीमत्खंडेलवालार्यो हीराख्यभ्रातृजान्वितः ।
हमीरदेपतिर्हेमराजः कारितवानिदं ॥ २२ ॥ युग्मं ।
आज्यवाग्वरदेशस्थसागपत्तनवासिनः ।
हेमाख्यश्रेष्ठिनः पुत्रो जयतान्मंगलाभिधः ॥ ९९ ॥
ब(च?)हुआणकृष्णदासस्य क्षत्रियान्वयसन्मणे [:] ।
महौजसौ कुमारौ स्त[:] राजसिंहामराभिधौ ॥ १० ॥
भीमाद्याह्वानना तत्राकार्यश्रीहेमकीर्त्तिर्यः(?) ।
यं पट्टे स्थापयामासू रत्नेंदुं संघसादरात ॥ २५ ॥

तेनेदं चरितं वणिंजेसराजप्रसादतः ।
वादिचंद्रानुभावाच्चाचंद्रार्कं जयताच्चिरं ॥ २६ ॥
एकोपि सिंहसदृशः सकलावनीशो हत्वा पितुर्वधकृतौ नरकं प्रपद्य ।
दुःखं प्रभुज्य बहुधा भरतेत्र तस्मान्निर्गत्य तीर्थपदभाग्भावितास्तु सिद्धौ ॥ २७ ॥
इति श्रीसुभौमचरित्रे सूरिसकलचंद्रानुचरभट्टारकश्रीरत्नचंद्रविरचिते विबुधश्रीतेजपालसाहाय्यसापेक्षेय श्रीखंडेलवालान्वयपट्टणिगोत्रांबरादित्यश्रेष्ठिश्रीहेमराजनामांकिते सुभौमनरकप्राप्तिवर्णनो नाम सप्तमसर्गः ॥

संवत् १८२९ का शाके १६९४ प्रवर्तमाने मासोत्तममासे मधुमासे श्वेतपक्षे तिथौ द्वितीयायां गुरुवासरे लिप्यकृतम् ॥

YYY. No. 252. *Abhidhânachintâmaṇinâmamâlâ with Vâdi-Srîvallabha's Commentary.*

अभिधानचिंतामणिनाममाला सटीका ।

टीकादौ ।

श्रीमदर्हंतमानम्य संवित्संपद्विधायिनं ।
श्रीहेमचंद्रसंदृब्धनामकोषप्रबोधदं ॥ १ ॥
स्वकीयज्ञानसिद्ध्यर्थं श्रीश्रीवल्लभवाचकः ।
सारोद्धारमिमं नाम्नां तनुते नामनिर्णयात् ॥ २ ॥
निरणायि मया नाम्नां निर्णयो नामनिर्णये ।
तत एवायमुद्धारः शीघ्रज्ञानाय तन्यते ॥ ३ ॥

टीकांते ।

श्रीवीरशासनसमुद्रत आविरासी-
त्प्रोद्यत्कलाभिरभितः प्रथितः पृथिव्यां ॥
स्फूर्जन्महःप्रसरनाशिततामसौघः
श्रीचंद्रगच्छ इति चंद्र इवोदितश्रीः॥ १ ॥
तत्रासीद्विबुधाग्रणीर्गणगुरुः श्रीवर्धमानांतिषत्
सूरींद्रः स जिनेश्वरो दशशताशीत्या मिते संवति ।
जित्वा श्रीअणहिल्लपत्तनपुरे दुर्वादिनो दुर्लभ-
क्ष्मापास्याद्भिरुदं वरं खरतरेत्याख्यं यकःप्राप्तवान् ॥ २ ॥
तत्पट्टेभयदेवसूरिरभवद्रंगन्नवांगीमहा-
वृत्तिस्तंभनपार्श्वनाथभगवन्मूर्तिप्रकाशैककृत् ।
तच्छिष्यो जिनवल्लभाभिधगुरुः कुरक्रियाकृद्भवी

सम्यक्पिंडविशुद्धिशास्त्रविलसत्कर्मादिशास्त्रैकरुत् ॥ ३ ॥
एवं सूरिपरंपरागत इह श्रेष्ठे गणे दीप्यते
स श्रीमज्जिनचंद्रसूरिसुगुरुश्चारित्रपावित्र्यभूत् ।
तेजःश्रीमदकब्बराभिधनृपः श्रीपातिसाहिर्मुदा-
वादीद्यं सुयुगप्रधान इति सन्नाम्ना यथार्थेन वै ॥ ४ ॥
श्रीमंत्रीश्वरकर्मचंद्रविहितोद्यत्कोटिटंकव्यय-
श्रीनंद्युत्सवपूर्वकं युगवरो यस्मै ददौ स्वं पदम् ।
श्रीमल्लाभपुरे दयादृढमतिः श्रीपातिसाह्याग्रहा-
न्नंद्याच्छ्रीजिनसिंहसूरिसुगुरुः स स्फीततेजोयशाः ॥ ५ ॥
सुरत्ख[रत]राह्वस्य गच्छस्येश्वरयोस्तयोः ।
धर्मसंबंधिसाम्राज्ये विजयिन्यद्भुतौजसि ॥ ६ ॥
तथा योधपुरद्रंगे सूरसिंहनरेशितुः ।
राज्ये च वत्सरे सप्तषष्टिषट्चंद्रसंमिते ॥ ७ ॥
पूर्वं श्रीजिनराजसूरिसुगुरोः शिष्याग्रणीः शास्त्रकृ-
ज्जज्ञे श्रीजयसागरो भुवि ततः श्रीरत्नचंद्रोभवत् ।
दीक्षोतोजनि भक्तिलाभसुगुरुश्चारित्रसारस्तत-
श्चत्वारः क्रमतो बभुर्वरमहोपाध्यायमिश्रा अमी ॥ ८ ॥
श्रीमच्चारित्रसाराणां पाठकानां गुणौकसाम् ।
शिष्योभूद्वाचनाचार्यभानुमेरुः प्रतापवान् ॥ ९ ॥
देदीप्यंतेधुना तस्य शिष्यमुख्या विचक्षणाः ।
ज्ञानविमलनामानः पाठका गुरवो मम ॥ १० ॥
तच्छिष्यो वाचनाचार्यो वादिश्रीवल्लभोभवत् (दृभत् another Ms.) ।
श्रीहैमना[म]मालायां नाम्नां सारोद्धृतिं शुभां ॥ ११ ॥
हैमव्याकरणेणादिपाणिनीयादिकं भृशं ।
दृष्ट्वैषोत्रोद्यमश्चक्रे नामकोशांश्च भूयसः ॥ १२ ॥
तथापि वितथं यत्स्यात्तदुत्सार्य विशारदैः ।
उपकारपराः संतो यतो दोषापकारकाः ॥१३ ॥

* * * * *

संवत् १७१९ वर्षे मार्गशीर्षकृष्णचतुर्थ्यां .....

ZZZ. No. 258. *Uttarâdhyayanabṛihadvṛitti by Śântyâchârya.*

उत्तराध्ययनसूत्रबृहद्वृत्तिः ।

अंते ।

अस्ति विस्तारवानुर्व्यां गुरुशाखासमन्वितः ।
आसेव्यो भव्यसार्थानां श्रीकौटिकगणद्रुमः ॥ १ ॥
तदुत्थवैरशाखायामभूदायतिशालिनी ।
विशाला प्रतिशाखेव श्रीचंद्रकुलसंततिः ॥ २ ॥
तस्याश्चोत्पद्यमानच्छदनिचयसदृक्काथकर्णान्वयोत्थ-
श्रीथारापद्रगच्छप्रसवत(भ)रलसद्धर्मकिंजल्कपानात् ।
श्रीशांत्याचार्यभृंगो यदिदमुदगिरत्सन्मधु श्रोत्रपेयं
तद्भो भव्यास्त्रिदोषप्रशमकरमतो गृह्यतां लिह्यतां च ॥ ३ ॥
श्रीभिल्लमालकुलशेखरशांत्यमात्य-
निर्मापिताणहिलपाटकचैत्यगेहे ।
भ्रातृव्यभूपकमहत्तमकारितोरु-
सौवर्मरम्यकलशान्वयमूर्तकीर्तौ ॥ ५ ॥
श्रीशांतिसूरिरकरोद्गुणसेनसूरि-
वाचोत्तराध्ययनशासनवृत्तिमेनां ।
प्रख्यापिता तदनु तद्गुणसर्वदेव-
गुणगणैकसुशिष्य(ष्य)वर्गः (?) ॥ ६ ॥
सिद्धांतस्वाध्यायव्यसनतयान्यासु वृत्तिषु सतीषु ।
यद्विरचितेयमपरा तत्सद्धिर्मर्षणीयं मे ॥ ७ ॥
यस्याभूद्गुरुरागमे गुणनिधिः श्रीसर्वदेवाह्वयः
सूरीशोभयदेवसूरिरचितख्यातप्रमाणेपि च ।
तस्येयं सुगुरुद्वयादधिगत(?)दल्पात्मविद्यागुण-
प्रख्याख्याय चिरं भुवि प्रचरतु श्रीशांतिसूरेः कृतिः ॥

संवत १६६७ वर्षे माहवदि १४ दिने तपागच्छालंकारभट्टारकपुरंदरसवाई-जगद्गुरुबिरुदधारकश्रीविजयसेनसूरीश्वरतच्छिष्यमहोपाध्यायश्रीनयविजयगणितच्छिष्यपंडितश्रीकीर्तिविजयगणिभिःश्रीअकब्बरपुरे

AAAA. No. 260. *Devendragaṇi's Uttarâdhyayanasûtravritti.*

उत्तराध्ययनसूत्रवृत्तिः ।

आदौ ।

प्रणम्य विघ्नसंघातघातिनस्तीर्थनायकान् ।
सिद्धांश्च सर्वसाधूंश्च स्तुत्वा च श्रुतदेवतां ॥ १ ॥
आत्मस्मृतये वक्ष्ये जडमतिसंक्षेपरुचिहितार्थं च ।
एकैकार्थनिबद्धां वृत्तिं सूत्रस्य सुखबोधां ॥ २ ॥
बहुवर्थाद्बृद्धकृताद्गंभीराद्विवरणात्समुद्धृत्य ।
अध्ययनानामुत्तरपूर्वाणामेकपाठगतं ॥ ३ ॥
अर्थांतराणि पाठांतराणि सूत्रे च वृद्धटीकातः ।
बोद्धव्यानि यतोयं प्रारंभो गमनिकामात्रं ॥ ४ ॥

अंते ।

इत्युत्तराध्ययनटीकायां सुखबोधायां षट्त्रिंशमध्ययनं समाप्तं । इत्युत्तराध्ययनटीकायां षट्त्रिंशमध्ययनं समाप्तं ।

अस्ति विस्तारवानुर्व्यां गुरुशाखासमन्वितः ।
आसेव्यो भव्यसार्थानां श्रीकोटिकगणद्रुमः ॥ १ ॥
तदुत्थवैर[शा]खायामभूदायतिशालिनी ।
विशाला प्रतिशाखेव श्रीचंद्रकुलसंततिः ॥ २ ॥
तस्याश्चोत्पद्यमानच्छदनिचयसदृक्काचकर्णान्वयोत्थ-
श्रीधारापद्मगच्छप्रतवभरलसमर्द्ध(द्धर्म(किंजल्कपानात् ।
श्रीशांत्याचार(र्य)भृंग[:] प्रवरमधुसमामुत्तराध्य(ध्या)[य]वृत्तिं ।
विद्वल्लोकस्य दत्तप्रमुदमुदगिरद्यां गभीरार्थसारां ॥३॥
तस्या[:]समुद्धृता वे(चै)षा सूत्रमात्रस्य वृत्तिका ।
एकपाठगता मंदबुद्धया(द्धी)नां हितकाम्यया ॥४॥
आत्मसंस्मरणार्थाय तथा मंदधिया मया ।
अतोपराधमेनं मे क्षमं(क्षाम्यं)तु श्रुतशालिनः ॥ ५ ॥
आसीच्चंद्रकुलोद्भूतो विख्यातो जगतीतले ।
अक्षमाराजितोप्युच्चैर्यः क्षमाराजितः सदा ॥ ६ ॥
धर्मो नु मूर्तिमानेव सौम्यमूर्तेः शशांकवत् ।
वर्जितश्चाशुभैर्भावै रागद्वेषमदादिभिः ॥७॥
मुनिनिर्मल(सुनिर्मल) गुणैर्निय (त्यं another Ms.) प्रशांतैः श्रुतशाल-
(लि)भिः ।
प्रयुज्यमानदेवादिसूरिभिः प्राविराजितः ॥८॥

विश्रुतस्य महीपीठे बृहद्गच्छस्य मंडनं ।
श्रीमान्विहारुकः पृष्टः(रुकप्रष्टः another Ms.) सूरिरुदग्रोव(त)ना
भिधः ॥ ९ ॥
तस्य शिष्योम्रदेवोभूदुपाध्यायः सतां मतः ।
यत्रैकां[त]गुणापूर्वे दोषो(र्णे दोषै)र्लेभे पदं नतु ॥१०॥
देवेंद्रगणिशू[णिश्चेमामु another Ms.]द्धृतवान्वृत्तिकां तद्विनेयः ।
गुरुसौ(सो)दर्यश्रीमन्मुनिश्चं(चं)द्राचार्यवचनेन ॥११॥
शोधयतु बृहदनुग्रहबुद्धिं मयि [सं]विधाय विज्ञजनः ।
तत्र च मिथ्यादुःकृतः(त)मसुकृतमसंगतं यदिह ॥८॥
अणाहिलपाटकनगरे दोहट्टिश्रेष्ठिसद्मवसतौ च ।
संतिष्ठता कृतेयं नवहरत्सरे (नवकरहरवत्सरे another Ms.) चैव ॥९॥
पट्टिकातोलिखच्चेमां सर्वदेवाभिधो गणिः ।
आत्मकर्मक्षयायाथ परोपकृतिहेतवे ॥१०॥
दोहट्टिश्रेष्ठिना चास्य लिखिता प्रथमा प्रतिः ।
जिनवाक्यानुरक्तेन [भक्तेन] गुणवज्जने ॥११॥

BBBB. No. 262. *Jayaśekhara's Upadeśachintâmaṇi with commentary.*

उपदेशचिंतामणिः सटीकः ।

ग्रंथस्यांते ।

अथ प्रशस्तिः ।

वंशे वीरविभोरभूदिति वहन्वीरत्वमत्यूर्जितं
मिथ्वात्वादिविपक्षवारणविधौ धर्मोद्यमे चोत्तमे ।
जातः पूर्वमिहार्यरक्षितगुरुश्चक्रेश्वरीदेवतां
साक्षात्कृत्य तपोभिरंचलगणं विस्तारयन् भूतले ॥१॥
मौलिं धुनोति स्म विलोक्य यस्य निःसंगतां विस्मितचित्तवृत्तिः ।
श्रीसिद्धराजः स्वसमाजमध्ये सोभूत्ततः श्रीजयसिंहसूरिः ॥२॥
तत्पट्टपंकेरुहराजहंसा(सः ?) सदा सदाचारकृतप्रशंसः ।
गुरुर्निरस्तान्यमतप्रघोषः श्रीधर्मघोषः स्वगणं पुपोष ॥३॥
येनाज्ञानतमोघ्नवाक्यकिरणैर्दूरागतश्रावक-
स्वांतांभोरुहतश्चतुर्भिरधिकाशीतिः सुबद्धा अपि ।
रोलंबा इव दूरिताः प्रथमका लोकेप्यहो संशयाः
श्रीमानेष महेंद्रसिंहसुगुरुर्भेजे ततो भानुवत् ॥४॥'

सिंहप्रभोगु(गु)रुरथ प्रथितस्ततोपि रेजे जगत्यजितसिंहगुरुर्गुणाब्धिः ।
पापद्विपक्षपणसिंहसमानशक्तिर्देवेंद्रसिंहगुरुरभ्युदयाय त[स्मात्] ॥५॥
भावारिनिष्कृषतपःकरवालशाली धर्मप्रभः सुगुरुराज इतो रराज ।
पीयूषबिंदुसदृशाक्षरवाग्विलासाः (सः?) श्रीसूरिसिंहतिलकश्च ततः प्रतीतः ॥ ६ ॥
तत्पट्टनंदनवनकल्पद्रुमसमश्रियः ।
जयंति सांप्रतं श्रीमन्महेंद्रप्रभसूरयः ॥७॥
यत्पाणिमाहुः कृतिनः श्रियश्च गिरि(र)श्च मैत्रीघटनैकतीर्थं ।
सपर्कतस्तस्य जनः प्रणंता श्रीमांश्च धीमांश्च किमन्यथा स्यात् ॥८॥
येषां कीर्तिभरे भरेण धवलीकर्तुं जगत्प्रोद्यते
भो(नो)भूत्कोपि स यो ददते(ददाति) तमसस्त्रस्त[स्य] शश्वत्पदं ।
भग्नाशस्य च तस्य निर्जितचरैर्दूर्वादिवृंदैः स्फुरत्-
कारुण्यैरिव वासभूमिरचला स्वीये मुखे दीयते ॥९॥
तेषां शिष्याः श्रीमन्मुनिशेखरसूरयो नयोपेताः ।
श्रीजयशेखरसूरिः श्रीसूरिर्मेरुतुंगश्च ॥१०॥
एतेषु शिष्यः खलु मध्यमोहं मोहं कुबोधप्रभवं विहाय ।
गुरूपदेशादुपदेशचिंतामणिश्रुतं सूत्रतया व्यगुंफं ॥ ११ ॥
व्य(वि)धाय तस्य स्वयमव्यलीकां टीकां कथासारविचारहृद्यां ।
दंडायुधांभोनिधिचंद्र १४३६ संख्ये वर्षे पुरे श्रीनृसमुद्रनाम्नि ॥ १२ ॥
अनुजश्चाण्णतीर्थ्यश्चास्माकं टीकामिमां मुदा ।
लिलेख प्रथमादर्शे मानतुंगगणिर्गुणी ॥ १३ ॥
प्रत्यक्षरं निरूप्यास्यां ग्रंथमानं विनिश्चितं ।
सहस्रा द्वादश श्लोकाश्चतुःषष्ट्याधिका इति ॥१४॥

* * *

इति श्रीजयशेखरसूरिविरचिता स्वोपज्ञउ(ज्ञो)पदेशचिंतामणिटीका । संवत् १७३९ वर्षे वैशाष(ख)शुदिचौथिश्रुक्रवारे श्रीमदंचलगच्छे सकलभट्टारकशिरोरत्नभट्टारकश्रीअमरसागरसूरिविजयराज्ये तदाज्ञाकारीयपालीताणीयशाषा(खा)यां पंश्री९श्रीमुनिशीलगणिताच्छिष्यपं०श्री९श्रीगुणशीलगणितच्छिष्यवाचकशिरोरत्नवा०श्री९विनयशीलजीताच्छिष्यक्रमकिंकरमुनिजयशीलेन लिपीकृतं स्वस्य पठनार्थं श्रीमत्पट्टनमध्ये।

BBBB 1. No. 264. *Rishimaṇḍalaprakaraṇa with Padmamandiragaṇi's commentary.*

ऋषिमंडलप्रकरणं सवृत्तिकं । प० १२८ सांकपृष्ठे ।

क्रमाद्दशचतुःपूर्ववेदी सूरिगुणाग्रणीः ।
भद्रबाहुर्यशोभैद्रर्न्यस्तः सूरिपदक्रमे ॥१॥

दशवैकालिकस्याचारांगसूत्रकृतांगयोः ।
उत्तराध्ययनसूर्यप्रज्ञप्त्योः कल्पकस्य च ॥६॥
व्यवहारर्षिभाषामा(षिता, another Ms.)वश्यकानामिमाः क्रमा- ।
दशाश्रुताख्यस्कंधस्य निर्युक्ति(क्ती)र्दश सोतनोत् ॥७॥ युग्मं ।
तथान्यां भगवांश्चक्रे संहितां भद्रबाहवीं ।

No. 257. *Avaśyakaniryukti.*

आवश्यकनिर्युक्तिः । प० १० सांकपृष्ठे प० ११ निरंकपृष्ठे च ।
ते वंदिऊण सिरसा अत्थपुहत्तस्स तेहिं कहियस्स ।
सुअनाणस्स भगवओ निज्जुत्तिं किंत्तइस्सामि ॥४॥
आवस्सगस्स दसकालियस्स तह उत्तरज्झमायारे ।
सूअगडे निज्जुत्तिं वुच्छामि तहा दसाणं च ॥५॥
कप्पस्स य निज्जुत्तिं ववहारस्सेव परमनिउणस्स ।
सूरिअपन्नत्तिए वुच्छं इसिभासियाणं च ॥६॥
एएसिं निज्जुत्तिं वुच्छामि अहं जिणोवएसेणं ।
आहरणहेउकारणपयनिवहमिणं समासेणं ॥७॥

In No. 256 दसाणं is explained as दशाश्रुतस्कंधे ख्यातानाम्.

CCCC. No. 264. *Rishimaṇḍalaprakaraṇa with Padmamandiragaṇi's commentary.*

ऋषिमंडलप्रकरणं सवृत्तिकं । वृत्तेरंते ।
इति श्रीऋषिमंडलप्रकरणसूत्रं तत्समाप्तौ [च समाप्ता] कथार्णवांकानाम्मी तवृ(द्वृ)त्तिः ।
एनां जेसलमेरुनाम्नि नगरे प्रारब्धवानश्विनी-
कोट्टे वाग्गुरुपद्ममंदिरगणिः पूर्णीचकारानु च ।
*वर्षे वह्निशराशुगोडुपमिते वैशाष(ख)शुक्लत्रयो-
दश्यां शुक्रकरोद्भवे शुभतमे योगेल्पधीशेष(ख)रः ॥ १ ॥
आपिच । अर्हन्मतातिविपुलांबरमंडलेस्मिं-
श्चांद्रं कुलं किल कलां कलयांबभूव ।
सूर्यावली प्रतिदिनं ननु यत्र चित्र-
मुद्द्योतमासददनुत्तरसंपदाप्त्या ॥ २ ॥
तत्र स्वच्छक्रियात्युच्छो(च्चो?)गच्छः खरतराह्वयः ।
संप्राप योतिविस्तारं शाखाभिर्वटशाखिवत् ॥ ३ ॥

The Ms. reads वर्षे– – शरासुगोडुपमिते and No. 140 of 1873-74 वर्षे वाह्नि-सरासुगोडुपमिते.

तत्रासीदादिमो भ्राता(देवा the other Ms.)चार्य आचार्यवर्यधीः।
नेमिचंद्रोद्द्योतनश्रीवर्द्धमानाश्च सूरयः ॥ ४ ॥
खरतर[बिरुदं the other Ms.] विशदं श्रीदुर्लभराजसदसि यो लेभे।
स श्रीजिनेश्वरगुरुर्जीयाज्जिनचंद्रगुरवश्च ॥ ५ ॥
स्वप्ने शासनदेवतोक्तवचसाविष्कृत्य यं (य the other Ms.)स्तंभन-
श्रीपार्श्वप्रतिमां तदंगपयसा दुष्टं स्वकुष्टं क्षणा-।
दूरीकृत्य नवांगवृत्तिममलामाविश्चकारोच्चकै-
स्तत्पट्टेभयदेवसूरिसुगुरुर्जातोयमुद्यद्यशाः ॥ ६ ॥
प्राप्तोपसंपद्विभवस्तदंते द्विधापि सूरिर्जिनवल्लभोभूत्।
जयंध(ग्रंथ) यो ग्रंथमनर्थसार्थप्रमाथिनं तीव्रक्रियाकठोरः ॥ ७ ॥
पट्टे तदीयेभवदद्भुतश्रीर्युगप्रधानो जिनदत्तसूरि [:]।
यो योगिनीचक्रमुखादिदेवशर्षिं निज्ञा(जिनाthe other Ms.)ज्ञां मुकुटी-
चकार ॥ ८ ॥
नूरत्नमौलिर्जिनचंद्रसूरिस्ततोप्यभूच्छ्रीजिनपत्तिसूरिः।
पट्टे त(षट्त्रिंश the other Ms.)दुद्यद्वरवादजेता चकार गच्छेत्र विधौन् बहून् यः ॥ ९ ॥
जिनेश्वराख्यः प्रबभूव सूरिर्जिनप्रबोधाभिधसूरयश्च।
जज्ञे पुनः श्रीजिनचंद्रसूरिः श्रीवीरतीर्थप्रकटप्रभावः ॥ १० ॥
जिनादिरूपः कुशलो मुनींद्रो नृलक्षणोवा(र्वा?)ग्जिनपद्मसूरिः।
लब्धिप्रधानो जिनलब्धिसूरिः पुराणमी(पुनर्गणे the other Ms.) शो
जिनचंद्रसूरिः ॥ ११ ॥
जिनोदयाख्योनु च सूरिरासीद्विद्वन्मणिः श्रीजिनराजसूरिः।
समग्रसिद्धांतविचारवार्द्धिकुंभोद्भवः श्रीजिनभद्रसूरिः ॥ १२ ॥
तत्पट्टे(ट्ट)*पूर्वाचलहेलिकेलीदीक्षागुरुर्मे जिनचंद्रसूरिः।
व्याख्यारसप्रीणितभूरिभूपश्चातुर्यवर्यामृतबिंदुकूपः ॥ १३ ॥
जिनादिरत्रास्ति समुद्रसूरिर्गुरुर्गणेस्मिन्नथ विद्यमानः।
यत्कीर्तिकांता ककुभां मुखानि चुंबंत्यपि प्राप सतीप्रसिद्धिं ॥ १४ ॥
श्रीकीर्तिरत्नाभिधसूरयोस्मिन् गणे बभूवुर्भुवनप्रसिद्धाः।
वाक्सिद्धिसल्लब्धिविशुद्धबुद्ध्यादयो गुणा कस्य मुदे न वैषां ॥ १५ ॥
ज्ञातृत्वार्जवभावदुस्तपतपश्चारित्रतीव्रक्रिया-
काठिन्यप्रमुखाश्चमत्कृतिकृतो लोकंपृणा यद्गुणाः।
केषां नाद्भुतदायिनोत्र गुणरत्नाचार्यवर्या अमी

* The portion that follows is wanting in this Ms. as the last leaf has been lost. It has been taken from No. 140 of 1873-74.

जीयासुर्गुरुकीर्तिरत्नपदवीशृंगारहीरश्रियः ॥ १६ ॥
तेषां प्रसादादणुधीः प्रयत्नमकार्षमस्मिन् गहने कवीनां ।
जंघालतां किं न जगद्विलंघने धत्ते कुरंगोपि मृगांकसंगतः ॥ १७ ॥
संसूत्रितं यदुत्सूत्रमत्र मुग्धधिया मया ।
तच्छुद्धबुद्धिभिः शुद्धं कार्यं मयि कृपापरैः ॥ १८ ॥
प्रत्यक्षरगणनया ज्ञेया नि(वि)श्वैरनुष्टुभां ।
द्वासप्तति[:] शतान्यस्यामेकषष्ट्यधिकान्यपि ॥ १९ ॥
वाग्गुरुंधवलचंद्रज्ञानमंदिरसंज्ञकौ ।
शोधयामासतुर्यत्नादिमां लाक्षणिकोत्तमै(मौ) ॥ २० ॥
यावद्भूवलयं समुद्रनिलयं यावत्सुवर्णाचलो
यावच्चंद्ररवी नवीनमहसौ यावज्जिनाज्ञा शुभा ।
तावच्छास्त्रमिदं विदंत(?)हृदयैः पापठ्यमानं बुधैः
भव्यानामनुवासरं हृदि चिदुत्पादाय संजायतां ॥ २१ ॥

इति श्रीऋषिमंडलवृत्तिः पूर्णा जाता । .....
सं १८४९ वर्षे शाके १७१० प्रवर्तमाने ज्येष्ठशुक्लतृतीयाशनौ मध्याह्नसमये पूर्णीकृता ।
हरिदुर्गमध्ये लिपिकृतं ।

DDDD. No. 266. *Kalpasûtra with the commentary of Samayasundaropâdhyâya.*

कल्पसूत्रटीका । प० १९३ सांकपृष्ठे ।

सिद्धसेनेन विक्रमादित्य[नामा, another Ms.]राजा प्रतिबोधितः.....
श्रीसू[रि]सांनिध्याद्विक्रमादित्ये(त्यो) राजा संवत्सरं प्रवर्तयामास पूर्वं तु श्रीवीरसंवच्छर (वीरवत्सर another Ms.)मासीत् ।

EEEE. No. 266. *Kalpasûtra with the commentary of Samayasundaropâdhyâya.*

कल्पसूत्रटीका । टीकांते ।

पज्जोसवणाकप्पो सम्मत्तोत्ति पर्युषणाकल्पः समाप्त इति पर्युषणा वर्षासु एकक्षेत्रनिवासस्तस्य संबंधी कल्पः सामाचारी साधून्प्रतीत्य विधिप्रतिषेधरू(रू)पा कर्तव्येति तदभिधेययोगाद्ध्ययनमपि पर्युषणाकल्पः रत्नपरीक्षागजशिक्षादिवत् स च श्रीदशाश्रुतस्कंधादिसिद्धांतस्य अध्ययनमष्टमं समाप्तः समर्थितमिति ।

व्याख्यानं कल्पसूत्रस्य नवमं सुगमं स्फ(स्फु)टं ।
शिष्यार्थं पाठकाश्चक्रुः समयादिमसुंदराः ॥ १ ॥
श्रीशासनाधीश्वरवर्द्धमानः गुणैरनंतैरतिवर्द्धमानः ।
यदीयतीर्थं खखखाब्जनेत्र २१००० वर्षाणि यावद्विजयि प्रसिद्धं ॥ १ ॥

तदीयसिक्षो(शिष्यो) गणभृच्च पंचमः सुधर्मनाम(मा)स्य परंपरायां ।
बभूव शाखा किल वज्रनाम्नी चांद्रं कुलं चांद्रकलेव निर्मलं ॥ २ ॥

तद्गच्छे न्वभिधानतः खरतरे * * *
पुनरपि यस्मिन्गच्छे बभूव जिनकुशलनामसूरिवरो ।
यस्यस्तूप(?)निवेशा सुयशःपुंजा इवाभांति ॥ ५ ॥
तत्पट्टानुक्रमतः श्रीमज्जिनचंद्रसूरिनामानः ।
जाता युगप्रधाना डिल्लीपतिपातशाहिकृताः ॥ ६ ॥
अकब्ब(ब)रंरंजनपूर्वं द्वादशसुवेषु(?) सर्वदेशेषु ।
स्फुटतरममारि(?) पटहः प्रवादितो यैश्च सूरिवरैः ॥ ७ ॥
यद्वारे किल कर्मचंद्रसचिवः श्राद्धोभवद्दीक्षितमान्
येन श्रीगुरुराजन(ना?)दिमहसि द्रव्यव्ययो निर्ममे ।
कोटेः पादयुजः शराग्निः(ग्नि) ३५ समये दुर्भिक्षवेलाकुले
सत्राकारविधानतो बहुजना संजीविता येन च ॥८॥
यद्वारे पुनरत्र सोमजिसिवा(शिवौ?) श्राद्धौ जगद्विश्रुतौ
याभ्यां राणपुरस्य १ रैवतगिरेः २ श्रीअर्बुदस्य स्फुटं ३ ।
गौडी ४ श्रीविमलाच[ल]स्य ५ च महान्संघोनघ[:] कारिता(तौ)
गच्छलंभ(च्छालंब)निका कृता प्रतिपुरं रूक्माद्रिमेकं पुनः ॥९॥
तेषां श्रीजिनचंद्राणां शिष्य[:] प्रथमतोभवत् ।
गणि[:] सकलचंद्राख्यो रीहडान्वयभूषणं ॥१०॥
तत्सि(च्छि)ष्यसमयसुंदरसदुपाध्यायैर्विनिर्मिताध्यायैः ।
कल्पलतानामायां(यं) ग्रंथश्चक्रे प्रयत्नेन ॥ ११ ॥

* * * * *

लूणकर्णसराग्रामे प्रारब्धा कर्तुमादरात् ।
वर्षमध्ये कृता पूर्णा मया चैषारिणीपुरे ॥१७॥
राज्ये श्रीज(जि)नराजसूरिसुगुरोर्बुद्ध्या जितः स्वर्गुरो-
र्यद्वाग्यं भुवि लोकविस्मयकरं सौभाग्यमत्यद्भुतं ।
कीर्त्तिस्तु प्रसरीसरीति जगति प्रौढप्रतापोदया-
दाज्ञात्युग्रतमा कृपा तनुभृतां दारिद्र्यदुःखापहा ॥१८॥

* * * * *

राजंते जिनराजसूरिगुरवस्ते सांप्रतं भूतले ॥१९॥
जू(यु)वराजे जिनसागरसूरिवरे विजयिनि प्रकृतिसौम्ये ।
यत्सौभाग्ययशोभिर्धवलीकृतभूतलं भाति ॥२०॥

तद्गुरुणा प्रसादेन मया कल्पलता कृता ।
कल्पसूत्रमिदं यावत्तावन्नंदतु सापि हि ॥२१॥
इति श्रीसमयसुंदरोपाध्यायविरचिता कल्पलतानाम्नी कल्पसूत्रटीका समाप्ता ।

FFFF. No. 271. *Vinayarâma's Commentary on the Kirâtârjuniya.*

किरातार्जुनीयटीका ।

अंते ।

वर्षेभ्रिवृथ्वीरसभूमिसंख्या(ख्ये)श्रीविक्रमाद्भूमिविभो[:]रयाते ।
मासे मनोहारिणि फाल्गुनाख्ये वारे गुरौ पंचमिकादिने च ॥१॥
क्षमादयादानतपोवि(नि)धानं प्राप्तप्रतिष्ठो गुणगौरवार्हः ।
तुर्यस्य काव्यस्य विधाय टीकां लिलेख रामो विनयादिशब्दः ॥ २ ॥
श्रीरत्नाकरसूरीणां पादपद्मप्रभावतः ।
व्याख्या कृतास्ति संशोध्या विबुधरैल्पसूरिभिः ॥ ३ ॥

संवत् १७४७ वर्षे फाल्गुण(न)मासे कृष्णपक्षे अष्टम्यां तिथौ कुजवासरे लिखितं । इति श्रीकिरातकाव्यं संपूर्णं । व्यासश्रीश्रीधरपुत्ररत्नव्यासश्रीजयरामनीकस्य पठनार्थं । चेला-गुणराजजीलिखितं श्रीकर्णपुरवरे ।

GGGG. No. 272. *Brahmamuni's Jambûdvîpaprajñaptiṭîkâ.*

जम्बूद्वीपप्रज्ञप्तिटीका ।

अंते ।

इति सकलसुविहितसैद्धांतिकशिरोरत्नालंकारश्रीपार्श्वचंद्रसूरितच्छिष्यश्रीविनयदेवसूरिसती-र्थ्यचरणांभोजमधुकरश्रीब्रह्ममुनिविरचितायां श्रीजंबूद्वीपप्रज्ञप्तिटीकायां ज्योतिश्चक्रादिविचारा-धिकारः समाप्तः ।

श्रीसाधुरत्नाभिधपंडितेशाः
स्वकीर्तिविद्योतितसर्वदेशाः ।
यथास्थितं जैनमतं जनानां
प्रकाशयंतः सुखदा अभूवन् ॥१॥
तदीयपादांबुजयुग्मभृङ्गा-
स्त्यक्ताखिलारंभपरिग्रहौघाः ।
जयंति संवेगसुधैकपानाः
श्रीपार्श्वचंद्राभिधसूरयोमी ॥२॥

सूत्रं समालोक्य गुरोरयं यैः प्रकाशितः श्रीजगदीशपंथाः ।
यमाश्रिता भव्यजना लभंते सुखं सुखानां परमं नितांतं ॥३॥
ये वादिनः कर्कशतर्कविद्यास्तब्धाः स्वभिन्नानबुधान्विदंति ।
विलोक्य विद्यादिगुणैः समेतानेतान्नतास्तेपि भवंति सद्यः ॥४॥
एतेर्हताञ्चैत्यमुदाहरंति मुक्त्यर्थिभिर्मुक्तिनिमित्तमर्च्यं ।
पुष्पादिपूजां चरितादिवादैः प्रकाशयंतो न निषेधयंति ॥५॥
गीतार्था जिनशासने बहुतराः संत्येव साहित्ययुक्-
षट्तर्कीपरितर्ककर्कशतमप्रज्ञाबलोल्लासिनः ।
किंत्वेतैः सदृशो न कोपि भुवने दृष्टः श्रुतो वा कृती
विज्ञाश्चेदनृतं वदाम्यहमिदं तत्कथ्यतामेष मे ॥६॥
तेषां गुरूणां गुणसागराणां श्रीपार्श्वचंद्राभिधसूरिराज्ञां ।
शिष्योस्त्ययं ब्रह्ममुनीविपश्चिच्चुलुक्यवंशोद्भवराजपुत्रः ॥७॥
इतश्च भुवि भूषणं जनपदो जयी गूर्जरा-
भिधोनहिल्लपुरपत्तनं जयति नाम्नापरं (?)।
स्फुरद्बृजिनालयैर्जिनवरेंद्रपूजाभिल-
न्महाजनमनोघनप्रमदपूरसंपूरकैः ॥८॥
टीकेयं तत्र कृता ब्रह्मविदा ब्रह्मसाधुना तेन ।
श्रीमज्जंबूद्वीपप्रज्ञप्तेर्मतिमतामुचिता ॥९॥
यद्यपि जंबूद्वीपप्रज्ञप्तिर्बहुतया गभीरार्था ।
व्याकर्तुमिह न शक्या विबुधैरपि किं पुनर्मनुजैः ॥१०॥
अर्थस्तथापि कथितो मया यदस्याः सुतुच्छमतिनापि ।
निजगुरुकरुणापूर्वाचार्यग्रंथप्रभावोयं ॥११॥
श्रीमद्विजयदेवाख्याः सूरयो विजितारयः ।
ये क्षमाराजिता नित्यमक्षमाराजिता भुवि ॥१२॥
धर्मस्नेहधरैरेषा शोधिता यत्नतोति तैः ।
न्यायलक्षणसाहित्यप्रभृतिग्रंथपारगैः ॥१३॥
जिनवरवचनविरुद्धं किमपि मया यत्प्रमादतो भणितं ।
संशोध्यं विबुधवरैर्मिथ्या मे भवतु तद्दुरितं ॥१४॥ त्रिभिर्विशेषकं ।
खेदः कोपि न तत्र नः खलजनो निंदत्वमूं यत्कृतिं
हर्षो नाप्यथवा स्वभावसुजनः स्तौति प्रकृत्यैव यत् ।
किंत्वेतद्गुणभूषणे दृढतरे जानद्वय एव स्तुति-
र्निंदा वा भवतीह या मतिमतामेषैव मोदादिकृत् ॥ १५ ॥

इति श्रीविजयदेवसूरिचरणप्रसादरचिता श्रीजंबूद्वीपप्रज्ञप्तिटीका समाप्ता ।.....

तपगणगगननभोमणिसूरिश्रीविजयसेनशिष्याणां ।
वाचकनयविजयानां शिशुना बुधकीर्त्तिविजयेन ॥ १ ॥
मुनिरसरसचंद्रमिते वर्षे चित्कोशवृद्धये स्वस्य ।
मुक्ता श्रीमदकब्बरपुरे सदासौ प्रतिर्जीयात् ॥ २ ॥

HHHH. No. 273. *Kshamâkalyâṇa's Tarkaphakkikâ.*

तर्कफाक्किकाः ।

अंते ।

श्रीजिनभक्तिसूरींद्रपट्टभासनभास्वराः ।
श्रीजिनलाभसूरींद्रा आसंश्चंद्रकुलेश्वराः ॥१॥
प्रीतिसागरनामानः श्रीमंतस्तत्सतीर्थ्यकाः ।
वाचकामृतधर्माख्यास्तेषां शिष्या विचक्षणाः ॥२॥
तद्विनेयेन क्षमादिकल्याणेन मनीषिणा ।
तर्कसंग्रहसूत्रस्य सवृत्तेः फाक्किका इमाः ॥३॥
यथा श्रुता गुरुमुखात्तथा संकलिताः स्वयं ।
वसुनेत्रसिद्धिचंद्रप्रमिते हायने मुदा ॥४॥ चतुर्भिः कलापकम् ।
सूरतविंदरे इति शेष इति श्रीतर्कसंग्रहफाक्किका संपूर्णा ।

JJJJ. No. 274. *Guṇavinaya's Damayantîchampûṭîkâ.*

दमयंतीचंपूटीका ।

अंते ।

इति वाचनाचार्यश्रीप्रमोदमाणिक्यगणिशिष्यश्रीज[य]सोमगणितच्छिष्यश्रीगुणाविनयविरचितायां श्रीविक्रमभट्टविरचितश्रीदमयंतीचंपूकथाविवृतौ सप्तम उल्लासः समाप्तः ।

श्रीमत्खरतरगच्छे स्वच्छेभूवन्नवांगवृत्तिकराः ।
श्रीमदभयदेवाख्याः पुरा वराचार्यगुणमुखा:(ख्याः) ॥१॥
तेषां क्रमेण पट्टे विख्याता लक्षसंख्यगुणदक्षाः ।
रेजुर्जलधिगभीराः श्रीजिनमाणिक्यसूरिवराः ॥२॥
तत्पट्टे विशदप्रभाकरकरस्फूर्जत्प्रतापोद्धुराः
वादप्राप्तजया धरापतिसदःपीठे सदा सुंदरा[ः] ।
तत्तत्कृत्यविधानतो भुवि चमत्कारं विशां चक्रिरे
चेतस्सु प्रथमागमाधिगमतो लब्धप्रतिष्ठाश्च ये ॥३॥

युगप्रधानेषु महाप्रभावश्रियो निधानेषु विशुद्धबुद्धिषु ।
विराजमानेषु जनेषु तेषु स्तुत्येषु सच्छ्रीजिनचंद्रसूरिषु ॥४॥
श्रीक्षेमशाखासु सुधातिश(शा)यिरसप्रवेशासमवाग्विलासाः ।
श्रीखेमराजा भुवि पारिजातफलोपमाः पाठकलक्ष्मिलक्ष्माः ॥५॥
जयंतु तेषां च वरा विनेयाः सद्भागधेया[:] स्वगुणैरमेयाः ।
चत्वार आसन्विमलप्रबोधा विधेर्नु वेदा इव मूर्तिमंतः ॥६॥
शिवसुंदरनामानो विलसत्सं[वे]गकनकतिलकाह्वाः ।
पाठकपदप्रधाना उभयेपि प्राप्तकीर्तिभराः ॥७॥
सदयोदयास्तृतीयाः सदयास्सततं दयातिलकगणयः ।
वाग्गुरवो वाग्गुरवस्तुर्याशि(शि)ष्याश्च विजयंते ॥ ८ ॥
श्रीप्र(श्रीमत्प्र)मोदमाणिक्यनामधेयोयःसु(धेयास्सु another Ms.)साधु-
वृत्त[ध]राः ।
भाग्याभ्यधिकास्तेषां विद्यंतेमी पुनश्शिष्याः ॥ ९ ॥
चत्वारोप्यंबुधिवद्गंभीराक्षोभ्यतादिगुणयुक्ताः ।
न च जडसंगतिभाजो भवंति येस्मिन्महीपीठे ॥ १० ॥
वाग्गुरुगुणरंगाख्या रंगद्गुरुभक्तिभाग्दयारंगाः ।
श्रीजयसोमास्सोमाननास्तथा क्षेमसोमाह्वाः ॥ ११ ॥
तत्र श्रीजयसोमकल्पतरवोमेयप्रमा(का)शे मुखी(?)
शाखालीदवरागमांबरतलास्सत्पात्रशोभावहाः ।
कीर्तिप्राप्तफलाः कलोत्तरकलास्संतीह मत्पाठकाः
श्रीमंतो गुरवो रवोदितरसै[:] संप्रीणितप्राणिनः ॥ १२ ॥
तेषां शिष्यो मुख्यो गुणाविनयाख्यो विमृश्य शास्त्राणि ।
सत्पाणिनीयहैमानेकार्थोणादिमुख्यानि ॥ १३ ॥
श्रीचंडपालरचितं दुर्गपदप्रकटनैकसितकक्षं ।
श्रीचंपूटिप्पनकं पुनस्सहार्दं समुपजीव्य ॥ १४ ॥
श्रीविक्रमंशो(मवंशो)द्भवसद्विक्रमराजसिंहनृपतिराज्ये ।
सत्कर्मकर्मचंद्राभिधधीसखधुर्यसंधार्यः ॥ १५ ॥
श्रीमद्विक्रमभूपतेः स्वरसरस्वत्तर्कशक्रप्रमा-
ख्यातायां शरदि प्रमोदविसरभ्राजिष्णुपौराकुले ।
श्रीसिरुन्हकनाम्नि भद्रनगरेर्हच्चैत्यशोभाधरे
चक्रे श्रीदमयंत्युदारचरिते टीकां महार्थां सुधीः ॥ १६ ॥
सरस्वत्या प्रणीतायां श्रीचंप्वां कृतसंविदि ।
यन्मया वितथं प्रोक्तं मतिमांद्येन वान्यथा ॥ १७ ॥

सव्याख्यां कुर्व्वता संतोनुग्रहं मयि धी[धि]नाः ।
तकृत्वोत्सारयंत्वार्या मावजानंतु किंचन ॥ १८ ॥ युग्मं । १९ । २० ।
श्रीफलवर्द्धिकपार्श्वश्रीमज्जिनदत्तकुशलसूरीणां ।
सौम्यदृशा पठतामिह शुभार्थदा वृत्तिरेषा स्तात् ॥ २१ ॥

न येषु देशेषु विशिष्टधर्म्मवार्त्तापि कर्णातिथितां बभाज ।
येन प्रजापालनतत्परेण प्रवर्त्तितस्तेषु विशुद्धधर्म्मः ॥ १ ॥
अनार्या अपि देशाः सद्धर्म्मभावनयानया ।
येनार्या विहिता यद्वात्तिलाः पुष्पैः सुवासिताः ॥ २ ॥
दोषापहारात्तमसो विनाशनात्प्रकाशनान्न्यायपथस्य भूतले ।
श्रीसूर्यसेवाकरणानुषंगिणा श्रीसाहिना येन कृतं महाद्भुतं ॥३॥
गवादिप्राणिसंघातघातस्य प्रतिषेधनाद् ।
येन कांता दया कांता सौभाग्यैकमठीकृता ॥ ४ ॥
स्वप्नेपि सज्जनाः सर्वे यस्येमामाशिषं ददुः ।
त्वं पालय चिराद्राज्यं यत्क(यः कृ?)पावारिवारिधिः ॥ ९ ॥
यस्य राज्ञः प्रसत्त्यामी धर्म्मं कुर्व्वंति साधवः ।
तस्माद्यद्विजयो नित्यं यतो धर्मस्ततो जयः ॥ ६ ॥
यस्य नाम्नि विराजंते विष्णुब्रह्ममहेश्वराः ।
तेनाकबरेत्याख्या ख्याता सर्वत्र भूतले ॥ ७ ॥
विबुधश्रेणिविराजितसविधे वरनंदनश्रिया मुदिते ।
कृतगोरक्षे दक्षे शुभनयन इव त्रिदिवनाथे ॥ ८ ॥
अकबरनृपाधिनृपतौ विजयिनि शरभुवनसम्मिते वर्षे ।
श्रीमल्लाभपुरीयं प्राकाशि परा पुरस्सुधियां ॥ ९ ॥
श्रीचंपूवृत्तिः समाप्ता । सरस्वतीतिनाम्नी वृत्तिरियं ।

These verses do not occur in the present Ms. but in two others.

KKKK. No. 275. *Mânavijayagaṇi's Dharmasamgraha with commentary.*

धर्मसंग्रहः सटीकः । अंते ।

अथ प्रशस्तिः ।

श्रीमद्वीरजिनेंद्रपट्टपदवीसीमंतिनीमंडनं
प्रख्यावानजनिष्ट हीरविजयः सूरिः सतामग्रणीः ।
येनाकब्बरराट् प्रबोध्य विहितो दुःकर्मकर्तापिहो
धर्मोक्त्या त्रिदिवस्य केशिगणिनेवार्हः प्रदेशीनृपः ॥ १ ॥

अमलमलमकार्षीत्सद्गुरोस्तस्य पट्टं
विजयेविजयसेनः सूरिरुग्रप्रतापः ।
महति सदसि साहेर्वादिनो निःप्रतापान्
रविरिव निजगोभिस्तारकान् यश्चकार ॥ २ ॥
विजयतिलकसूरिर्भूरिसूरिप्रकृष्टो
दिनमणिरुदयाद्रौ तस्य पट्टे बभूव ।
कुमतितिमिरमुग्रं प्रास्य शुद्धोपदेश-
प्रसृमराकिरणैर्योबूबुधद्भव्यपद्मान् ॥ ३ ॥
तदीये पट्टेभूद्विजयिविजयानंदसुगुरु-
र्यशस्वी तेजस्वी मधुरवचनः सौम्यवदनः ।
कषायैर्निर्मुक्तः प्रशमगुणयुक्तः सुविहित-
स्तपागच्छाधीशः सकलवसुधाधीशमहितः ॥ ४ ॥
जयति विजयराजः सूरिरेतस्य पट्टे
सकलगुणगरिष्ठः शिष्टलोकैः प्रशस्यः ।
प्रथितपृथुजयश्रीरुग्रपुण्यप्रभावः
कलितसकलशास्त्रः प्रास्तमिथ्यात्वजालः ॥ ५ ॥
तदनु पट्टपतिर्विहितोधुना विजयराजतपागणभूभुजा ।
विजयमान इति प्रथिताह्वयो विजयतेऽतुलभाग्यनिधिः सुधीः ॥ ६ ॥
इतश्च विजयानंदसूरीणां (Om. सूरीणां ?) विनेया विनयान्विताः ।
श्रीशांतिविजयाह्वानाः शोभंते पंडितोत्तमाः ॥ ७ ॥
आजन्मादपि शौचसत्यमृदुताक्षांत्य(त्या)र्जवाद्या गुणा
भूयांसो गुरुभक्तता च विपुला येषु प्रकृष्टा भृशं ।
प्रोत्साहाय गुणार्थिनां स्वगुरुभिर्व्यक्तीकृता भूतले
सर्वत्राखिलगच्छकार्यविनियोगेन प्रसन्नात्मभिः ॥ ८ ॥
तेषां विनेय उदितादरतो विवव्रे ग्रंथं च मानविजयाभिधवाचकोमुं ।
क्षुण्णं यदत्र मतिमंदतया भवेत्तन्मेधाविभिर्मयि कृपां प्रणिधाय शोध्यं ॥ ९ ॥
सत्तर्ककर्कशधियाखिलदर्शनेषु मूर्धन्यतामधिगतास्तपगच्छधुर्याः ।
काश्यां विजित्य परयूथिकपर्षदोज्या विस्तारितप्रवरजैनमतप्रभावाः ॥ १० ॥
तर्कप्रमाणनयमुख्यविवेचनेन प्रोद्बोधितादिममुनिश्रुतकेवलित्वाः ।
चक्रुर्यशोविजयवाचकराजिमुख्या ग्रंथेत्र मय्युपकृतिं परिशोधनाद्यैः ॥ ११ ॥
बाल इव मंदगतिरपि सामाचारीविचारदुर्गम[ये ?] ।
अत्राभूवं गतिमांस्तेषां हस्तावलंबेन ॥ १२ ॥
वर्षे दिग्गजगुणमुनिचंद्र १७३८ प्रमिते च माधवे मासे ।

शुद्धतृतीयादिवसे यत्नः सफलोयमजनिष्ट ॥ १३ ॥
अहम्मदावादपुरे समग्रदेशस्फुरद्गुर्जरदेशमंडने (?) ।
श्रीवंशजन्मा मनिआभिधानो वणिग्वरोभूच्छुभकर्मकर्ता ॥ १४ ॥
नित्यं गेहे दानशाला विशाला प्रौढोन्नत्या तीर्थराजादियात्राः ।
सप्तक्षेत्र्यां यस्य वित्तव्ययश्च ख्यातुं प्रायो ह्यस्मदाद्यैरशक्यः ॥ १५ ॥
साधुश्रीशांतिदास[:] प्रचुरगुणनिधिस्तत्सुतोभूद्दुदारो
धात्र्यां विख्यातनामा जगदुसमधिकानेकसत्कृत्य (?) ।
रंकानामन्नवस्त्रौषधसुवितरणाद्येन दुःकालनाम
विध्वस्तं शस्तभूत्या बहुविधिमहिता ज्ञातिसाधर्मिकाश्च ॥ १६ ॥
पुत्र-यस्तसमस्तगेहकरणीयस्य स्फुटं वार्द्धके
सिद्धांतश्रवणादिधर्मकरणे बद्धस्पृहस्यानिशं ।
सद्धर्मद्वयसंविधानरचनाशुश्रूषणोत्कंठित-
स्तस्य प्रार्थनयास्य गुंफनविधौ जातः प्रयत्नो मम ॥ १७ ॥
ज्ञानाराधनमतिना विनयादिगुणान्वितेन वृत्तिरियं ॥
प्रथमादर्शे लिखिता गणिना कांत्यादिविजयेन ॥ १८ ॥ १९ । २० । २१ ।

इति प्रशस्तिः ।

KKKK. No. 278. *Dharmasâgara's Pravachanaparîkshâ.*

प्रवचनपरीक्षा । १ पत्रस्य निरंकपृष्ठमारभ्य ३ पत्रस्य निरंकपृष्ठं यावत् ।

दिगंबरस्तावत् । श्रीनिर्वाणान्नवोत्तरषट्शतवर्षातिक्रमे शिवभूत्यपरनाम्नः सहस्रमल्लतः संजातः । यदागमः ।

छच्चा सयाइं नवुत्तराइं तइआ सिद्धिं गयस्स वीरस्स ।
तो बोडिआण दिट्ठी रहवीरपुरे समुप्पण्णा ॥ १॥

इत्यत्र दिगंबरस्तावदित्थं प्रष्टव्यः । भो दिगंबर त्वदुत्पत्तेः पूर्वं श्रीवीरजिनप्रवर्त्तितं तीर्थमासीन्न वा । आसीच्चेत्तर्हि बोटिकानुत्पत्तावनन्यगत्या श्वेतांबर एव तीर्थं संपन्नं । अथ नासीत्तर्हि व्युच्छिन्नं तीर्थं शिवभूतिना प्रादुष्कृतमिति श्रोतुमप्यकल्प्यं । न हि व्युच्छिन्नतीर्थं तीर्थकरमंतरेण केनापि प्रादुष्कर्तुं शक्यते । तीर्थकराधिक्यप्रसंगात् । इत्युभयथापि दिगंबरस्तीर्थबाह्यः संपन्नः । यत्तु दिगंबरात् श्वेतांबरोत्पत्तिरिति त्वदीयं वचः तच्च सुक्कं.....इत्यादि श्रीभद्रबाहुस्वामिप्रणीतनिर्युक्त्यागमबाधितत्वेन देवानांप्रियप्रलापकल्पमेवेति दिगंबरसुमदायो नाच्छिन्नं तीर्थमिति बोध्यं १ । एवं पौर्णमीयकोपि श्रीवीरात् १६२९ वर्षे विक्रमात् ११५९ वर्षे श्रीमुनिचंद्रसूरिगुरुभ्रातृमात्सर्याच्चतुर्दशीयपक्षनिर्गतार्चंद्रप्रभाचार्यात्प्रवृत्तो न तीर्थं । युक्तिस्तु प्रागुक्तेवात्राप्यवतारणीया चतुर्दशीयकान्निर्गतत्वं च तदीयैरप्युक्तं । यदुक्तं ।

दुर्वादिद्विरदांकुशः समयावित्रेणीशिरोमंडनं
श्रीचंद्रप्रभसूरिराट् स भगवान् प्राचीकशत्पूर्णिमां ।
तस्माज्जैनवचोमृतं भृशमपुः श्रीधर्मघोषादयः'
श्रीभद्रेश्वरसूरितस्त्वचकलत् शाखा द्वितीया प्रथां ॥ १ ॥

इति पौर्णमीयककृतसंस्कृतक्षेत्रसमासवृत्तिप्रशस्तौ । तथा श्रीअममतीर्थकृच्चरित्रप्रशस्त्यादावपि तदीयैरेव चंद्रप्रभाचार्योदेव पूर्णिमाप्रकटनं भणितमिति ।तथा ।

चंडगच्छाउ पुण्णिम पुण्णिमउ सट्ठ(ड्ढ?)पुण्णिमंचलया ।

दोहि वि आगमनामा कुच्चयरा खरयरो जाउ ॥१॥

तथा संघेन निवार्यमाणोपि चंद्रप्रभाचार्यः पूर्णिमापाक्षिकं प्रकाशितवान् । इत्यस्मद्वृद्धवचं (चः) । किं च यथा गुरुभ्रातृश्रीमुनिचंद्रसूरिमात्सर्यात् ११५९ वर्षे चतुर्दशीयकाच्चंद्रप्रभाचार्यात् पूर्णिमापक्षः समुत्पन्न इति प्रसिद्धिर्न तथा अमुकहेतुनाऽमुकाचार्यतोऽमुकसंवत्सरे पूर्णिमापक्षाच्चतुर्दशीपक्ष इति प्रसिद्धिः कर्णकोटरपथमवतीर्णा । अत एवाच्छिन्ने तीर्थे विद्यमाने तन्निर्गतः पूर्णिमापक्षस्तीर्थबाह्य एव २ । तथा खरतरोत्पत्तिरपि वि०सं० १२०४ वर्षे खांजिनपूजोत्थापकजिनदत्ताचार्यादेव जाता । तत्रापि स एव तावदित्थं प्रष्टव्यो भोः खरतरेत्यादिप्रश्नोत्तरवचोगर्भा युक्तिः प्राग्वदवगंतव्या । ये त्वांचलिकसार्द्धपौर्णमीयकागमिकनामानः कुपाक्षिकास्ते पौर्णमीयकमूलका एवेति निजनिजनाम्ना विश्रामे वक्ष्यामस्तेन पौर्णमीयके तीर्थे बाह्ये सिद्धे ते तु सुतरां तीर्थबाह्या एवेऽति । षट् कुपाक्षिका जीर्णा इति जनप्रसिद्धिः।अथाधुनिकानां चतुर्णां मध्ये लुंपाकमतं वि० १५०८ वर्षे लुंपकलेखकात् प्ररूपणामधिकृत्य प्रवृत्तं । तत्प्ररूपणा च जिनप्रतिमानिषेधमूलिका । तन्मते वेषधराः पुनः वि० सं०१५३३ वर्षे सीरोहीप्रत्यासन्नारघट्टवाटकवास्तव्यप्राग्वाटज्ञातीयभाणाख्यादेव प्रवृत्ताः । एतदुत्पत्तिविस्तरस्तु एतन्नाम्ना सप्तम विश्रामे वक्ष्यते । अयं च प्रवचनबाह्य आबालगोपांगनानामपि प्रतीतः ७ । एवं कटुकबीजा(ज?)पाशचंद्रा[:] स्वस्वनाम्ना मतार्कषका अपि बोध्याः । उपलक्षणादन्येप्युपधानाद्यपलापिनस्तथाभूता एवावगंतव्याः १० । एते दशाप्यतीर्थकरमूलका न तीर्थं । किंतु मरुमरीचिकायां जलाभास इव तीर्थाभासास्तीर्थबाह्या इति । न तु तपागणोपि वि० १२८५ वर्षे श्रीजगच्चंद्रसूरितो जातः सोप्युक्तयुक्त्या कथं तीर्थमिति चेदुच्यते । न हि श्रीजगच्चंद्रसूरिर्वटगच्छात्कुताश्चिन्निमित्ताद्विपरीतप्ररूपणया चंद्रप्रभाचार्यादिवत्पृथग्भूतः । किंतु प्रमादवशेन क्रियाशिथिलसाधुसमुदायं परित्यज्य गुर्वाज्ञया श्रीआनंदविमलसूरिवंत् श्रीसुधर्मस्वामिनोच्छिन्नपरिपाट्या समागतां दशविधचक्रवालसामाचारीक्रियां कुर्वाणं यावज्जीवमाचाम्लतपोभिग्रहेण कृशांगीभूतं श्रीजगच्चंद्रसूरिं दृष्ट्वा राज्ञा तपा इत्याख्या वक्तव्येत्युक्तं ततः प्रभृति वटगणस्यैव तपा इत्याख्या प्रससार न ह्येतावता प्रागुक्तयुक्तिरत्रावतरति । अन्यथा श्रीसुस्थितसुप्रतिबुद्धाभ्यामेव कौटिकनाम्ना गणः ततोपि श्रीचंद्रसूरेश्चंद्रगच्छसंज्ञा जातापि [च?] चंद्रगच्छीयश्रीउद्योतनसूरिणा

श्रीसर्वदेवसूरेर्वटे सूरिपदकरणात् श्रीसर्वदेवसूरितो वटगच्छ इति रूढिरित्येवं कौटिकादिगणा अप्यच्छिन्नं तीर्थं न स्युः। तस्मान्नामांतरप्रादुर्भावेप्याचारप्ररूपणयोरच्छिन्नताभ्युपगंतव्या।

LLLL. No. 278. *Dharmasâgara's Pravachanaparîkshâ.*

प्रवचनपरीक्षा।

२२ पत्रस्य निरंकपृष्ठे।

यतस्ते कीदृशा उन्मार्गप्ररूपणारसिकाः। उन्मार्गः स्त्रीमुक्तिनिषेध १ चतुर्दशीपाक्षिकनिषेध २ पर्वातिरिक्तादिनपोषधनिषेध ३ सामायिकादौ श्राद्धमुखवस्त्रिकानिषेध ४ जिनबिंबानां पुरः फलादिपूजानिषेध ५ श्रुतदेवतास्तुतिनिषेध ६ जिनप्रतिमानिषेध ७ संप्रति गुरुदृक्पथावतारनिषेध ८ परंपरागतप्रायोबहुविधिनिषे [ध] ९ जिनपूजादिषु साधूपदेशनिषेध १० प्रमुख लक्षणः तस्य प्ररूपणा तव्यवस्थापनाय कुयुक्त्युद्भावना तत्र रसिका अहोरात्रं तदेकध्यानपरायणाः।

१४६ पत्रस्य निरंकपृष्ठे।

कुपाक्षिकमार्गस्तस्य यन्मूलं प्रथममुत्सूत्रं क्षपनकानां नाग्न्यव्रतं। १।
पौर्णमीयकानां पूर्णिमापाक्षिकं। २।
औष्ट्रिकानां(णां) स्त्रीजिनपूजानिषेधः। ३।
स्तनिकानां मुखवस्त्रिकानिषेधः। ४।
सार्द्धराकानां फलादिपूजानिषेधः। ५।
आगमिकानां श्रुतदेवतास्तुतिनिषेधः। ६।
लुंपाकानां प्रतिमानिषेधः। ७।
कटुकानां संप्रति साधुदर्शनाभावः। ८।
वंध्यानामागामि [क] वत् श्रुतदेवतानिषेधः। ९।
पाशस्य निद्रादिकरणे साधूनां जिनोपदेशनिषेधः। १०।

MMMM. No. 278. *Dharmasâgara's Pravachanaparîkshâ.*

प्रवचनपरीक्षा। ८६ पत्रे।

यद्यस्मात् स दुर्लभराजा षट्षष्ट्यधिकदशशतवर्षे १०६६ राज्ये उपविश्य सप्तसप्तत्यधि-

कदशशत १०७७ वर्षे कालगतः। परलोकं प्राप्तः। क्वचित् सं० १०७८ वर्षे इत्यपि दृश्यते। तत्रायं वर्ष ११ मास ६ राज्यं कृतवानिति लिखितमतस्तदपि युक्तमेव। यतः श्रीपत्तनराजपट्टावली त्वेवं। श्रीवीरात् ४७० वर्षे श्रीविक्रमः। संवत्सरः विक्रमादित्यतः। सं० ८०२ वर्षे वनराजेन पत्तनस्थापना कृता। तत्र तस्य राज्याभिषेकश्च ८०२ वर्षे। वनराजराज्यं वर्ष ६०। ततः ८६२ योगराजराज्यं वर्ष ३५। ततः ८९७ क्षेमराजराज्यं वर्ष २५। ततः ९२२ भूयडराज्यं वर्ष २९। ततः ९५१ वैरसिंहराज्यं वर्ष २५। ततः ९७६ वर्षे रत्नादित्यराज्यं वर्ष १५। ततः ९९१ सामंतसिंहराज्यं वर्ष ७। एते चापोत्कटा राजानः १९६ वर्षमध्ये बोध्याः। ततः ९९८ मूलराजराज्यं वर्ष ५५। स च सामंतसिंहभगिनीलीलादेवीसुतः। ततः १०५३ चामुंडराज्यं वर्ष १३। ततः १०६६ वल्लभराज्यं मास ६। ततः १०६६ वर्षे दुर्लभराज्यं वर्ष ११ मास ६। ततः १०७८ वर्षे भीमराज्यं वर्ष ४२ (५२१)। ततः ११३० वर्षे कर्णराज्यं वर्ष २०। ततः ११५० वर्षे जयसिंहदेवराज्यं वर्ष ४९। ततः ११९९ वर्षे कुमारपालदेवराज्यं वर्ष ३१। ततः १२३० अजयपालराज्यं वर्ष ३। ततः १२३३ बालमूलराज्यं वर्ष २। ततः १२३५ लघुभीमदेवराज्यं वर्ष ६३। ततः १२९८ वर्षे त्रिहुणपालराज्यं वर्ष ४। एवं चौलुक्यवंशे एकादश ११ भूपाः ३०० वर्षमध्ये। ततश्च १३०२ वर्षे वीसलदेवराज्यं वर्ष १८। ततः १३२० वर्षे अर्जुनदेवराज्यं वर्ष १३। ततः सारंगदेवराज्यं वर्ष २०। ततः १३५३ वर्षे लघुकर्णराज्यं वर्ष ७। एवं बाघेलान्वये राज्यं वर्ष ५८। ततः अलावदीनादिसुरत्राणराज्यं गुर्जरधरित्र्याभित्यादिविस्तरमिच्छता कुमारपालप्रबंधो विलोकनीय इति।

NNNN. No. 279. *Munisundara's Mitrachatushkakathâ.*

मित्रचतुष्ककथा।

आदौ।

जयश्रीप्राप्तितो द्वैधरिपूणां स्युः सदासुखाः।
षद्धर्मविद्याया भव्यास्तं श्रीवीरजिनं स्तुवे ॥ १ ॥
मालाकारा इव प्राप्तैर्यस्याः काव्यसुमैर्बुधाः।
ग्रथ्नंति ग्रंथमालां तां ब्राह्मीं कल्पलतां भजे ॥ २ ॥
भारती संयमश्रीश्च चक्रे येष्वेव भारती।
वंदे भाग्यनिधींस्ताञ् श्रीदेवसुंदरसद्गुरून् ॥ ३ ॥
येभ्यो ज्ञानरसैरात्तेः(त्तैः) शिष्याब्दाः प्रीणते भुवं।
श्रीज्ञानसागरान् सूरींस्तानस्ताघगुणान् स्तुवे ॥ ४ ॥
सोमसुंदरसूरींद्राञ् श्रीमतो नौमि तान् गुरून्।
तारयंतेन्यतीर्थ्या यज्ज्ञानभानूदयेधुना ॥ ५ ॥

अंते।

वेदाष्टमनुमिते १४८४ ब्दे मुनिसुंदरसूरिभिः सुमुखवृत्तं।

भव्यानुग्रहहेतोः श्रेयःप्राप्त्यै व्यधायीदं ॥ ११ ॥
शब्दानुशासने दक्षो लक्ष्मीभद्रमुनिर्मुदा ।
कथा एताश्चतस्रोपि गुरुभक्तेरशोधयत् ॥ १२ ॥

इति श्रीजिनमुनिनमननमस्कारगुणनस्वदारसंतोषफले सुमुखनृपादिमित्रचतुष्ककथा जगप्रसिद्धश्रीतपावृहद्गच्छमंडनश्रीदेवसुंदरसूरिश्रीज्ञानसागरसूरिशिष्यैः श्रीसोमसुंदरसूरिपट्टप्रतिष्ठितैः श्रीमुनिसुंदरसूरिभिः कृता ॥

0000. No. 282. *Jinadatta's Vivekavilâsa.*

विवेकविलासः ।

१७ पत्रस्य सांकपृष्ठमारभ्य १९ पत्रस्य निरंकपृष्ठं यावत् ।

अथ षड्दर्शनविचारक्रमः ।

जैनं मैमांसकं बौद्धं सांख्यं शैवं च नास्तिकं ।
स्वस्वतर्कविभेदेन जानीयादर्शनानि षट् ॥ ३८ ॥

अथ जैनं ।

बालभोगोपभोगानामुभयोर्दानलाभयोः ।
नांतरायस्तथा निद्रा भीरज्ञानं जुगुप्सनं ॥ ३९ ॥
हासो रत्यरती रागद्वेषावविरतिः स्मरः ।
शोको मिथ्यात्वमेतेष्टादश दोषा न यस्य सः ॥ ४० ॥
जिनो देवो गुरुः सम्यक् तत्त्वज्ञानोपदेशकः ।
ज्ञानदर्शनचारित्राण्यपवर्गस्य वर्तनी ॥ ४१ ॥
स्याद्वादश्च प्रमाणे द्वे प्रत्यक्षमनुमापि च ।
नित्यानित्यं जगत्सर्वं नव तत्त्वानि सप्त वा ॥ ४२ ॥
जीवाजीवौ पुण्यपापे आश्रवः संवरोपि च ।
बंधो निर्जरणं मुक्तिरेषां व्याख्याधुनोच्यते ॥ ४३ ॥
चेतनालक्षणो जीवः स्यादजीवस्तदन्यकैः ।
सत्कर्मपुद्गलैः पुण्यं पापं तस्य विपर्ययः ॥ ४४ ॥
आश्रवः कर्मसंबंधः कर्मरोधस्तु संवरः ।
कर्मणां बंधनाद्बंधो निर्जरा तद्वियोजनं ॥ ४५ ॥
अष्टकर्मक्षयो मोक्षोत्रांतर्भावश्च कैश्चन ।
पुण्यस्य संवरे पापमाश्रवे क्रियते पुनः ॥ ४६ ॥

---

१ बालाभो° *v. l.*; २ अंतराय° *v. l.*; ३ °दन्यजः *v. l.*; ४ सुकर्म° *v. l.*; ५ °लात्पु° *v.l.*; ६ °क्षयान्मो° *v. l.*; ७ °क्षोर्थांत°, °क्षोअंत°, क्षो आथांतभावकै, *v. l.*; ८ पापस्या° *v. l.*

लब्धानंतचतुष्कस्य लोकाग्रस्थस्य[9] चात्मनः ।
क्षीणाष्टकर्मणो मुक्तिर्[11]निर्व्यावृत्तिर्[12]जिनोदिता ॥ ४७ ॥
सरजोहरणा भैक्षभुजो लुंचितमूर्धजाः ।
श्वेतांबराः क्षमाशीला निस्संगा जैनसाधवः ॥ ४८ ॥
व्रतशीला[13] तपोयुक्ता गुप्तित्रितयशालिनः ।
सिद्धांताराधका नित्यं यतयो विजितेंद्रियाः ॥५१॥ } Written in the margin.
लुंचिता[14]ः पिच्छि[15]काहस्ताः पाणिपात्रा दिगंबराः ।
ऊर्ध्वाशिनो गृहे द्वा[16]तुर्द्वितीयाः स्युर्जिनर्षयः ॥ ४९ ॥
भुंक्ते न केवली न स्त्री मोक्षमेति दिगंबराः ।
प्राहुरेषामयं भेदो महान् श्वेतांबरैः समं ॥ ५० ॥

इति जैनं ।

अथ मैमांसकं ।

मीमांसको[17] द्विधा कर्मब्रह्ममीमांसकः स्मृ[18]तः ।
वेदांती मन्यते ब्रह्म कर्म भट्टप्रभाकरौ ॥ ५१ ॥
प्रत्यक्षमनुमानं च वेदो[19]पमया सह ।
अर्थापत्तिरभावश्च भट्टानां षट्प्रमा[20]ण्यसौ ॥ ५२ ॥
प्रभाकरमते पंचै[21]तान्यभावस्य वर्जनात् ।
अद्वैतवादी वेदांती प्रमाणं तु यथातथा ॥ ५३ ॥
सर्वमेतदिदं ब्रह्म वेदांते[22]द्वैतवादिनां ।
आत्मन्येवै[23] लयो मुक्तिर्वैदांतिकमते मता ॥ ५४ ॥
अकुकर्मा सषट्[24]कर्मा शूद्रान्नादिविवर्जकः ।
ब्रह्मसूत्री द्विजो भट्टो गृहस्थाश्रमसंस्थितः ॥ ५५ ॥
भगवन्नामधे[25]यास्तु द्विजा वेदांतदर्शने[26] ।
विप्र[27]गेहभुजस्त्यक्तोपवीता ब्रह्मवादिनः ॥ ५६ ॥
चत्वारो भगवद्भेदाः कुटीचरबहूदकौ ।
हंसः परमहंसश्चाधिकोमीषु परः परः ॥ ५७ ॥

इति मैमांसकमतं ।

---

९ °ग्रस्तस्य *v. l.*; १० °स्थहितात्मनः *v. l.*; ११ °क्तिर्निव्यावृत्ति°, °क्तिरव्यावृत्ति,° *v. l.* १२ this stanza does not occur in the other Mss. in our collection; १३ लुंचिकापि°, लुंचितापि°, *v. l.*; १४ पिच्छका° *v. l.*; १५ °सका द्वि.....सकत्वतः; १६ °सकस्त्वतः; १७ वेदश्चोप°, शाब्दं चोप°, *v. l.*; १८°प्रमा मतिः *v. l.*; १९°वैतान्येवाभाववर्जनात् *v. l.*; २० वेदांत्यद्वै° *v. l.*; २१आत्मनोथ° *v. l.*; २२°कर्म *v. l.*; २३° धेयाः स्युर्द्वै° *v. l.*; २४ °दर्शनाः *v. l.*; २५ °ब्रह्मगेहे, विप्रगेहे, *v. l.*

अथ बौद्धं ।

बौद्धानां सुगतो देवो विश्वं च क्षणभंगुरं ।
आर्यसत्याख्ययोः[26] तत्त्वचतुष्टयमिदं क्रमात् ॥ ५८ ॥
दुःखमायतनं चैव ततः समुदयो मतः ।
मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामितः[27] ॥ ५९ ॥
दुःखं संसारिणः स्कंधास्ते[29] च पंच प्रकीर्तिताः ।
विज्ञानं वेदना[30] संज्ञा संस्कारो रूपमेव च ॥ ६० ॥

अथायतनानि ।

पंचेंद्रियाणि शब्दाद्याः विषया[31]ः पंच मानसं ।
धर्मायतनं[32] नामानि द्वादशायतनानि[33] तु ॥ ६१ ॥

अथ समुदयः ।

रागादीनां गणो यस्मात्समुदेति नृणां हृदि ।
आत्मात्मीयस्वभावाख्यः[34] स स्यात्समुदयः[35] पुनः ॥ ६२ ॥

अथ मार्गः ।

क्षणिकाः सर्वसंस्कारा इति या वासना स्थिरा ।
स मार्ग इति विज्ञेयः स च मोक्षोभिधीयते ॥ ६३ ॥
प्रत्यक्षमनुमानं च प्रमाणद्वितयं तथा ।
चतुःप्रस्थानिका बौद्धाः ख्याता वैभाषिकादयः ॥ ६४ ॥
अर्थो ज्ञान[36]न्वितो वैभाषिकेण बहु मन्यते ।
सौत्रांतिकेन प्रत्यक्ष ग्राह्यो[37]र्थो न बहिर्मतः ॥ ६५ ॥
आकार[38]हिता बुद्धिर्योगाचारस्य संमता ।
केवलां संविदं स्वस्थां मन्यंते मध्यमाः पुनः ॥ ६६ ॥
रागादिज्ञानसंतानवासनोच्छेदसंभवा ।
चतुर्णामपि बौद्धानां मुक्तिरेषा[39] प्रकीर्तिता ॥ ६७ ॥
कृत्तिः कमंडलुर्मौंड्यं चीरं पूर्वाह्ण[40]भोजनं ।
संघो रक्तांबरत्वं च शिश्रिये बौद्धभिक्षुभिः ॥ ६८ ॥

इति बौद्धमतं ।

---

२६ °आर्यसता, आर्यसत्वा, *v. l.*; २७°ख्यतत्त्वं च चतु° *v. l.*; २८°तामिति, °तामतः, *v. l.*; २९ °धास्तत्र *v. l.*; ३० वेदनं *v. l.*; ३१ °या आप *v. l.*; ३२ °तनमेतानि *v. l.*; ३३ °नि च *v. l.*; ३४ आत्मीयजस्व° *v. l.*; ३५ °दयस्ततः *v. l.*; ३६ विज्ञान्वितो *v. l.*; ३७ ग्राह्यार्थो *v. l.*; ३८ आचार° *v. l.*; ३९ °रेका *v. l.*

अथ सांख्यं ।

सांख्यैर्देवः शिवः कैश्चिन्मतो नारायणः परैः ।
उभयोः सर्वमप्यन्यत्तत्त्वप्रभृतिकं[40] मतं ॥ ६९ ॥
सांख्यानां स्युर्गुणाः सत्त्व[41]रजस्तम इति त्रयः ।
साम्यावस्था भवे[42]त्येषां त्रयाणां प्रकृतिः पुनः ॥ ७० ॥
प्रकृतेः स्यान्महांस्तावदहंकारस्ततोपि च ।
पंच बुद्धींद्रियाणि स्युश्चक्षुरादीनि पंच च ॥ ७१ ॥
कर्मेंद्रियाणि वाक्पानि चरणोपस्थपायवः ।
मनश्च पंच तन्मात्राः शब्दो रूपं रसस्तथा ॥ ७२ ॥
स्पर्शो गंधोपि तेभ्यः स्यात्पृथ्व्याद्यं भूतपंचकं ।
इयं प्रकृतिरेतस्याः परस्तु पुरुषो मतः ॥ } Omitted in the present Ms.
पंचविंशतितत्त्वी[यं] नित्यं सांख्यमते जगत् ।
प्रमाणत्रितयं चात्र प्रत्यक्षमनुमागमः ॥ ७३ ॥
यदैव जायते भेदः प्रकृतेः पुरुषस्य च ।
मुक्तिरुक्ता तदा सांख्यैः ख्यातिः सैव च भण्यते ॥ ७४ ॥
सांख्यः शिखी जटी मुंडी कषा[43]यांबरोपि च ।
वेषे नास्थैव सांख्यस्य पुनस्तत्त्वे महाग्रहः ॥ ७५ ॥
इति सांख्यमतं ।

अथ शैवं ।

शिवस्य दर्शने तर्कावुभौ न्यायविशेषि[44]कौ ।
न्याये षोडशतत्त्वी स्यात् षट्तत्त्वी चै[45]व विशेषि[46]के ॥ ७६ ॥
अन्योन्यतत्त्वांतर्भावा[47]द्वयोर्भेदोस्ति नास्ति वा ।
द्वयोरपि शिवो[48] देवो नित्यः सृष्ट्यादिकारकः ॥ ७७ ॥
नैयायिकानां चत्वारि प्रमाणानि भवंति [49]चै ।
प्रत्यक्षमागमोन्यच्चानुमानमुपमापि च ॥ ७८ ॥

अथ तत्त्वानि ।

प्रमाणं च प्रमेयं च संशयश्च प्रयोजनं ।
दृष्टांतोप्यथ सिद्धांतावयवौ तर्कनिर्णयौ ॥ ७९ ॥

---

४० °कं समं *v. l.*; ४१ सत्त्वं *v. l.*; ४२ भवेत्तेषां *v. l.*; ४३ °तत्त्वानि *v. l.*; ४४ काषाय° *v. l.*; ४५ °विशेषिकौ *v. l.*; ४६ °त्वी स्याद्वि° *v. l.*; ४७ विशेषिके *v. l.*; ४८ तत्त्वांतर्भावादन्योन्यं *v. l.*; ४९ शिवो नित्यकर्ता *v. l.*; ५० ° ति वा *v. l.*

वादो जल्पो वितंडा च हेत्वाभासाश्छलानि च ।
जातयो निग्रहस्थानानीति तत्त्वानि षोडश ॥ ८० ॥

अथ वैशेषिकं ।

वैशेषिकमते तावत्प्रमाणत्रितयं भवेत् ।
प्रत्यक्षमनुमानं च तार्तीयैकमथागमः ॥ ८१ ॥
द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकं ।
समवायश्च षट्तत्त्वी तद्व्याख्यानमथोच्यते ॥ ८२ ॥
द्रव्यं नवविधं प्रोक्तं पृथिवीजलवह्नयः ।
पवनो गगनं कालो दिगात्मा मन इत्यपि ॥ ८३ ॥
नित्यानित्यानि चत्वारि कार्यकारणभावतः ।
मनो दिक्कालौ आत्मा च व्योम नित्यानि पंच तु ॥ ८४ ॥

अथ गुणाः ।

स्पर्शो रूपं रसो गंधः संख्याथ परिमाणकं ।
पृथक्त्वमथ संयोगविभागौ च परं ध्रुवं ॥ ८५ ॥
अपरत्वं बुद्धिसौख्ये दुःखेच्छे द्वेषयत्नकौ ।
धर्माधर्मौ च संस्कारो गुरुत्वं द्रव इत्यपि ॥ ८६ ॥
स्नेहः शब्दो गुणा एवं विंशतिश्चतुरन्विता ।
अथ कर्माणि वक्ष्यामि प्रत्येकमभिधानतः ॥ ८७ ॥
उत्क्षेपणंवक्षेपणाकुंचनं च प्रसारणं ।
गमनानीति कर्माणि पंचोक्तानि तदागमे ॥ ८८ ॥
सामान्यं भवति द्वेधा परं चैवापरं तथा ।
परमाणुषु वर्तते विशेषा नित्यवृत्तयः ॥ ८९ ॥
भवेदयुतसिद्धानामाधाराधेयवर्त्तिनां ।
संबंधः समवायाख्य इह प्रत्ययहेतुकः ॥ ९० ॥
विषयेंद्रियबुद्धीनां वपुषः सुखदुःखयोः ।
अभावादात्मसंस्थानं मुक्तिर्नैयायिकैर्मता ॥ ९१ ॥
चतुर्विंशतिवैशेषिकगुणांतर्गुणा नैव ।

---

९१ तार्तीयीकस्तथा°, तार्तीयैकस्तथा°, *v. l.*; ९२° भेदतः *v. l.*; ९३° लमात्मा *v. l*; ९४ पंच च, पंचकं, *v. l.*; ९५ रूपरसौ *v. l.*; ९६ °ख्या च *v. l.*; ९७ परत्वकं *v. l*; ९८ °णापक्षेप° *v. l.*; ९९ गमागमेति, गमनागमनानीति पं° *v. l.*; ६० यथा भवेयुः सिं° *v. l.*; ६१ °वायश्च *v. l.*; ६२ नव *v. l.*

बुद्ध्यादयस्तदुच्छेदो मुक्तिर्वैशेषिकी तु सा ॥ ९२ ॥
आधारभस्मकौपीनजटायज्ञोपवीतिनः ।
मंत्राचौरादिभेदेन चतुर्धा स्युस्तपस्विनः ॥ ९३ ॥
शैवाः पाशुपताश्चैव महाव्रतधरास्तथा ।
तुर्याः कालमुखा मुख्याः भेदा एते तपस्विनां ॥ ९४ ॥

इति शैवं ।

अथ नास्तिकं ।

पंचभूतात्मकं वस्तु प्रत्यक्षं च प्रमाणकं ।
नास्तिकस्य मते नान्यदात्मामुत्र शुभाशुभं ॥ ९५ ॥
प्रत्यक्षमविसंवादि ज्ञानमिंद्रियगोचरैः ।
लिंगतोनुमितिर्धूमादिव वह्निरवस्थितिः ॥ ९६ ॥
अनुमानं त्रिधा पूर्वशेषसामान्यतो यथा ।
वृष्टेः सस्यं नदीपूराद्दृष्टिरस्ताद्रवेर्गतिः ॥ ९७ ॥
ख्यातं सामान्यतः साध्यसाधनं चोपमा यथा ।
स्याद्गोवद्गवयः सास्नादिमत्त्वमुभयोरपि ॥ ९८ ॥
आगमश्चाप्तवचनं स च कस्यापि कोपि च ।
वांच्याः प्रतीतौ तत्सिद्धौ प्रोक्तार्थापत्तिरुत्तमैः ॥ ९९ ॥
बृंदुः पीनोह्नि नाश्नाति रात्रावित्यर्थतो यथा ।
पंचप्रमाणसामर्थ्ये वस्तुसिद्धिरभावतः ॥ ३०० ॥
स्थापितं वादिभिः स्वं स्वं मतं तत्त्वप्रमाणतः ।
तत्त्वं सत्परमार्थेन प्रमाणं तत्त्वसाधकं ॥ १ ॥
संतु शास्त्राणि सर्वाणि सरहस्यानि दूरतः ।
एकमप्यक्षरं सम्यक् शिक्षितं नैव निष्फलं ॥ २ ॥

[इति षड्दर्शनविचारः ।]

---

६३ °धारादे° *v. l.*; ६४ °गोचरं *v. l.*; ६५ वह्निरवस्थितः *v. l.*; ६६ पूर्वं *v. l.*; ६७°पूरा वृष्टे°, °पूरा वृष्टि°, *v. l.*; ६८ गते सा° *v. l.*; ६९ °मश्वेष्ट° *v. l.*; ७० वाच्यप्र°, वाच्याप्र°, द्वाभ्यां प्र° *v. l.*; ७१ तत्सिद्धये *v. l.*; ७२ वपुःपीनो, बहुपीनो ....°ति यद्वत्यर्थ...पंचप्राणसमर्थोयं वस्तु° *v. l.*; ७३ पदप्रमाण° *v. l.*; ७४ ° सिद्धे-रभावना *v. l.*; ७५ तच्च प्रमा° *v. l.*; ७६ तत्त्वं नु परं, तत्त्वं तु परं, तत्त्वं तत्परं, *v. l.*; ७७ °साधनं *v. l.*; ७८ एकमस्य° *v. l.*

PPPP. No. 282. *Jinadatta's Vivekavilâsa.*

विवेकविलासः ।

अंते ।

अस्ति प्रीतिपदं गच्छो जगतः सहकारवत् ।
मुनिपुंस्कोकिलाकीर्णो वायडस्थानकास्थितिः ॥ १ ॥
अर्हन्मतपुरीवप्रस्तत्र श्रीरासिलप्रभुः ।
अनुल्लंघ्यः परैर्वादिवीरैः स्थैर्यगुणैकभूः ॥ २ ॥
गुणाः श्रीजीवदेवस्य प्रभोरद्भुतकेलयः ।
विद्वज्जनशिरोदोलां यन्नोज्झंति कदाचन ॥ ३ ॥
अस्ति तच्चरणोपास्तिसंजातः (त)स्वस्तिविस्तरः ।
सूरिः श्रीजिनदत्ताख्यः ख्यातः सूरिषु भूरिषु ॥ ४ ॥
चाहवानाव्वयपाथोधिसंवर्द्धनविधौ विधुः ।
श्रीमानुदयसिंहोस्ति श्रीजावालिपुराधिपः ॥ ५ ॥
तस्य विश्वाससदनं कोशरक्षाविचक्षणः ।
देवपालो महामात्यः प्रजानंदनचंदनः ॥ ६ ॥
आधारः सर्वधर्माणामवधिर्दानशालिनां ।
आस्थानं सर्वपुण्यानामाकरः सर्वसंपदां ॥ ७ ॥
प्रतिपन्नात्मजस्तस्य वायटान्वयसंभवः ।
धनपालः शुचिर्द्धीमान् विवेकोल्लासिमानसः ॥ ८ ॥
तन्मनस्तोषपोषाय श्रीजिनदत्तसूरिभिः ।
श्रीविवेकविलासाख्यो ग्रंथोयं निर्ममेऽनघः ॥ ९ ॥

इति विवेकविलासप्रशस्तिः संपूर्णा । ग्रंथाग्रं १३०० । संवत् १६७४ वर्षे माहशुदि १४ गुरौ पृष्टचंचग्रामे लिखितः ग० सौभाग्यसोमगणिभिः ग्रंथोयमानंदकरः ।

QQQQ. No. 285. *Ratnaśekhara's Śrâvakapratikramaṇasûtraṭîkâ.*

श्रावकप्रतिक्रमणसूत्रटीका ।

आदौ ।

जयति सततोदयश्रीः श्रीवीरजिनेश्वरोभिनवभानुः ।
कुवलयबोधं विदधति गवां विलासा विभोर्यस्य ॥ १ ॥
श्रुतजलजलधीन् बहुविधलब्धीन् प्रणिदध्महे गणधरेंद्रान् ।
श्रुतदेवतां च विश्रुतगुणैर्गरिष्ठान्निजगुरूंश्च ॥ २ ॥
श्रीसोमसुंदरगुरुप्रवराः प्रथितास्तपागणप्रभवः ।
प्रतिगौतमतः संप्रति जयंति निष्प्रतिममहिमभृतः ॥ ३ ॥

तेषां विनेयवृषभा भाग्यभुवो भुवनसुंदराचार्याः ।
व्याख्यानदीपिकाद्यैर्ग्रंथैर्ये निजयशोग्रथ्नन् ॥ ४ ॥
तेषामेषोतिषदंतिमः किमप्यादधाति सुखबोधां ।
वृत्तिं स्वपरहितार्थं गृहिप्रतिक्रमणसूत्रस्य ॥५॥

अंते ।

अत्राह परः। इदं प्रतिक्रमणसूत्रं केन कृतं । उच्यते । यथा परप्रतिक्रमणसूत्राणि श्रुतस्थविरकृतानि तथैतदपि । यदुक्तमावश्यकवृहद्वृत्तौ अल्पकरसत्वीतिगाथाव्याख्याने । अंगप्रविष्टं गणधरकृतमाचारांगादि । अनंगप्रविष्टं तु स्थविरकृतमावश्यकादीति । अथ श्रावकप्रतिक्रमणसूत्रस्य यद्यार्षत्वं तदा न किं तस्य निर्युक्तिभाष्यादीति चेत् । तर्ह्यावश्यकदशवैकालिकादिदशशास्त्रीव्यतिरेकेण शेषाणां निर्युक्त्यभावादौपपातिकाद्यंगानां च चूर्णेरप्यभावादनार्षत्वप्रसंगस्तस्मान्न किंचिदेतत् । श्राद्धप्रतिक्रमणसूत्रस्य च विक्रम ११८३ वर्षे श्रीविजयसिंहसूरिश्रीजिनदेवसूरिकृते चूर्णिभाष्ये अपि स्तो वृत्तयश्च बहव्यः । अतः श्रुतस्थविरकृतत्वेन सर्वातीचारविशोधकत्वेन च श्रावकैरेतदुपादेयमेव साधुभिः स्वप्रतिक्रमणसूत्रमिव । एवं च सति ये स्वकदाग्रहमात्राभिनिविष्टदृष्टयः पाश्चात्येन केनचित्कृतं सर्वथानुपादेयमिदमिति ब्रुवते न विद्मस्तेषां का गतिः । सर्वज्ञप्रणीतप्राचीनस्थविराचरितसम्यग्मार्गस्योपमर्दनात् । तदुक्तं ।

रन्नो आणाभंगे इक्कस्सिअ निग्गहो हवइ लोए ।
सव्वन्नाणाभंगे अणंतसो निग्गहं लहइ ॥ १ ॥

ननु श्रावकस्य प्रतिक्रमणकरणमेवासंगतं दूरेस्तु प्रतिक्रमणसूत्रविचारः । तदपि प्रलापमात्रं सिद्धांते श्राद्धानामनेकत्र तस्योक्तत्वाद्यदनुयोगद्वारसूत्रं । से किं तं लोउत्तरिअं भावावस्सयं। जन्नं समणो वा समणी वा सावओ वा साविआ वा तच्चित्ते जाव उभओ कालं आवस्सयं करे इत्ति ॥ तथा तत्रैव ।

समणेण सावएण य अवस्सकायव्वयं हवइ जम्हा ।
अंतो अहोनिसस्सा तम्हा आवस्सयं नाम ॥ १ ॥

नवांगवृत्तिकृदभयदेवसूरिकलिकालसर्वज्ञश्रीहेमसूरिप्रमुखपूर्वाचार्यरचितेषु पंचाशकवृत्तियोगशास्त्रवृत्तिग्रंथेषु च श्राद्धानां प्रतिक्रमणं साक्षादुक्तं सर्वप्रसिद्धमेव । तच्च पंचभेदं । दैवसिकं १ रात्रिकं २ पाक्षिकं ३ चातुर्मासिकं ४ सांवत्सरिकं ५ चेति । एषां कालविध्यादि मत्कृतविधिकौमुद्या अवधार्यं ।

विख्याततपेत्याख्या जगति जगच्चंद्रसूरयोभूवन् ।
श्रीदेवसुंदरगुरूत्तमाश्च तदनुक्रमाद्विदिताः ॥ १ ॥
पंच च तेषां शिष्यास्तेष्वाद्या ज्ञानसागरा गुरवः ।
विविधावचूर्णिलहरीप्रकटनतः सान्वयाह्वानाः ॥ २ ॥
श्रुतगतविविधालापकसमुद्धृतः समभवंश्च सूरींद्राः ।
कुलमंडना द्वितीयाः श्रीगुणरत्नास्तृतीयाश्च ॥ ३ ॥
षड्दर्शनवृत्तिक्रियारत्नसमुच्चयविचारनिचयसृजः ।
श्रीभुवनसुंदरादिषु भेजुर्विद्यागुरुत्वं ये ॥ ४ ॥
श्रीसोमसुंदरगुरुप्रवरास्तुर्या अहार्यमहिमानः ।
येभ्यः संततिरुच्चैर्भवति द्वेधा सुधर्मभ्यः ॥ ५ ॥
यतिजीतकल्पविवृतश्च पंचमाः साधुरत्नसूरिवराः ।
यैर्मादृशोप्यकृष्यत करप्रयोगेण भवकूपात् ॥ ६ ॥
श्रीदेवसुंदरगुरोः पट्टे श्रीसोमसुंदरगणींद्राः ।
युगवरवद्विजयंते तेषां शिष्याश्च पंचैते ॥ ७ ॥
मारीत्यवमनिराकृतिसहस्रनामस्मृतिप्रभृतिकृत्यैः ।
श्रीमुनिसुंदरगुरवश्चिरंतनाचार्यमहिमभृतः ॥ ८ ॥
श्रीजयचंद्रमुनींद्रा निस्तंद्राः संघगच्छकार्येषु ।
श्रीभुवनसुंदरवरा दूरविहारैर्गणोपकृतः ॥ ९ ॥
एकांगा अप्येकादशांगिनश्च जिनसुंदराचार्याः ।
निर्ग्रंथा ग्रंथकृतः श्रीमज्जिनकीर्तिगुरवश्च ॥ १० ॥
एषां श्रीसुगुरूणां प्रसादतोब्दे षडंकविश्वमिते ।
श्रीरत्नशेखरगणिर्वृत्तिमिमामकृत कृतितुष्टयै ॥ ११ ॥
चातुर्वेद्योदधिभिर्दधिभिर्दधिशुद्धपरमपरभागं ।
साशोध्यत प्रयत्नाल्लक्ष्मीभद्राह्वविबुधैः ॥ १२ ॥
